अर्हम्

श्रीविजयनेमिसूरिग्रन्थमालारत्नम्-२६.

# स्याद्यन्तरत्नाकरः

[ साधनिकादियुत-संस्कृतशब्दरूपमहोदधिः ]

तस्य चायं

## प्रथमस्तरङ्गः ॥

रचयिता- श्रीदक्षविजयो मुनिः ॥

प्रकाशिका -

राजनगरस्था श्रीजैनग्रन्थप्रकाशकसभा ।

| | | |
|---|---|---|
| वीर संवत् २४६५ | मूल्यम्-सपादरुप्यकम् । | प्रतयः ४०० |
| विक्रमसंवत् १९९५ | रू. १-४-० | प्रथमावृत्तिः |

# પ્રકાશકીય નિવેદ ..

વિ. સં. ૧૯૯૨ ની સાલમાં આ પુસ્તક છપાવવું શરૂ કરેલ. લગભગ બે અઢી વર્ષ સુધી છાપ કામ ચાલ્યુ, તેમાં ૨૨૪ પેઇજ સુધી ૧૪ ફારમ સુધી છપાયું. બાદ પ્રેસ માલિકે પોતાના ધંધાની દિશા બદલી અને આના રચયિતા પૂજ્ય મુનિરાજશ્રીએ પણ અન્ય અન્ય ગ્રંથોના પ્રકાશનાદિ કાર્યોમાં લક્ષ્ય આપ્યું; એટલે વિ. સં. ૧૯૯૪ ની સાલ પછીથી આ પુસ્તકનું મુદ્રણકાર્ય અટકયું. તેના ઉપર વિષમ કાળનો એવો પડદો પડયો કે આઠ આઠ વર્ષના થર ચડી ગયા. ઉપેક્ષાનો કાટ ચઢતો ગયો. અસ્તુ

આ પુસ્તક સંસ્કૃત ભાષાના ઉપાસકોને ઘણુંજ ઉપયોગિ છે. તેમાં પણ સંસ્કૃત વ્યાકરણના અભ્યાસક તેમજ અધ્યાપક વર્ગ માટે તો અત્યંત જ ઉપયોગિ છે. માટે અનેકશઃ અનેક અભ્યાસીઓ તેમજ સારા સારા પંડિતો દ્વારા ચોમેરથી શીઘ્ર પ્રકાશન માટે પ્રેરણા ઉપર પ્રેરણાઓ થવા લાગી. અમારી ભાવના મુજબ તો સ્વરાંત ભાગ સંપૂર્ણ કરી, આમાં આપેલા તમામ શબ્દોનો અકારાદિ કોશ બનાવી, તેના સંસ્કૃત તથા ગુજરાતી તેમજ રાજકીય ભાષામાં અર્થ લખી, પ્રસ્તાવના. શુદ્ધિપત્ર તથા વિશિષ્ટ પરિશિષ્ટોથી વિભૂષિત આ પુસ્તકનું પ્રકાશન કરવાનું હતું, પરંતુ હાલના પેપર કંટ્રોલ તેમજ કવોટા વગેરે ના કપરા સંયોગોને લઇને તે મુરાદ બર આવી શકી નથી. અમારી આ મુરાદ શાસનદેવ સવેળા સફળ કરે એવી આશા રાખીયે છીએ. ૮ વર્ષ પૂર્વે જેટલો ભાગ છપાયો તેટલા ભાગનું બાઇન્ડીંગ કરાવી હાલ આ પ્રકાશન કરેલ છે. આ અધુરા પ્રકાશનથી રખેને કોઇ મુંઝાતા! અનુકુળ સયોગો પામીને આગળનું છાપકામ ચલાવવાનું છે. વળી આ પુસ્તક છપાવવા માટે સખી ગ્રહસ્થોએ આપેલ સહકાર તથા સહાયક-વર્ગના ઉપદેશક **પૂજ્ય મુનિરાજ શ્રીચંદ્રપ્રભાવિજયજી મહારાજશ્રીનો સહકાર અવિસ્મરણીય તેમજ નોંધપાત્ર છે.** બીજી આવૃત્તિમાં અથવા આગળના ભાગમાં શુદ્ધિપ્રત્રક આદિ આપવામાં આવશે, છતાં પાઠકવૃંદને હંસવૃત્તિથી રહી ગયેલ સ્ખલનાઓ સુધારી વાંચવા, તથા તેથી અમોને વાકેફ કરવા નમ્ર ભાવે વિનવીએ છીએ. સુજ્ઞેષુ કિં બહુના! શુભં ભવતુ. ૐ શાંતિઃ

# આ છપાતા સ્યાદ્વાદરત્નાકરના સહાયક સખી સદ્‌ગ્રહસ્થોની નામાવળી.

| રૂપિયા | નામ | ઠામ |
|---|---|---|
| ૨૦૦) | મદ્રાસ શ્રી જૈન સંઘ હા. ભુરમલજી. ગોહીલીવાળા | મદ્રાસ. |
| ૧૨૫) | શેઠ ઘેલાભાઇ કરમચંદ જૈન સેનેટરીયમ, હા. મ્હેસાણાવાળા શેઠ ડાહ્યાભાઇ ઘેલાભાઈ. | વીરલાપારલા. મુંબઇ. |
| ૫૧) | દેસાઇ વીરચંદભાઇ હેમચંદ. | બોટાદ. |
| ૫૧) | ઝવેરી ઉત્તમચંદ માણેકલાલ વડોદરાવાળા તરફથી. ઝવેરી મગનલાલ મોહનલાલના સ્મરણાર્થે, હા. ઘેલાભાઈ કસ્તુરચંદ. | અમદાવાદ. |
| ૫૧) | શેઠ ચંદુલાલ ભુલાખીદાસ શાહપુરવાળા | અમદાવાદ. |
| ૫૧) | શેઠ ડાહ્યાભાઇ સાંકળચંદ ,, | ,, |
| ૫૧) | અ. સૌ. બાઇ મણી, તે શા. છગનલાલ અમુલખની ધર્મપત્નીના સ્મરણાર્થે. | મુ. વઢવાણકેમ્પ. |
| ૫૧) | ઉદારદીલ શેઠ તારાચંદજી મોતીજી. | મુ. જાવાલ...મારવાડ. |
| ૫૦) | ડોકટર શાંતિલાલ હરિભાઈના સ્મરણાર્થે. | મર્ચંટ સોસાયટી-અમદાવાદ. |
| ૩૪ાા) | શા. વનાજી નવલમલજી | મુ. જાવાલ...મારવાડ. |
| ૩૦) | શા. ચમનાજી મગરાજજી | ,, ,, |
| ૨૫) | શા. કેસરીમલજી પનાજી | ,, ,, |
| ૨૫) | ,, સાંકળચંદજી રાસાજી | ,, ,, |
| ૨૫) | ,, સાંકળચંદજી હાંસાજી | ,, ,, |
| ૨૫) | ,, ભૂરમલજી કસ્તુરચંદજી | ,, ,, |
| ૨૫) | ,, શાંતિલાલ ચુનીલાલ | ખંભાત |
| ૨૫) | ,, વીરચંદ સાંકળચંદ દાદા સાહેબની પોળવાળા. | અમદવાદ. |
| ૨૫) | શા. હરિસિંહભાઈ ભુરાભાઈ | સાયલા |
| ૨૧) | શા. વાડીભાઇ ચકુભાઈ | દેવસાનો પાડો. અમદાવાદ. |
| ૧૧) | શા ભોગીલાલ છગનલાલ ખંભાતવાળા | ,, ,, |

સૂચના:- ઉપર્યુક્ત મદદમાંથી હજુ આ ગ્રંથ આગળ છપાશે.

॥ ॐ अर्हँ श्रीसिद्धचक्राय नमो नमः ॥

॥ साम्प्रतशासनाधीश्वराय श्रीमहावीरस्वामिने नमो नमः ॥
॥ सकललब्धिसमुल्लसिताय श्रीगौतमगणधराय नमो नमः ॥
॥ सुगृहीतनामधेय-जगद्गुरु-श्रीमद्विजयनेमिसूरीश्वराय नमो नमः ॥
॥ भट्टारकाचार्य-श्रीमद्विजयलावण्यसूरिप्रवराय सद्गुरवे नमो नमः ॥

---

श्रीमत्तपोगच्छगगनाङ्गणगगनमणि-शासनसम्राट्-सर्वतन्त्रस्वतन्त्र-सूरिचक्रचक्रवर्ति-तीर्थरक्षणपरायण-विद्यापीठादिप्रस्थानपञ्चक-समाराधक-जगद्गुरु-परमपूज्य-पूज्यपाद-प्रातःस्मरणीय-भट्टारकाचार्यवर्य-श्रीश्रीश्रीमद्-विजयनेमिसूरीश्वरान्तिषद्विद्वच्छिरोमणि-व्याकरणवाचस्पति-कविरत्न-शास्त्रविशारद-परमोपकारि-श्रीमद्गुरुराज-भट्टारकाचार्य-श्रीमद्विजयलावण्यसूरिवर-चरणारविन्दमिलिन्दायमानान्तेवासि-मुनिदक्षविजयविरचितः—

# ॥ श्रीस्याद्यन्तरत्नाकरः ॥

[ शार्दूलविक्रीडितवृत्तम् ]

लोकालोकविलोकनैकचतुरे लब्धेऽमले केवले,
लोकित्वाऽखिलकालभावघटनां भव्योपकाराय हि ।
संसारार्णवतारणैकतरणिं निर्माय तीर्थं च यै-
र्नाम्नः सार्थकता कृता शिवकृते ते सन्तु तीर्थङ्कराः ॥ १ ॥

[ शिखरिणीवृत्तम् ]

क्षमापालावल्यां प्रथमपदवीं प्राप भुवि यो,
युगादौ विज्ञप्तः कृतकलकलैरार्त्तयुगलैः ।
कलानामालीर्योऽगमयत समुल्लासपदवीं,
सदा स स्याद्याद्यो वृषभजिनराड् मङ्गलकृते ॥ २ ॥

[ शार्दूलविक्रीडितवृत्तम् ]

स्वाङ्गोत्थामिषतोऽपि पत्रिशकुनेः पारापतं यः पपौ,
गर्भङ्गोऽप्यशिवोपशान्तिमखिलां चक्रे जनानां मुदे ।
त्यक्त्वा चञ्चलचारुचक्रिकमलां यो धर्मचक्री बभौ,
सोऽयं शान्तिजिनेश्वरो वितरताच्छान्तिं सदा शान्तरुक् ॥ ३ ॥

[ स्रग्धरावृत्तम् ]

नौमि श्रीनेमिनाथं विबुधपतिनतं ज्ञातविश्वस्वरूपं,
संत्यक्ताशेषदोषप्रियकलिताशिवानन्ददानैकदक्षम् ।
आबाल्याद् ब्रह्मचर्यं सुदधतममलं भोगराजीं विहायाऽऽ-
शातीतोग्रक्षमाभृच्छिरसि धृतपदाम्भोजधूलीपरागम् ॥ ४ ॥

[ उपजातिवृत्तम् ]

मुदेऽस्तु वः पार्श्वजिनेशदेवो, फलं प्रशस्यं वितनोति यश्च ।
संतापहो निर्मलजीवनश्च, गभीरनादोल्लसितः सविद्युत् ॥ ५ ॥

[ शार्दूलविक्रीडितवृत्तम् ]

सोऽयं वीरजिनेश्वरो विजयतां, योऽर्च्यश्शचीशैस्सदा,
रागाद्यान्तरशत्रवोऽतुलबला येनाहता ज्ञानिना ।

उद्धारे भवकूपमग्नभविनां, यद्वाग्वरत्रायते,
यत्तीर्थं ह्यधुनापि बाधरहितं, सद्योऽनुगृह्णाति नः ॥ ६ ॥

[ मालिनीवृत्तम् ]

अमृतरसप्रवाहं या सदा वर्षयित्री,
नयनिकरमनोज्ञा भङ्गजालैरुदारा ।
जिनवरवदनाब्जे संस्थिता शारदा सा,
भवतु भविजनानां बोधदानैकदक्षा ॥ ७ ॥

[ उपजातिवृत्तम् ]

अवाप्य यं चारुतरं निवासं, शान्तिश्रिरं प्राप विकाशभावम् ।
पूज्यो मुनीशैश्च स वृद्धिचन्द्रः, कथं न नव्यो नवकाव्यजातैः ॥ ८ ॥

[ उपजातिवृत्तम् ]

विलोड्य शास्त्राम्बुनिधिं मनीषा–सुराचलेनाप्य ददौ जनेभ्यः ।
तत्त्वामृतं यश्च सदा सुशीलः, स नेमिसूरिर्भगवान्मुदेऽस्तु ॥ ९ ॥

[ वसंततिलकावृत्तम् ]

श्रीमत्तपोगगनमण्डलमण्डनाय, भव्यारविन्ददलवृन्दविकासनाय ।
दोषानुलग्नतिमिरालिविनाशनाय, श्रीनेमिसूरिरवये सततं नमोऽस्तु।१०।

[ शार्दूलविक्रीडितवृत्तम् ]

भव्याभ्यामदवृद्धिचन्द्रसदृशं श्रीनेमिसूरीश्वरं,
सम्यग्दर्शनबोधदानसदनं चारित्रभानूदयम् ।
जैनेन्द्रागमतत्त्वनन्दनघनं लावण्ययोगालयं,
दक्षोऽहं त्रिविधं हि तं प्रतिदिनं वन्दे मुदाऽऽनन्ददम् ॥ ११ ॥

[ शार्दूलविक्रीडितवृत्तम् ]

न्यायव्याकरणागमेषु ललिते काव्ये तथा छन्दसि,
साहित्यप्रभृतौ प्रबन्धगगने यद्भीकरा विस्तृताः ।
येनाकारि च भूरिशास्त्ररचना विद्वज्जनानां मुदे,
वन्दे तं प्रगुणालयं गुरुवरं लावण्यसूरीश्वरम् ॥ १२ ॥

[ शिखरिणीवृत्तम् ]

प्रसादाद्यस्याऽहं जिनचरितदीक्षामधिगतो,
जडोऽप्यात्मा मेऽयं विमलतरशिक्षावितरणैः ।
इयद्भूमिं नीतोऽतुलकरुणया येन गुरुणा,
स सूरिर्लावण्यो मम मनसि नित्यं निवसतु ॥ १३ ॥

[ शार्दूलविक्रीडितवृत्तम् ]

तस्य व्याकरणे गतस्य पदवीं वाचस्पतीति स्फुटां,
शास्त्रालौ च विशारदः कविकुले रत्नेति रम्यं पदम् ।
श्रीलावण्यमुनीश्वरस्य सुगुरोः सेवाप्तविद्यालवो,
बालार्थं विदधामि दक्षविजयः स्याद्यन्तरत्नाकरम् ॥ १४ ॥

समासादिते हि तीर्थंकरदेवोपवर्णितदौर्लभ्ये मनुष्यत्वे फलवता भाव्यम् । फलं च मानवजन्मनो मुक्तेरधिगमः । स च हेयेषु निवृत्त्या उपादेयेषु प्रवृत्त्या । निरुक्ते निवृत्तिप्रवृत्ती तु तदुपदेशाधीने । उपदेशश्च वचनप्रयोगाधीनः । वचनप्रयोगश्च पदाधीनः "न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्ययः" इति वचनात् । पदं च विभक्त्यन्तम् । विभक्तिस्तु द्विधा, स्यादिरूपा त्यादिरूपा चेति । तत्र आद्या नाम्न आयाति, इतरा धातोः । तत्र नाम्नो या विभक्तिरायाति तदन्तस्य

(स्याद्यन्तस्य) नाम्नो रूपाण्यत्र प्रदर्श्यन्ते । त्याद्यन्तरूपाणि तु श्रीमद्गुरुपादै-र्धातुरत्नाकरे प्रदर्शितानि ॥

नामलक्षणं तु–"अधातुविभक्तिवाक्यमर्थवन्नाम" [१. १. २७] इति सूत्रोक्तम्, तदर्थश्च धातु-विभक्त्यन्त-वाक्यवर्जमर्थवच्छब्दरूपं नाम स्यादिति। स्यादिरूपा विभक्तिस्तु प्रथमादिभेदात्सप्तधा। तथाहि–"स्यौजसमौशस्टाभ्याभिस्ङेभ्यांभ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुपां त्रयी त्रयी प्रथमादिः" [१. १. १८] स्यादीनां प्रत्ययानां त्रयी त्रयी यथासंख्यं प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी सप्तमी च स्यादिति । तद्यथा—

## विभक्ति–प्रत्ययाः ।

| विभक्तिः | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्रथमा | सि | औ | जस् |
| द्वितीया | अम् | ,, | शस् |
| तृतीया | टा | भ्याम् | भिस् |
| चतुर्थी | ङे | ,, | भ्यस् |
| पञ्चमी | ङसि | ,, | ,, |
| षष्ठी | ङस् | ओस् | आम् |
| सप्तमी | ङि | ,, | सुप् |
| सम्बोधनं | सि | औ | जस् |

एषु प्रत्ययेषु "इ-ज-श-ट-ङ-पाश्चेतः" भवन्तीत्येतन्निर्मुक्ताः प्रत्ययाः प्रदर्श्यन्ते—

| विभक्तिः | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | स् | औ | अस् |
| द्वि० | अम् | ,, | ,, |
| तृ० | आ | भ्याम् | भिस् |
| च० | ए | ,, | भ्यस् |
| प० | अस् | ,, | ,, |
| ष० | अस् | ओस् | आम् |
| स० | इ | ,, | सु |
| सं० | स् | औ | अस् |

अथ का का विभक्तिः कस्मिन् कस्मिन्नर्थे आयातीति चेद् ग्रन्थगौरवादत्र किञ्चिदुच्यते ।

"निर्देशे प्रथमा प्रोक्ता, सैव चामन्त्रणेष्वपि ।
द्वितीया कर्मणि प्रोक्ता, तृतीया कर्तृकरणयोः ॥ १ ॥

ज्ञानज्ञाप्येऽङ्गविकारे, हेतावपि च इष्यते ।
तादर्थ्ये सम्प्रदाने च, चतुर्थी स्याच्च सर्वदा ॥ २ ॥
हेत्वपादानयोः पञ्चमी, षष्ठी तु कर्तृकर्मसम्बन्धे ।
अधिकरणनिमित्तसत्त्वे, सप्तमी स्याच्च विषयेऽपि ॥ ३ ॥
यदा कर्त्तरि प्रथमा स्यात्, कर्मणि द्वितीया तदा ।
यदा कर्त्तरि तृतीया स्यात्, कर्मणि प्रथमा तदा ॥ ४ ॥

प्रथमं तावत् प्रथमा विभक्तिः कस्मिन्नर्थे भवतीत्याजिज्ञासायां सोदाहरणमुच्यते—

## अथ प्रथमा ।

कर्त्तरि प्रयोगे कर्त्तरि प्रथमा भवति, यथा—जिनदासो जिनं पूजयति। कर्मणि प्रयोगे तु कर्मणि प्रथमा भवति, यथा—जिनदासेन पूज्यते जिनः। यद्वा, उक्ते कारके प्रथमा भवति, यथा—इन्द्रो जिनं नमति; अत्र ति—प्रत्ययेन कर्तुरुक्तत्वात् कर्तुः प्रथमा संजाता । एवम्—इन्द्रेण जिनो नम्यते, अत्रापि ते—प्रत्ययेन कर्मण उक्तत्वात् कर्मतः प्रथमा भवति । एवमन्यत्रापि स्वधिया परिभावनीयम् ॥

## अथ द्वितीया ।

द्वितीयाविभक्तिरनुक्ते कर्मणि भवति, यथा—पण्डितो जिनं स्तौति । पण्डितेन जिनः स्तूयत इत्यत्र तु कर्मण उक्तत्वात् द्वितीया न भवति । स्मरणार्थानां दयतेरीशश्च कर्मणि द्वितीया षष्ठी च भवतः । यथा—मातरं मातुर्वा स्मरति । सर्पिषः सर्पिर्वा दयते । लोकानां लोकान्वेष्टे । स्पृहधातोः कर्मणि द्वितीया चतुर्थी च भवतः, यथा—पुष्पेभ्यः पुष्पाणि वा स्पृहयति ॥

एवं समयादिशब्दैर्योगे गौणान्नाम्नो द्वितीया भवति, यथा—समया पर्वतं नदी । निकषा पर्वतं वनम् । हा देवदत्तं वर्धते व्याधिः । धिग् जाल्मम् । अन्तरा निषधं नीलं च विदेहाः । अन्तरेण गन्धमादनं माल्यवन्तं चोत्तराः कुरवः । अन्तरेण धर्मं सुखं न भवति। अति वृद्धं कुरून् महद्बलम्; कुर्वतिक्रमेण वृद्धमित्यर्थः । येन पश्चिमां गतः । तेन पश्चिमां नीतः । येन तेन इति अव्ययौ, न तु यत्तच्छब्दयोस्तृतीयायां रूपे ॥

अधोऽधो ग्रामं ग्रामाः । अध्यधि ग्रामं क्षेत्राणि । उपर्युपरि ग्रामं ग्रामाः । सर्वत उभयतोऽभितः परितो ग्रामं वनानि क्षेत्राणि वा ॥

लक्षणे वीप्स्ये इत्थंभूते चार्थे वर्तमानान्नाम्न अभि–प्रति–परि अनु इत्येतैर्योगे सति द्वितीया भवति, यथा–वृक्षमभि, प्रति, परि, अनु वा विद्योतते विद्युत् । वृक्षं वृक्षमभि, प्रति, परि, अनु वा सेकः । साधुर्मैत्रो मातरमभि, प्रति, परि, अनु वा ॥

भागिन्यर्थे वर्तमानान्नाम्नः प्रति–परि–अनुशब्दैर्योगे सति द्वितीया भवति, यथा–यदत्र मां प्रति, परि, अनु वा स्यात्तद्दीयताम् ॥

हेत्वर्थे सहार्थे वर्तमानान्नाम्नोऽनुशब्देन सह योगे सति द्वितीया भवति, यथा–जिनजन्मोत्सवमन्वागच्छन् सुराः । नदीमन्ववसिता पुरी ॥

उत्कृष्टेऽर्थे वर्तमानान्नाम्नोऽनूपाभ्यां योगे सति द्वितीया भवति, यथा–अनु सिद्धसेनं कवयः । अनु मल्लवादिनं तार्किकाः । अनु हेमचन्द्रं वैयाकरणाः । उपोमास्वातिं सङ्ग्रहीतारः । उप जिनभद्रगणिक्षमाश्रमणं व्याख्यातारः । उप यशोविजयोपाध्यायं नव्यतार्किकाः । तस्मादन्येहीना इत्यर्थः ॥

अत्यन्तसंयोगे सति कालेऽध्वनि च वर्त्तमानान्नाम्नो द्वितीया भवति, यथा–मासं गुडधानाः, कल्याणी, अधीते वा । क्रोशं पर्वतः, कुटिला नदी, अधीते वा ॥

क्रियाविशेषणवाचिनो नाम्नो द्वितीया भवति, यथा–स्तोकं पचति । सुखं स्थाता ॥

## अथ तृतीया ।

हेतौ कर्त्तरि करणे इत्थंभूतलक्षणे च वर्त्तमानान्नाम्नस्तृतीया स्यात्, यथा–धनेन कुलम् । चैत्रेण कृतम् । दात्रेण लुनाति । जटाभिस्तापसः ॥

सहार्थे गम्यमाने गौणान्नाम्नस्तृतीया भवति, यथा–पुत्रेण सहागतः । "एकेनाऽपि सुपुत्रेण, सिंही स्वपिति निर्भरम् । सहैव दशभिः पुत्रै–र्भारं वहति गर्दभी ॥ १ ॥"

यस्य भेदिनो भेदैस्तद्वतोऽर्थस्य निर्देशो भवति तद्वाचिनो नाम्नस्तृतीया स्यात्; यथा—अक्ष्णा काणः । पादेन खञ्जः । प्रकृत्या दर्शनीयः । गोत्रेण काश्यपः । जात्या ब्राह्मणः । वर्णेन गौरः । उरसा विशालः ॥

निषेधार्थैः कृतादिशब्दैर्युक्तान्नाम्नस्तृतीया भवति; यथा—कृतं तेन । किं गतेन । (कृतम्, भवतु, अलम्, किम्—एवंप्रकाराः कृतादयः) ॥

## अथ चतुर्थी ।

सम्प्रदाने वर्त्तमानाद् गौणान्नाम्नश्चतुर्थी भवति, यथा—शिष्याय धर्ममुपदिशति । द्विजाय गां ददाति ॥

तादर्थ्ये (किंचित् वस्तु सम्पादयितुं यत्प्रवृत्तं तत्तदर्थम्, तस्य भावे) सम्बन्धविशेषे द्योत्ये गौणान्नाम्नश्चतुर्थी स्यात्, यथा—यूपाय दारु। रन्धनाय स्थाली ॥

रुच्यर्थकधातुना योगे प्रेयेऽर्थे वर्त्तमानात्, क्लृप्यर्थकधातुना योगे विकारेऽर्थे वर्त्तमानात्, धारिणा धातुना च योगे उत्तमर्णेऽर्थे वर्त्तमानाच्च गौणान्नाम्नश्चतुर्थी भवति । यथा—जिनदत्ताय रोचते धर्मः । ब्राह्मणाय रोचते मोदकः। मूत्राय कल्पते यवागूः । मैत्राय शतं धारयति ॥

आकस्मिकनिमित्तेन ज्ञाप्येऽर्थे वर्त्तमानाद् गौणान्नाम्नश्चतुर्थी स्यात्, यथा "वाताय कपिला विद्यु-दातपायातिलोहिनी । पीता वर्षाय विज्ञेया, दुर्भिक्षाय सिता भवेत् ॥ १ ॥"

श्लाघ—ह्नु—स्था—शप—धातुभिर्युक्ताज्ज्ञाप्ये प्रयोज्ये वर्त्तमानाद् गौणान्नाम्नश्चतुर्थी भवति, यथा—मैत्राय श्लाघते ह्नुते तिष्ठते शपते वा ॥

क्रियायां क्रियार्थायामुपपदे 'तुम्' प्रत्ययो भवति, तदर्थे ये भाववाचिनो घञादयो भवन्ति, तदन्ताद् गौणान्नाम्नः स्वार्थे चतुर्थी स्यात्; यथा—पाकाय इज्यायै वा व्रजति ॥

गम्यस्य तुमो व्याप्ये वर्त्तमानाद् गौणान्नाम्नश्चतुर्थी भवति; यथा—एधेभ्यः फलेभ्यो वा व्रजति ॥

हितशब्देन सुखशब्देन च युक्ताद् गौणान्नाम्नश्चतुर्थी वा भवति, चतुर्थ्यभावपक्षे च षष्ठी । यथा–आतुराय आतुरस्य वा हितं सुखं वा । जिनदासाय जिनदासस्य वा हितं सुखं वा ॥

गतिः पादविहरणम्, तस्या अनाप्ते आप्ये वर्तमानाद् गौणान्नाम्नश्चतुर्थी विकल्पेन भवति, पक्षे द्वितीया च । यथा–ग्रामं ग्रामाय वा याति । विप्रनष्टः पन्थानं पथे वा याति ॥

हितार्थक–सुखार्थक–भद्रार्थक–आयुरर्थक–क्षेमार्थक–अर्थार्थक–शब्दैर्युक्ताद् गौणान्नाम्न आशिषि गम्यायां चतुर्थी वा भवति, पक्षे षष्ठी च । यथा-हितं पथ्यं वा जीवेभ्यो जीवानां वा भूयात् । सुखं शं शर्म्म वा प्रजाभ्यः प्रजानां वा भूयात् । भद्रमस्तु श्रीजिनशासनाय श्रीजिनशासनस्य वा । आयुष्यमस्तु चैत्राय चैत्रस्य वा । क्षेमं भूयात् कुशलं निरामयं वा श्रीसङ्घाय श्रीसङ्घस्य वा । अर्थः कार्यं प्रयोजनं वा भूयान्मैत्राय मैत्रस्य वा ॥

शक्तार्थकशब्दैः वषड्–नमः–स्वस्ति–स्वाहा–स्वधा इत्येतैश्च शब्दैर्युक्ताद् गौणान्नाम्नश्चतुर्थी भवति; यथा–शक्तः प्रभुर्वा मल्लो मल्लाय । वषडग्नये । नमोऽर्हद्भ्यः । स्वस्ति प्रजाभ्यः । इन्द्राय स्वाहा । स्वधा पितृभ्यः ॥

## अथ पञ्चमी

अपादानेऽर्थे वर्त्तमानाद् गौणान्नाम्नः पञ्चमी भवति; यथा–ग्रामाद् गोदोहाभ्यां वनेभ्यो वा आगच्छति॥

अवध्यर्थात् 'आङ्' शब्देन युक्ताद्गौणान्नाम्नः पञ्चमी भवति । अवधिर्मर्यादाऽभिविधिश्च । तेन विना मर्यादा, तेन सहाभिविधिः । यथा–आ पाटलीपुत्राद् वृष्टो मेघः । आ कुमारेभ्यो यशो गतं गौतमस्य ॥

अप्रयुज्यमानस्य यबन्तस्य कर्मवाचिन आधारवाचिनश्च गौणान्नाम्नः पञ्चमी स्यात् । यथा–प्रासादात्, आसनाद्वा प्रेक्षते । पर्वतो वह्निमान् धूमात् । नास्तीह घटोऽनुपलब्धेः । सर्वमनेकान्तात्मकं सत्त्वान्यथानुपपत्तेः ॥

प्रभृत्यर्थैरन्यार्थैर्दिक्शब्दैर्बहिराराादितरैश्च युक्ताद् गौणान्नाम्नः पञ्चमी भवति; यथा–ततः प्रभृतिः; ग्रीष्मादारभ्य । अन्यो भिन्नो वा मैत्रात्। ग्रामात् पूर्वस्यां दिशि वसति; उत्तरो विन्ध्यात् पारियात्रः; पश्चिमो रामाद् युधिष्ठिरः । बहिर् आराद् इतरो वा ग्रामात् ॥

आराद‍र्थैर्युक्तान्नाम्नः पञ्चमी विकल्पेन भवति, पक्षे च षष्ठी स्यात् । आराद्दूर-मन्तिकं च । दूरं विप्रकृष्टं वा ग्रामाद् ग्रामस्य वा । अन्तिकमभ्यासं वा ग्रामाद् ग्रामस्य वा ॥

## अथ षष्ठी

शेषेऽर्थे षष्ठी भवति । उक्तादन्यः शेषः । कर्म्मादिभ्योऽन्यस्तदविवक्षारूपः स्वस्वामिभावादिसम्बन्धविशेषः शेषस्तत्र षष्ठी भवति; यथा–राज्ञः पुरुषः । उपगोरपत्यम् । माषाणामश्नीयात् ॥

रि–रिष्टात्–स्तात्–अस्तात्–अस्–अतस्–आत्–एतत्प्रत्ययान्तैर्युक्ताद् गौणान्नाम्नः षष्ठी स्यात्; यथा–उपरि, उपरिष्टात्, परस्तात्, पुरस्तात्, पुरः, दक्षिणतः, उत्तराद्वा ग्रामस्य ॥

कृदन्तस्य कर्म्मणि षष्ठी स्यात्; यथा–अपां स्रष्टा । गवां दोहः ॥

कृदन्तस्य कर्त्तर्यपि षष्ठी भवति; यथा—भवत आसिका ॥

कृत्यप्रत्ययान्तस्य कर्त्तरि षष्ठी विकल्पेन भवति, पक्षे तृतीया च; यथा–त्वया तव वा कृत्यः कटः । ( घ्यण्तव्यानीययक्यपः कृत्याः )

तृन्प्रत्ययान्तस्य, उकारान्तप्रत्ययान्तस्य, अव्ययस्य, क्वसुप्रत्ययान्तस्य, कान-प्रत्ययान्तस्य, शानप्रत्ययान्तस्य, आनश्प्रत्ययान्तस्य, अतृश्प्रत्ययान्तस्य, शतृप्र-त्ययान्तस्य, ङिप्रत्ययान्तस्य, णकच्प्रत्ययान्तस्य, खलर्थकप्रत्ययान्तस्य च कर्मणि कर्तरि च षष्ठी न स्यात् । यथा–तृन्, वदिता जनापवादान् । उदन्तः, कन्याम-लङ्करिष्णुः, श्रद्धालुस्तत्त्वम् । अव्ययम्, कटं कृत्वा; ओदनं भोक्तुं व्रजति । क्वसुः, तत्त्वं विद्वान्; ओदनं पेचिवान् । कानः, कटं चक्राणः । शानः, मलयं पव-

मानः। आनश्, ओदनं पचमानः; चैत्रेण पच्यमानः। अतृश्, अधीयंस्तत्त्वार्थम्। शतृ, कटं कुर्वन्। ङि, परीषहान् सासहिः। णकच्, कटं कारको व्रजति। खलर्थः, ईषत्करः कटो भवता। सुज्ञानं तत्त्वं त्वया। शेष विवक्षायांतु षष्ठी भवत्येव॥

## अथ सप्तमी

अधिकरणेऽर्थे वर्त्तमानाद् गौणान्नाम्नः सप्तमी भवति। यथा–दिवि देवाः। कटे आस्ते। तिलेषु तैलम्। गङ्गायां घोषः। युद्धे सन्नह्यते। अङ्गुल्यग्रे करिशतम्। अधिकरणस्य षड्विधत्वादुदाहरणषट्कम्॥

स्वामिन्–ईश्वर–अधिपति–दायाद–साक्षिन्–प्रतिभू–प्रसूत इत्येतैर्युक्ताद् गौणान्नाम्नः सप्तमी विकल्पेन भवति, सप्तम्यभावे षष्ठी भवति; यथा–गोषु गवां वा स्वामी, ईश्वरः, अधिपतिः, दायादः, साक्षी, प्रतिभूः, प्रसूतो वा॥

व्याप्येन [कर्मणा] युक्ते हेतौ वर्त्तमानाद् गौणान्नाम्नः सप्तमी स्यात्; यथा– "चर्मणि द्वीपिनं हन्ति, दन्तयोर्हन्ति कुञ्जरम्। केशेषु चमरीं हन्ति, सीम्नि पुष्कलको हतः॥ १॥"

स्वे ईशितव्ये ईशे च स्वामिनि वर्तमानादधिना युक्ताद् गौणान्नाम्नः सप्तमी स्यात्; यथा–अधि मगधेषु श्रेणिकः। अधि श्रेणिके मगधाः॥

यस्य भावेनान्यो भावो लक्ष्यते तद्वाचिनो गौणान्नाम्नः सप्तमी स्यात्। भावः क्रिया। यथा–देवार्चनायां क्रियमाणायां गतः, कृतायामागतः। अत्र कालतः प्रसिद्धेन देवार्चनेनाप्रसिद्धं गमनं लक्ष्यते। गोषु दुह्यमानासु गतः॥

गम्यमानेनापि भावेन भावलक्षणे सप्तमी भवति; यथा–आम्रेषु कलायमात्रेषु गतः, पक्वेषु आगतः। अत्र जातेषु इति गम्यते॥

## अथ सम्बोधनम्

प्रसिद्धतत्सम्बन्धस्य किमप्याख्यातुमभिमुखीकरणमामन्त्रणम्, येन शब्देन आत्मा निरवधानः सावधानः क्रियते तदामन्त्रणमिति स्पष्टार्थः; तद्विषय आमन्त्र्यः। तद्वृत्तेर्नाम्नः प्रथमा स्याद्। यथा–हे देव॥

## । अथ विविधा विभक्तयः ।

कुतश्चिदवधेर्विवक्षितस्याध्वनोऽवसानमन्तः, यद्भावो भावलक्षणं तस्याऽध्ववाचिशब्दस्याध्वन एवाऽन्तवाचिना सह सामानाधिकरण्यं वा भवति। तद्विभक्तिस्तस्माद्भवतीत्यर्थः । कदा ? गते गम्येऽप्रयुज्यमाने सति । यथा— गवीधुमतः साङ्काश्यं चत्वारि योजनानि, चतुर्षु वा योजनेषु । एवं लोकमध्याल्लोकान्तमुपर्यधश्च सप्त रज्जूनामनन्ति, सप्तसु रज्जुषु वा ॥

यद्भावो भावलक्षणं तस्मिन् भाववति वर्त्तमानाद् गौणान्नाम्नोऽनादरे गम्यमाने षष्ठी विकल्पेन भवति, पक्षे च सप्तमी स्यात्। यथा–रुदतो लोकस्य रुदति लोके वा प्राव्राजीत् । क्रोशतो बन्धुवर्गस्य क्रोशति बन्धुवर्गे वा प्राव्राजीत् । रुदन्तं क्रोशन्तं वाऽनादृत्य प्रव्रज्यां दीक्षां गृहीतवानित्यर्थः ॥

जातिगुणक्रियादिभिः समुदायादेकदेशस्य बुद्ध्या पृथक्करणं निर्धारणम्, तस्मिन् गम्यमाने गौणान्नाम्नः षष्ठी सप्तमी च भवतः । कदा ? 'अविभागे' निर्धार्यमाणस्यैकदेशस्य समुदायेन सह कथंचिदैक्ये शब्दाद्गम्यमाने। यथा– क्षत्रियो नृणां नृषु वा शूरः । कृष्णा गवां गोषु वा बहुक्षीरा । धावन्तो यातां यात्सु वा शीघ्रतमाः । युधिष्ठिरः शूरतमः कुरूणां कुरुषु वा ॥

अल्पीयोवाचिना अधिकशब्देन योगे भूयोवाचिनो गौणान्नाम्नः सप्तमी–पञ्चम्यौ भवतः । यथा–अधिको द्रोणः खार्यां खार्या वा ॥

भूयोवाचिनाऽधिकशब्देन युक्तादल्पीयोवाचकाद् गौणान्नाम्नस्तृतीया भवति, यथा–अधिका खारी द्रोणेन ॥

पृथग्नानाशब्दाभ्यां युक्ताद् गौणान्नाम्नः पञ्चमी तृतीया च भवतः, यथा– पृथग्मैत्रात् मैत्रेण वा । नाना चैत्रात् चैत्रेण वा ॥

ऋतेशब्देन युक्ताद् गौणान्नाम्नो द्वितीया पञ्चमी च भवति । 'ऋते' इति वर्जनार्थकमव्ययम् । ऋते धर्मं धर्माद्वा कुतः सुखम् ? । नह्यङ्गं विक्रियते रोगं रोगाद्वा ऋते ॥

विनाशब्देन युक्ताद् गौणान्नाम्नो द्वितीया पञ्चमी तृतीया च भवन्ति यथा–विना वातं वातात् वातेन वा ॥

तुल्यार्थैर्युक्ताद् गौणान्नाम्नस्तृतीयाषष्ठ्यौ स्याताम्; यथा–मात्रा मातुर्वा तुल्यः समो वा ॥

हेत्वर्थैः शब्दैर्युक्तात् प्रत्यासत्तेस्तैरेव समानाधिकरणाद् गौणान्नाम्नस्तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तम्यो भवन्ति । हेतुर्निमित्तं कारणमिति पर्यायाः । यथा–धनेन हेतुना, धनाय हेतवे, धनाद्धेतोः, धनस्य हेतोः, धने हेतौ वा वसति । एवं निमित्तादिभिरपि ॥

हेत्वर्थैर्युक्तात् प्रत्यासत्तेस्तत्समानाधिकरणात् सर्वादेर्गौणान्नाम्नः सर्वा विभक्तयो भवन्ति । यथा—को हेतुः, कं हेतुम्, केन हेतुना, कस्मै हेतवे, कस्माद्धेतोः, कस्य हेतोः, कस्मिन् हेतौ वा याति मैत्रः ॥

असत्त्ववाचिनो दूरार्थादन्तिकार्थाच्च टा–ङसि–ङि–अम् इत्येते प्रत्ययाः स्युः । यथा–दूरेण दूरात् दूरे दूरं वा ग्रामस्य ग्रामाद्वा वसति । एवं विप्रकृष्टेनेत्यादि । अन्तिकेन अन्तिकात् अन्तिके अन्तिकं वा ग्रामस्य ग्रामाद्वा वसति । एवमभ्यासेनेत्यादि ॥

जातेरभिधानेऽएकोऽर्थो जातिलक्षणः संख्यावाचिविशेषणरहितो बहुवद्विकल्पेन भवति । यथा–सम्पन्ना यवाः, सम्पन्नो यवः ॥

गौरवार्हेऽर्थे वर्त्तमानस्य शब्दस्य द्वावेकश्चार्थौ बहुवद्विकल्पेन भवति । यथा–युवां गुरू, यूयं गुरवः । एष मे पिता, एते मे पितरः ॥

## विशेषार्थिना तु कारकप्रकरणमवलोकनीयम् ॥

नाम त्रिविधं–पुँल्लिङ्गस्त्रीलिङ्गनपुंसकलिङ्गभेदात् । अयमियमिदमिति यतस्तत् पुमान् स्त्री नपुंसकमिति लिङ्गम् । तच्चार्थधर्म इत्येके शब्दधर्म इत्यन्ये । उभयथाऽपि न दोषः । प्रत्येकं नाम केवलस्वर–स्वरान्त–व्यञ्जनान्तभेदात् त्रिविधम् । तत्रादौ केवलस्वरप्रकरणं निरूप्यते ॥

# ॥ अथ केवलस्वरप्रकरणम् ॥

## ॥ अथ पूर्वं तावच्चतुर्दशानामपि स्वराणां त्रिष्वपि लिङ्गेषु यथासम्भवं रूपाणि प्रदर्श्यन्ते ॥

### (१) पुँल्लिङ्गः 'अ' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अः | औ | आः |
| द्वि० | अम् | " | आन् |
| तृ० | एन | आभ्याम् | ऐः |
| च० | आय | " | एभ्यः |
| प० | आत् / आद् | " | " |
| ष० | अस्य | अयोः | आनाम् |
| स० | ए | " | एषु |
| सं० | हे अ | हे औ | हे आः |

अशब्दस्य स्त्रियाम्, "आत्" [२. ४. १८] इत्याप्प्रत्यये सति 'आ' इति स्वरूपं संजायते । एवं "धवाद्योगा०" [२, ४, ५९] इत्यादिना ङीप्रत्यये 'ई' इति स्वरूपं भवति । एतद्रूपाणि 'आ' शब्दे 'ई' शब्दे च प्रदर्शयिष्यन्ते ॥

### (२) नपुंसकलिङ्गः 'अ' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अम् | ए | आनि |
| द्वि० | " | " | " |
| सं० | हे अ | हे ए | हे आनि |

शेषं पुंवद्बोध्यम् ॥

### (३) पुँल्लिङ्गः 'आ' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आः | औ | आः |
| द्वि० | आम् | " | अः |
| तृ० | आ | आभ्याम् | आभिः |
| च० | ए | " | आभ्यः |
| प० | अः | " | " |
| ष० | " | ओः | आम् |
| स० | इ | " | आसु |
| सं० | हे आः | हे औ | हे आः |

### (४) स्त्रीलिङ्गः 'आ' शब्दः ।

अस्यरूपाणि (३) पुंवज्ज्ञेयानि॥

## (५) आबन्तः स्त्रीलिङ्गः 'आ' शब्दः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आ | ए | आः |
| द्वि० | आम् | ,, | ,, |
| तृ० | अया | आभ्याम् | आभिः |
| च० | आयै | ,, | आभ्यः |
| प० | आयाः | ,, | ,, |
| ष० | ,, | अयोः | आनाम् |
| स० | आयाम् | ,, | आसु |
| सं० | हे ए | हे ए | हे आः |

'आ' शब्दस्य नपुंसकलिङ्गे रूपाणि (२) अशब्दवद्भवन्ति "क्लीबे" [ २-४-९७ ] इत्यनेन ह्रस्वत्वात्॥

## (६) पुँल्लिङ्गः 'इ' शब्दः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | इः | ई | अयः |
| द्वि० | इम् | ,, | ईन् |
| तृ० | इना | इभ्याम् | इभिः |
| च० | अये | ,, | इभ्यः |
| प० | एः | ,, | ,, |
| ष० | ,, | योः | ईनाम् |
| स० | औ | ,, | इषु |
| सं० | हे ए | हे ई | हे अयः |

## (७) स्त्रीलिङ्गः 'इ' शब्दः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | इः | ई | अयः |
| द्वि० | इम् | ,, | ईः |
| तृ० | या | इभ्याम् | इभिः |
| च० | यै / अये | ,, | इभ्यः |
| प० | याः / एः | ,, | ,, |
| ष० | याः / एः | योः | ईनाम् |
| स० | याम् / औ | ,, | इषु |
| सं० | हे ए | हे ई | हे अयः |

अस्माच्छब्दात् "इतोऽक्त्यर्थात्" [ २-४-३२ ] इत्यनेन स्त्रियां ङी-प्रत्ययो विकल्पेन भवति। अतः पक्षे ङीप्रत्ययभवनात् 'ई' इति शब्दः संजायते। तद्रूपाणि तु दीर्घेकार-शब्दे प्रदर्शयिष्यन्ते॥

## (८) नपुंसकलिङ्गः 'इ' शब्दः॥

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | इ | इनी | ईनि |
| द्वि० | ,, | ,, | ,, |
| तृ० | इना / या | इभ्याम् | इभिः |

| | | | |
|---|---|---|---|
| च० | इने<br>ये | ईभ्याम् | इभ्यः |
| प० | इनः<br>यः | ” | ” |
| ष० | इनः<br>यः | इनोः<br>योः | ईनाम्<br>याम् |
| स० | इनि<br>यि | इनोः<br>योः | इषु |
| सं० | हे ए<br>हे इ | हे इनी | हे ईनि |

अत्र "वान्यतः पुमांष्टादौ स्वरे" [१. ४. ६२] इति सूत्रेण यो नाम्यन्तः शब्दो विशेष्यवशान्नपुंसकः स टादौ स्वरे परे पुंवद्वा भवति। यथा पुंसि नागमह्रस्वौ न भवतस्तथाऽत्रापि न भवत इत्यर्थः। तेन तृतीयैकवचनादारभ्य स्वरादिषु प्रत्ययेषु परेषु पक्षे पुंवद्रूपाणि भवन्तीति भावः॥

## (९) पुँल्लिङ्गः 'ई' शब्दः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | ईः | यौ | यः |
| द्वि० | ईम् | ” | ईन् |
| तृ० | या | ईभ्याम् | ईभिः |
| च० | ये | ईभ्याम् | ईभ्यः |
| प० | यः | ” | ” |
| ष० | ” | योः | याम् |
| सं० | यि | ” | ईषु |
| सं० | हे ईः | हे यौ | हे यः |

## (१०) स्त्रीलिङ्गः 'ई' शब्दः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | ईः | यौ | यः |
| द्वि० | ईम् | ” | ईः |

शेषं [९] पुंवत् ॥

## (११) ङीप्रत्ययान्तः स्त्रीलिङ्गः 'ई' शब्दः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | ई | यौ | यः |
| द्वि० | ईम् | ” | ईः |
| तृ० | या | ईभ्याम् | ईभिः |
| च० | यै | ” | ईभ्यः |
| प० | याः | ” | ” |
| ष० | ” | योः | ईनाम् |
| स० | याम् | ” | ईषु |
| सं० | हे इ | हे यौ | हे यः |

अशब्दात् "धवाद्योगा०" [२. ४. ५९] इत्यादिना ङीप्रत्यये, इशब्दात् "इतोऽक्त्यर्थाद्" [२.४.३२] इति ङीप्रत्यये वा अस्य शब्दस्य ङ्यन्तत्वम् ॥

क्लीबे 'ई' शब्दस्य रूपाणि (३) इशब्दवद्भवन्ति "क्लीबे" [२. ४. ९७] इत्यनेन ह्रस्वत्वात् ॥

## (१२) पुँल्लिङ्गः 'उ' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | उः | ऊ | अवः |
| द्वि० | उम् | ,, | ऊन् |
| तृ० | उना | उभ्याम् | उभिः |
| च० | अवे | ,, | उभ्यः |
| प० | ओः | ,, | ,, |
| ष० | ,, | वोः | ऊनाम् |
| स० | औ | ,, | उषु |
| सं० | हे ओ | हे ऊ | हे अवः |

## (१३) स्त्रीलिङ्गः 'उ' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | उः | ऊ | अवः |
| द्वि० | उम् | ,, | ऊः |
| तृ० | वा | उभ्याम् | उभिः |
| च० | वै / अवे | ,, | उभ्यः |
| प० | वाः / ओः | ,, | ,, |
| ष० | वाः / ओः | वोः | ऊनाम् |
| स० | वाम् / औ | ,, | उषु |
| सं० | हे ओ | हे ऊ | हे अवः |

## (१४) नपुंसकलिङ्गः 'उ' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | उ | उनी | ऊनि |
| द्वि० | ,, | ,, | ,, |
| तृ० | उना / वा | उभ्याम् | उभिः |
| च० | उने / वे | ,, | उभ्यः |
| प० | उनः / वः | ,, | ,, |
| ष० | उनः / वः | उनोः / वोः | ऊनाम् / वाम् |
| स० | उनि / वि | उनोः / वोः | उषु |
| सं० | हे ओ / हे उ | हे उनी | हे ऊनि |

अत्र "वान्यतः पुमांष्टादौ स्वरे" [१. ४. ६२] इत्यनेन विशेष्यवशान्नपुंसको नाम्यन्तष्टादौ स्वरे परे पुंवद्विकल्पेन भवति। तेन तृतीयैकवचनादारभ्य स्वरादिषु प्रत्ययेषु परेषु, पक्षे पुंवद्रूपाणि भवन्ति ॥

## (१५) पुँल्लिङ्गः 'ऊ' शब्दः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | ऊः | वौ | वः |
| द्वि० | ऊम् | ,, | ऊन् |
| तृ० | वा | ऊभ्याम् | ऊभिः |
| च० | वे | ,, | ऊभ्यः |
| प० | वः | ,, | ,, |
| ष० | ,, | वोः | वाम् |
| स० | वि | ,, | ऊषु |
| सं० | हे ऊः | हे वौ | हे वः |

## (१६) स्त्रीलिङ्गः 'ऊ' शब्दः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | ऊः | वौ | वः |
| द्वि० | ऊम् | ,, | ऊः |

शेषं (१५) पुंवत् ॥

नपुंसके ऊशब्दस्य रूपाणि (१४) उशब्दवद्भवन्ति "क्लीबे" [२. ४. ९७] इति सूत्रेण ह्रस्वत्वात् ॥

## (१७) पुँल्लिङ्गः 'ॠ' शब्दः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आ | अरौ | अरः |
| द्वि० | अरम् | ,, | ॠन् |
| तृ० | रा | ॠभ्याम् | ॠभिः |
| च० | रे | ,, | ॠभ्यः |
| प० | उः | ,, | ,, |
| ष० | ,, | रोः | ॠणाम् |
| स० | अरि | ,, | ॠषु |
| सं० | हे अः | हे अरौ | हे अरः |

## (१८) स्त्रीलिङ्गः 'ॠ' शब्दः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आ | अरौ | अरः |
| द्वि० | अरम् | ,, | ॠः |
| तृ० | रा | ॠभ्याम् | ॠभिः |

शेषाणि रूपाणि(१७)पुंवद्बोध्यानि॥

अत्र "स्त्रियां नृतोऽस्वस्रादेर्ङीः" [ २. ४. १. ] इति ङीप्रत्ययो न विहितः, ऋकारान्तत्वाभावात् । न च 'व्यपदेशिवदेकस्मिन्' इति न्यायेन ऋकारान्तत्वमस्तीति वाच्यम्, न्यायस्यास्यानित्यत्वात् । ननु अत्रानित्यत्वाश्रयणे किं बीजमिति चेत्, उच्यते—'ऋ देवमातरि' इति कोशवचनम्; इतरथा 'री देवमातरि' इत्येव प्रतिपादयेत् ।

यद्वा 'व्यपदेशिवदेकस्मिन्' इति न्यायाभ्युपगमे तु ङीप्रत्यये 'री' इति प्रकृतिं विधाय, वक्ष्यमाण—नदीशब्दवद्रूपाणि वाच्यानि ।

कोशकारेण लाघवार्थमितरार्थ प्रतिपादने सोऽप्यर्थोऽभिहितः ॥

## (१९) नपुंसकलिङ्गः 'ऋ' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | ऋ | ऋणी | ॠणि |
| द्वि० | ,, | ,, | ,, |
| तृ० | ऋणा | ऋभ्याम् | ऋभिः |
| च० | ऋणे | ,, | ऋभ्यः |
| प० | ऋणः | ,, | ,, |
| ष० | ऋणः | ऋणोः | ॠणाम् |
| स० | ऋणि | ,, | ऋषु |
| सं० | हे ऋ / हे अः | हे ऋणी | हे ॠणि |

## (२०) पुँल्लिङ्गः 'ॠ' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | ॠः | रौ | रः |
| द्वि० | ॠम् | ,, | ॠन् |
| तृ० | रा | ॠभ्याम् | ॠभिः |
| च० | रे | ,, | ॠभ्यः |
| प० | रः | ,, | ,, |
| ष० | ,, | रोः | राम् |
| स० | रि | ,, | ॠषु |
| सं० | हे ॠः | हे रौ | हे रः |

## (२१) स्त्रीलिङ्गः 'ॠ' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | ॠः | रौ | रः |
| द्वि० | ॠम् | ,, | ॠः |

शेषं (२०) पुंवत् ॥

'ऋ' शब्दस्य नपुंसकलिङ्गे रूपाणि (१९) ऋशब्दवद्भवन्ति " क्लीबे " [ २. ४. [illegible] ], इति सूत्रेण ह्रस्वविधानात् ॥

## (२२) पुँल्लिङ्गः 'लृ' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आ | अलौ | अलः |
| द्वि० | अलम् | ,, | लॄन् |
| तृ० | ला | लृभ्याम् | लृभिः |
| च० | ले | ,, | लृभ्यः |
| प० | उल् | ,, | ,, |
| ष० | ,, | लोः | लॄनाम् |
| स० | अलि | ,, | लृषु |
| सं० | हे अल् | हे अलौ | हे अलः |

"ऋत्कार्यम् लृकारेऽपि" इति न्यायात्—लृशब्दस्याऽपि ऋत्कार्यं विहितमिति भावनीयम् । एवं "ऋफिडादीनां डश्चलः" [२.३.१०४] इत्यनेन लत्वमपि ॥

## (२३) स्त्रीलिङ्गः 'लृ' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आ | अलौ | अलः |
| द्वि० | अलम् | ,, | लॄः |
| तृ० | ला | लृभ्याम् | लृभिः |

शेषाणि रूपाणि (२२) पुंवद्वसेयानि ॥

## (२४) नपुंसकलिङ्गः 'लृ' शब्दः ।

| वि० | एकव० | द्विवव० | बहुवं० |
|---|---|---|---|
| प्र० | लृ | लृनी | लॄनि |
| द्वि० | ,, | ,, | ,, |
| तृ० | लृना<br>ला | लृभ्याम् | लृभिः |
| च० | लृने<br>ले | ,, | लृभ्यः |
| प० | लृनः<br>लः | ,, | ,, |
| ष० | लृनः<br>लः | लृनो<br>लोः | लॄनाम्<br>लाम् |
| स० | लृनि<br>लि | लृनोः<br>लोः | लृषु |
| सं० | हे लृ<br>हे अल् | हे लृनी | हे लॄनि |

## (२५) पुँल्लिङ्गः 'ॡ' शब्दः ।

| वि॰ | एकव॰ | द्विव॰ | बहुव॰ |
|---|---|---|---|
| प्र॰ | ॡः | लौ | लः |
| द्वि॰ | ॡम् | ,, | ॡन् |
| तृ॰ | ला | ॡभ्याम् | ॡभिः |
| च॰ | ले | ,, | ॡभ्यः |
| पं॰ | लः | ,, | ,, |
| ष॰ | ,, | लोः | लाम् |
| स॰ | लि | ,, | ॡषु |
| सं॰ | हे ॡ | हे लौ | हे लः |

## (२६) स्त्रीलिङ्गः 'ॡ' शब्दः ।

| वि॰ | एकव॰ | द्विव॰ | बहुव॰ |
|---|---|---|---|
| प्र॰ | लॄः | लौ | लः |
| द्वि॰ | लॄम् | ,, | लॄः |

शेषं (२५) पुंवत् ॥

'ॡ' शब्दस्य क्लीबे रूपाणि (२४) ऌशब्दवद्भवन्ति, "क्लीबे" [२. ४. ९७] इत्यनेन ह्रस्वत्वात् ॥

## (२७) पुँल्लिङ्गः 'ए' शब्दः ।

| वि॰ | एकव॰ | द्विव॰ | बहुव॰ |
|---|---|---|---|
| प्र॰ | एः | अयौ | अयः |
| द्वि॰ | अयम् | अयौ | अयः |
| तृ॰ | अया | एभ्याम् | एभिः |
| च॰ | अये | ,, | एभ्यः |
| प॰ | एः | ,, | ,, |
| ष॰ | ,, | अयोः | अयाम् |
| स॰ | अयि | ,, | एषु |
| सं॰ | हे ए | हे अयौ | हे अयः |

## (२८) स्त्रीलिङ्गः 'ए' शब्दः ।

अस्य रूपाणि (२७) पुंवद्बोध्यानि ॥

## (२९) नपुंसकलिङ्गः 'ए' [इ] शब्दः

| वि॰ | एकव॰ | द्विव॰ | बहुव॰ |
|---|---|---|---|
| प्र॰ | इ | इनी | इनि |
| द्वि॰ | ,, | ,, | ,, |
| तृ॰ | इना / अया | इभ्याम् | इभिः |
| च॰ | इने / अये | ,, | इभ्यः |
| प॰ | इनः / एः | ,, | ,, |
| ष॰ | इनः / एः | इनोः / अयोः | इनाम् / अयाम् |

| | | | |
|---|---|---|---|
| स० | इनि / अयि | इनोः / अयोः | इषु |
| सं० | हे ए / हे इ | हे इनी | हे ईनि |

## (३०) पुँल्लिङ्गः 'ऐ' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | ऐः | आयौ | आयः |
| द्वि० | आयम् | ,, | ,, |
| तृ० | आया | ऐभ्याम् | ऐभिः |
| च० | आये | ,, | ऐभ्यः |
| प० | आयः | ,, | ,, |
| ष० | ,, | आयोः | आयाम् |
| स० | आयि | ,, | ऐषु |
| सं० | हे ऐः | हे आयौ | हे आयः |

## (३१) स्त्रीलिङ्गः 'ऐ' शब्दः ।

अस्याऽपि रूपाणि (३०) पुंवद्भावनीयानि ॥

## (३२) नपुंसकलिङ्गः 'ऐ' (इ) शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | इ | इनी | ईनि |
| द्वि० | ,, | ,, | ,, |
| तृ० | इना / आया | इभ्याम् | इभिः |
| च० | इने / आये | ,, | इभ्यः |
| प० | इनः / आयः | ,, | ,, |
| ष० | इनः / आयः | इनोः / आयोः | ईनाम् / आयाम् |
| स० | इनि / आयि | इनोः / आयोः | इषु |
| सं० | हे इ / हे ए | हे इनी | हे ईनि |

## (३३) पुँल्लिङ्गः 'ओ' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | औः | आवौ | आवः |
| द्वि० | आम् | ,, | आः |
| तृ० | अवा | ओभ्याम् | ओभिः |
| च० | अवे | ,, | ओभ्यः |
| प० | ओः | ,, | ,, |
| ष० | ,, | आवोः | अवाम् |
| स० | अवि | ,, | ओषु |
| सं० | हे औः | हे आवौ | हे आवः |

## (३४) स्त्रीलिङ्गः 'ओ' शब्दः ।

अत्र सर्वाण्यपि रूपाणि ( ३३ ) पुंवद्वाच्यानि ॥

## (३५) नपुंसकलिङ्गः 'ओ' (उ) शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | उ | उनी | ऊनि |
| द्वि० | ,, | ,, | ,, |
| तृ० | उना / अवा | उभ्याम् | उभिः |
| च० | उने / अवे | ,, | उभ्यः |
| प० | उनः / ओः | ,, | ,, |
| ष० | उनः / ओः | उनोः / अवोः | ऊनाम् / अवाम् |
| स० | उनि / अवि | उनोः / अवोः | उषु |
| सं० | हे उ / हे ओ | हे उनी | हे ऊनि |

## (३६) पुँल्लिङ्गः 'औ' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | औः | आवौ | आवः |
| द्वि० | आवम् | ,, | ,, |
| तृ० | आवा | औभ्याम् | औभिः |
| च० | आवे | औभ्याम् | औभ्यः |
| प० | आवः | ,, | ,, |
| ष० | ,, | आवोः | आवाम् |
| स० | आवि | ,, | औषु |
| सं० | हे औः | हे आवौ | हे आवः |

## (३७) स्त्रीलिङ्गः 'औ' शब्दः ।

सर्वाण्यपि रूपाण्यत्र ( ३६ ) पुंवद्बोध्यानि ॥

## (३८) नपुंसकलिङ्गः 'औ' (उ) शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | उ | उनी | ऊनि |
| द्वि० | ,, | ,, | ,, |
| तृ० | उना / आवा | उभ्याम् | उभिः |
| च० | उने / आवे | ,, | उभ्यः |
| प० | उनः / आवः | ,, | ,, |
| ष० | उनः / आवः | उनोः / आवोः | ऊनाम् / आवाम् |
| स० | उनि / आवि | उनोः / आवोः | उषु |
| सं० | हे उ / हे ओ | हे उनी | हे ऊनि |

## ॥ केवलानां स्वराणां लिङ्गाद्याक्षेपपरिहारौ ॥

नन्वस्मिन् प्रकरणे चतुर्दशानामपि स्वराणां रूपाणि भवद्भिः प्रदर्शितानि, अपि तु तन्न युक्तं पश्यामः, यतः " चादयोऽसत्त्वे " [ १. ३. ३१. ] इति सूत्रेण चादिपाठादमीषामव्ययत्वेन लिङ्गसंख्यान्वयाभाव इति चेत्, सत्यम्, निरुक्तसूत्रेणाऽसत्त्वेऽर्थे वर्तमानानामेवाव्ययत्वं विधीयते, न तु द्रव्येऽर्थेऽपि । तथा च द्रव्येऽर्थे वर्तमानानाममीषां चतुर्दशानामपि स्वराणां लिङ्गसंख्यान्वययोग्यत्वेन निरुक्तरूपोपदर्शनं युक्ततरमेवेति गृहाण ॥

### । अ ।

ननु कोशे अशब्दस्य विष्णौ ब्रह्मणि चार्थे शक्तिः प्रतिपादिता, तत्र विष्णौ पुंस्त्वं, ब्रह्मणि च नपुंसकत्वमिति लिङ्गद्वय एवास्य रूपाणि भवितुमर्हन्ति. नतु स्त्रियामपीति चेत्, मैवम्, न हि केवलस्य कोशस्यैव शक्तिग्राहकत्वमपितु व्याकरणादेरपि, यदुक्तम्—

"शक्तिग्रहं व्याकरणोपमान-कोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद् विवृतेर्वदन्ति, सान्निध्यतः सिद्धपदस्य वृद्धाः॥१॥"इति

व्याकरणं च व्युत्पत्तिप्रतिपादनपरम्, व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययादिविभागेन प्रतिपाद्यन्ते शब्दा अनेनेति व्याकरणमित्यन्वर्थात् ॥ व्युत्पत्तिवैचित्र्याच्च लिङ्गत्रयमपि सम्भवति । तथाहि—'अट गतौ' 'अत सातत्यगमने' आभ्याम् अटति अतति वा स्वामिकुलादिकं या सा 'आ' । अत्र "क्वचित्" [ ५. १. १७१. ] इति डिति अप्रत्यये " डित्यन्त्यस्वरादेः " [ २. १. ११४ ] इत्यन्त्यस्वरादिलोपे 'अ' इति स्त्रीलिङ्गप्रकृतिः, ततः " आत् " [ २. ४. १८ ] इत्यापि 'आ' इति स्त्रीलिङ्गः शब्दः ॥

एवम्-अस्य विष्णोः, इयं स्त्री इति 'ई' लक्ष्मीरित्यर्थः । अत्र "तस्येदम् " [ ६. ३. १६० ] इतीदमर्थेऽणि, "अवर्णेवर्णस्य" [ ७. ४. ६८ ]

इत्यकारलोपे 'अ' इति स्त्रीलिङ्गप्रकृतिः ततः "अणञे०" [२. ४. २०] इति ङीप्रत्यये 'ई' इति स्त्रीलिङ्गशब्दः ।

यद्वा केनचित् पृष्टम्-क्वास्ति 'अः' विष्णुः?. समीपस्थः कश्चिद् विष्णुभार्यां लक्ष्मीं दृष्ट्वाऽभेदोपचारेणाह-इयम् 'ई' विष्णुरित्यर्थः । अत्र "धवाद्योगाद्०" [२. ४. ५९] इति ङीप्रत्यये "अस्य ङ्यां लुक्" [२. ४. ८६.] इत्यकारलुकि अप्रकृतिक 'ई' शब्दः । तथा च लिङ्गत्रयस्यापि सम्भवेन त्रिष्वपि लिङ्गेषु यानि रूपाणि दर्शितानि तानि युक्तान्येवेति । एव माकारादिष्वपि विज्ञेयम् ॥

## । आ ।

यद्यपि कोशे आशब्दस्य महेश्वरे पितामहे चार्थे शक्तिः प्रदर्शिता, तत्र च पुंस्त्वमेवास्ति, तथापि व्युत्पत्तिविशेषेण स्त्रीत्वं नपुंसकत्वमपि च सम्भवति । तथाहि-आ महेश्वरः, स इवाचरतीति आति, आतीति क्विपि 'आः' पार्वती-त्यर्थः, इति स्त्रीलिङ्गस्य 'आ' शब्दस्य सिद्धिः । यद्वा-'आप्लृट् व्याप्तौ' अत आप्नोति मोक्षादिकं या सा 'आ' । अत्र "क्वचित्" [५. १. १७१] इति डिति अप्रत्यये "डित्यन्त्य०" [२. १. ९४] इत्यन्त्यस्वरादिलोपे "आत्" [२. ४. १८] इत्यापि आबन्तस्त्रीलिङ्गस्य 'आ' शब्दस्य सिद्धिः ।

आ महेश्वरः, स इवाचरति यत् कुलं तद् आति, आतीति क्विपि 'आ' इति नपुंसकप्रकृतिः, ततः "क्लीबे" [२. ४. ९७] इति ह्रस्वत्वे 'अ' इति नपुंसकलिङ्गशब्दः ॥

## । इ ।

केचित् किल अस्य विष्णोरपत्यम् 'इः' इति इशब्दस्य कामदेवे पुंस्त्वेन स्त्रीत्वं क्लीबत्वं च न मन्यन्ते, तदपरे न क्षमन्ते, व्युत्पत्तिविशेषेण तयोरपि

सम्भवात् । तथाहि–यदा कामदेवभार्यायामभेदोपचारेण इशब्दः प्रयुज्यते तदा स्त्रीवृत्तिरयमवसेयः, तेन 'इ' इति स्त्रीलिङ्गशब्दसिद्धिः । 'वींक् प्रजनकान्त्यसनखादनेषु' इत्यत्र प्रश्लिष्ट 'ई' धातुः, ततः एतीति, यद्वा 'ईङ्च् गतौ' इत्यत ईयते प्राप्नोति दीक्षादिकं यत् कुलं तत् 'इ' । अत्र "क्विप्" [५. १. १४८] इति क्विपि तल्लुकि च 'ई' इति नपुंसकप्रकृतेः "क्लीबे" [२. ४. ९७] इति ह्रस्वत्वे 'इ' इति नपुंसकस्य सिद्धिः ॥

। ई ।

न च ईशब्दस्य कन्दर्पेऽर्थे पुंस्त्वेन लक्ष्म्यर्थे स्त्रीत्वेन च नपुंसकत्वाभाव इति वाच्यम्, उक्तपूर्वमेव यदुत–व्युत्पत्तिविशेषेण लिङ्गत्रयमपि सम्भवति । कलय क्लीबत्वमीशब्दस्य–'ईः' कन्दर्पः, स इवाचरतीति अयति कुलम्; अयतीति क्विपि 'ई' इति नपुंसकप्रकृतिः, ततः "क्लीबे" [ २. ४. ९७. ] इत्यनेन ह्रस्वत्वे 'इ' इति शब्दो भवति । स्त्रीलिङ्गे ईशब्दो द्विविधो भवति, ङीप्रत्ययान्तस्तद्भिन्नश्च । तत्र लक्ष्मीवाचकत्वे ङीप्रत्ययान्तत्वम् । तद्भिन्नत्वं तु 'ईङ्च् गतौ' अत ईयते प्राप्नोति मोक्षादिकं या सा 'ईः' अत्र क्विपि तल्लुकि च ङीप्रत्ययान्तभिन्नस्य 'ई' इति स्त्रीलिङ्गशब्दस्य सिद्धिः ॥

। उ ।

यद्यपि उशब्दस्य शम्भावर्थे पुंस्त्वेन कुण्डलिन्यामर्थे स्त्रीत्वेन च नपुंसकत्वाभावस्तथापि व्युत्पत्तिविशेषेणार्थविशेषे नपुंसकत्वमपि भवति, तद्यथा–'अव रक्षणादिषु' अतोऽवति रक्षति ब्रह्मचर्यादिकं यत् कुलं तत् 'उ' अत्र "क्विप्" [५. २. १४८.] इति क्विपि "मव्यविश्रिविज्वरित्वरेरुपान्त्येन" [४. १. १०९] इति ऊटि 'ऊ' इति प्रकृतिस्ततः "क्लीबे" [२. ४. ९७.] इति ह्रस्वत्वे कृते 'उ' इति नपुंसकलिङ्गप्रकृतिः सिद्ध्यति ॥

। ऊ ।

अस्य शब्दस्य उपर्युक्तव्युत्पत्त्या रक्षाकर्तर्यर्थे लिङ्गत्रयेऽपि शक्तिः, नवरं नपुंसके "क्लीबे" [२. ४. ९७.] इति ह्रस्वत्वं विधाय 'उ' शब्दमाश्रित्य रूपाणि वाच्यानि ॥

। ऋ ।

ननु ऋशब्दस्य स्वर्गार्थे पुंस्त्वं देवमातरि च स्त्रीत्वमिति लिङ्गद्वयेनैव भाव्यम् । तन्न, वक्षोवाचिनो दीर्घस्य ऋकारस्य नपुंसकत्वात् " क्लीबे " [ २. ४. ९७. ] इत्यनेन ह्रस्वत्वे कृते 'ऋ' इति नपुंसकप्रकृतिः सम्भवति ॥

। ॠ ।

ॠशब्दस्य भैरवेऽर्थे पुंस्त्वम् देवमातरि स्त्रीत्वम्, वक्षसि च नपुंसकत्वमिति लिङ्गत्रययोगः नवरं क्लीबे "क्लीबे" [२. ४. ९७.] इत्यनेन ह्रस्वत्वं विधाय ऋशब्दमाश्रित्य रूपाणि वाच्यानि ॥

। ऌ ।

ननु ऌशब्दस्य मायायां देवमातरि चार्थे स्त्रीत्वम्, नवमस्वरार्थे च पुंस्त्वमिति लिङ्गद्वयेनैव भाव्यमिति कथं नपुंसकत्वमिति चेत् सत्यम्, अपि तु व्युत्पत्तिविशेषेण तदपि भवति । तथाहि—ॡः महादेवः, स इवाचरतीति अलति कुलम्, अलतीति 'ऌ' । अत्र ऌशब्दात् क्विपि तल्लोपे पुनः क्विपि तल्लोपे "क्लीबे" [२. ४. ९७.] इति ह्रस्वत्वे च 'ऌ' इति नपुंसकलिङ्गसिद्धिः ॥

। ॡ ।

न च ॡशब्दस्य महादेवार्थे पुंस्त्वेन, कामधेनुमातरि स्त्रीत्वेन च नपुंसकत्वाभावः शङ्क्यः, व्युत्पत्तिविशेषेण तस्यापि सम्भवात् तथाहि—ॡरिवाचरतीति अलति कुलम्, अलतीति क्विपि " क्लीबे " [२. ४. ९७.] इति ह्रस्वत्वे 'ऌ' शब्दमाश्रित्य रूपाणि वाच्यानि ॥

## । ए ।

यद्यपि एशब्दस्य विष्णावर्थे पुंस्त्वं दृश्यते तथापि व्युत्पत्तिविशेषेण स्त्रीत्वं नपुंसकत्वञ्च परिभावनीयम् । तथाहि—एः महादेवः, स इव आचरति या स्त्री यत् कुलं वा सा तद्वा अयति, अयतीति क्विपि स्त्रियां 'एः' क्लीबे तु "क्लीबे" [२. ४. ९७.] इति ह्रस्वत्वे 'इ' इति स्वरूपं भवति ॥

## । ऐ ।

न च ऐशब्दस्य महेश्वरेऽर्थे वृत्त्या कथं स्त्रीत्वं क्लीबत्वं वा इति वाच्यम्, व्युत्पत्तिविशेषेण तयोरपि सत्त्वात् । तथाहि-ऐः महेश्वरः, स इवाचरतीति आयति स्त्री कुलं वा, आयतीति क्विपि 'ऐ' मूलप्रकृतिः, ततः स्त्रीत्वविवक्षायाम् 'ऐः', नपुंसकत्वविवक्षायां "क्लीबे" [२.४.९७.] इति ह्रस्वत्वे 'इ' प्रकृतिः ॥

## । ओ ।

ओशब्दस्य ब्रह्मवाचकत्वे यद्वा त्रयोदशस्वरवर्णवाचकत्वे पुंस्त्वम्, व्युत्पत्ति-विशेषेण च स्त्रीत्वं नपुंसकत्वं चावसेयम् । व्युत्पत्तिश्चेयम्-औः ब्रह्मा स इ-वाचरतीति अवति स्त्री कुलं वा । अवतीति क्विपि 'ओ' इति मूलप्रकृतिः, ततः स्त्रीत्वविवक्षायाम् 'ओ' इत्याकारिका प्रकृतिरवतिष्ठते, नपुंसकत्वविवक्षा-यान्तु "क्लीबे" [२. ४. ९७.] इत्यनेन ह्रस्वत्वे 'उ' इति प्रकृतिर्भवति ॥

## । औ ।

यद्यपि औशब्दस्य अनन्तेऽर्थे पुंस्त्वेन, विश्वंभरायां स्त्रीत्वेन च नपुंसकत्वा-भावो दृश्यते तथापि व्युत्पत्तिविशेषेण नपुंसकत्वमपि भावनीयम् । तथाहि-औरिव (विश्वम्भरा इव)आचरतीति आवति कुलम् आवतीति क्विपि 'औ' इति नपुंसकप्रकृतिस्ततो ह्रस्वत्वे 'उ' इति भवति ॥

इति केवलानां स्वराणां लिङ्गादावाक्षेपपरिहारौ ॥

इति श्रीमत्तपोगणाम्बराम्बरमणि–शासनसम्राट्–स्वपरसमयपारावारपारीणाऽऽ–चार्यचक्रचूडामणि–कलिकालकल्पतरुकल्प–तीर्थरक्षैकदक्ष–सुगृहीतनामधेय–जगद्गुरु-परमपूज्य पूज्यपाद-परमोपकारि–भट्टारकाचार्यवर्य–श्रीमद्विजयनेमिसूरीश्वर–पट्टालङ्कार–व्याकरणवाचस्पति–कविरत्न–शास्त्रविशारद–विबुधशिरोमणि–परमपूज्य–परमोपकारि–श्रीमद्गुरुराजभट्टारकगणाचार्य-श्रीमद्विजयलावण्यसूरीश्वर-चरणारविन्दमिलिन्दायमान–विनेयमुनि–दक्षविजय—

विरचिते श्रीस्याद्यन्तरत्नाकरे
केवलस्वरप्रकरणम् ॥



॥ ॐ अर्हं श्री करहेटकपार्श्वनाथाय नमो नमः ॥

# ॥ अथ स्वरान्तप्रकरणम् ॥

## तत्र पूर्वं तावद्वर्णक्रमानुरोधेन—

## अकारान्तप्रकरणम् ।

### तत्राप्यादौ-एकाक्षरप्रकरणम्-आदिवर्णक्रमेण निरूप्यते ।

अत्र च पूर्वमर्थानुसारेण लिङ्गव्यवस्था विधीयते, यतो लिङ्गानुसारीणि रूपाणि । तदनु रूपातिदेशो विधास्यते ॥

### (३९) 'क' शब्दः ।

पुँल्लिङ्गः—ब्रह्मणि, वायौ, आत्मनि, यमे, दक्षप्रजापतौ, सूर्ये, अग्नौ, विष्णौ, काले, कामे, ग्रन्थौ, राजनि, मयूरे, देहे, मनसि, धने, प्रकाशे, शब्दे च । मुखे, शिरसि, जले रोगे च नपुंसकलिङ्गः । सुखेऽपि नपुं० इति कश्चित् ॥

### (४०) 'ख' शब्दः ।

पुं०—सूर्ये । इन्द्रिये, देहे, पुरे, शून्ये, अभ्रे, बिन्दौ, आकाशे, स्वर्गे, सुखे च नपुं० । स्वर्गे पुं०, सामान्ये नपुं० इति कश्चित् ॥

### (४१) 'ग' शब्दः ।

पुं०—गन्धर्वे, गणेशे, छन्दोग्रन्थोक्ते एकगुरुवर्णे च । गीते, गमने च नपुं० इत्यन्ये ॥

## (४२) 'घ' शब्दः ।

पुं०—घण्टायां, घर्घरशब्दे (घण्टाया नादे) च । मेघे, अधर्मेऽपि पुंस्त्वमस्येति केषाञ्चिन्मतम् ॥

## (४३) 'ङ' शब्दः ।

पुं०—विषये, विषयरक्षायां च । भैरवे देवे इत्यपि कश्चित् ॥

## (४४) 'च' शब्दः ।

पुं०—चन्द्रे, चौरे, कच्छपे च । दुर्जने, निर्बीजे च त्रिलिङ्गकः । सूर्येऽपि पुंस्त्वमस्येति कश्चित् ॥

## (४५) 'छ' शब्दः ।

पुं०—छेदने । छेदनकर्तरि, निर्मले, तरले च त्रिलिङ्गकः । गृहे नपुं० । चपलेऽपि पुंस्त्वमिति कश्चित् ॥

## (४६) 'ज' शब्दः ।

पुं०—शिवे, विष्णौ, जनके, वेगे, मुक्तौ, विषे, छन्दोग्रन्थोक्ते गुरुमध्यगे जगणाख्ये वर्णत्रये च । तेजसि, पिशाचे उत्पत्तौ च पुंस्त्वम्; जेतरि, वेगिते च त्रिलिङ्गत्वमस्येति केचित् । कश्चित्तु पुनः गायके, भोजने, जेतरि च पुंस्त्वं मन्यते ॥

## (४७) 'झ' शब्दः ।

पुं०—झञ्झावाते, सुरगुरौ, इन्द्रे, ध्वनौ च । अम्बुवर्षणे, दैत्यराजे, तारवायौ चेति केचित् । वेषेऽपि इति कश्चित् । नष्टद्रव्ये त्रिलिङ्गमन्ये प्राहुः ॥

## (४८) 'ञ' शब्दः ।

पुं०—वृषे, शुक्रे, कुटिलगतौ, गायने, घर्घरध्वनौ च । वाममतौ इत्यपि केचित् ॥

## (४९) 'ट' शब्दः ।

पुं०—वामने, पादे, निस्वने च । करङ्के, टङ्कारे च नपुं० । कश्चित्तु पृथिव्यां काके चामुं पठति ॥

## (५०) 'ठ' शब्दः ।

पुं०—मण्डले, चन्द्रबिम्बे, शून्ये, महेश्वरे, बृहद्ध्वनौ, जनसमूहे, शठे च । शून्येऽर्थेऽस्य त्रिलिङ्गत्वमिति कस्यचिन्मतम् ॥

## (५१) 'ड' शब्दः ।

पुं०—वाडवाग्नौ, शब्दे, चासपक्षिणि, शिवे, त्रासे च । कश्चित्तु भयङ्करेऽर्थे-डशब्दस्य त्रिलिङ्गत्वं कथयति ॥

## (५२) 'ढ' शब्दः ।

पुं०—ढक्कायां, शुनि, श्वलाङ्गूले, निर्गुणे, ध्वनौ च । निर्धनेऽपि कश्चित् ॥

## (५३) 'ण' शब्दः ।

पुं०—बिन्दुदेवे, भूषणे, गुणवर्जिते, जलस्थाने, निर्णये, ज्ञाने च । निश्चये, सूकरेऽपीत्यपरे ॥

## (५४) 'त' शब्दः ।

पुं०—चौरे, अनृते, पुच्छे, क्रोडे, म्लेच्छे, रत्ने, शृगालपुच्छे च । तरले पुण्ये च स्त्रीलिङ्गको नपुंसकलिङ्गकश्च ॥

## (५५) 'थ' शब्दः ।

पुं०—पर्वते, भयवारके, व्याधिभेदे, भयचिह्ने, भक्षणे च । रक्षणे, मङ्गले, भये च नपुं० । भयाद् रक्षणकर्त्तरि त्रिलिङ्गत्वमस्येति कस्यचिन्मतम् ॥

## (५६) 'द' शब्दः ।

पुं०—पर्वते, दत्ते, खण्डने च । भार्यायाम् स्त्री० । दातरि त्रिलिङ्गकः । मेघे दाने च पुंस्त्वमस्येति कश्चित् ॥

## (५७) 'ध' शब्दः ।

पुं०—धर्मे, कुबेरे, ब्रह्मणि च । धने नपुं० । मनौ इत्यत्र पुंस्त्वमिति कश्चित्॥

## (५८) 'न' शब्दः ।

पुं०—बन्धे, प्रस्तुते, रत्ने च । नायके, सुगते, बुद्ध्याम्, स्तुतौ, वृक्षे, स्वागते, बन्धौ, सूर्ये चेत्येतेष्वर्थेष्वपरे पठन्ति ॥

## (५९) 'प' शब्दः ।

पुं०—पवने, पातने, पर्णे, पाने चरित्रे च । कुबेरे, पश्चिमे, प्राचीत्यपरे ॥

## (६०) 'फ' शब्दः ।

पुं०—झञ्झावाते, वर्द्धके, जृम्भाविष्कारे, फलभागे च । रूक्षकथने, निष्फल-वाक्ये, फूत्कारे च नपुंसकलिङ्गकः । कफे, वारेऽर्थेचापि पुंस्त्वमस्येति कश्चित्॥

## (६१) 'ब' शब्दः ।

पुं०—सूचने, तन्तुसन्ताने, वपने, वरुणे, घटे, समुद्रे, योनौ, जले च । गमने स्त्री० । कश्चित्तु फले, वक्षःस्थले, गदायामित्येतेष्वर्थेष्वपि पुंसि पठति ॥

## (६२) 'भ' शब्दः ।

पुं०—शुक्राचार्ये भ्रमरे, भ्रान्तौ, छन्दोग्रन्थोक्ते आदिगुरुके अन्त्योपान्त्यलघुयुक्ते वर्णत्रिके च । नक्षत्रे, मेषादिराशौ, ग्रहे च नपुं० । कश्चित्तु भवनेऽर्थेऽपि पुंस्त्वमस्येति मन्यते ॥

## (६३) 'म' शब्दः ।

पुं०—चन्द्रे, शिवे, ब्रह्मणि, यमे, समये, मधुसूदने च । बन्धने इत्यपि कश्चित् ॥

## (६४) 'य' शब्दः ।

पुं०—वायौ, यशसि, योगे, गतौ, संयमे च । यातरि त्रिलिङ्गकः ।

## (६५) 'र' शब्दः ।

पुं०—वह्नौ, उग्रे, कामानले च । रामे, वायौ, भूमौ, धने, इन्द्रिये, इन्धने, रोगे चेत्येतेष्वर्थेष्वपि पुँस्त्वमस्येति कस्यचिन्मतत् ॥

## (६६) 'ल' शब्दः ।

पुं०—इन्द्रे । तन्त्रोक्ते भूमिदेवताके मन्त्रभेदे नपुं० । कान्तौ, आकाशे, भूमौ, भये, आह्लादे, वायौ, लवणे, दाने, आश्लेषे, अन्तःकरणे, प्रलये, साधने, मनसि, वरुणे, सान्त्वने चेत्येतेष्वर्थेष्वपि पुँस्त्वमस्येति केषाञ्चिन्मतम् ॥

## (६७) 'व' शब्दः ।

पुं०—वायौ, राहौ, मन्त्रणे, सान्त्वने, कल्याणे, बलवति, वसतौ, समुद्रे, व्याघ्रे, वसने, शालूके, (कुमुदादिमूले) वन्दने च । वरुणे पुं० नपुं० ॥

## (६८) 'श' शब्दः ।

पुं०—महादेवे, शस्त्रे च । मङ्गले नपुं० । कस्यचिन्मते तु सीमायाम्, हिंसायाम्, शयने च पुँस्त्वम्; सुखे तु नपुंसकत्वमवसेयम् ॥

## (६९) 'ष' शब्दः ।

पुं०—केशे, गर्भविमोचने मानवे च । सर्वे, श्रेष्ठे, विज्ञे च त्रि० । कश्चित्तु उपसर्गे, परोक्षेऽर्थेऽपि पुँस्त्वमस्येति कथयति ॥

## (७०) 'स' शब्दः ।

पुं०—विष्णौ, सर्पे, ईश्वरे, विहगे, सहार्थे, समानार्थे, छन्दःशास्त्रोक्तगणभेदे च । कोपेऽपि पुँस्त्वमस्येति कश्चित् ॥

## (७१) 'ह' शब्दः ।

पुं०—शिवे, जले, शून्ये, मङ्गले, आकाशे, रक्ते, धारणे, स्वर्गे, पापहरणे, चन्द्रे, सकोपवारणे, शुष्के च । कश्चित्तु हसितेऽप्यपि पठति ॥

## (७२) 'क्ष' शब्दः ।

पुं०—क्षेत्रे, वक्षःस्थले, शब्दशासने चेति कस्यचिन्मतम् ॥

## (७३) 'ज्ञ' शब्दः ।

पुं०—ब्रह्मणि, पण्डिते, सोमपुत्रे बुधे च ॥

एषां कादीनां ज्ञपर्यन्तानां पञ्चत्रिंशतः शब्दानां सर्वाणि रूपाणि यथासम्भवं पुँल्लिङ्गे वक्ष्यमाण 'जिन' शब्दवत्, स्त्रीलिङ्गे वक्ष्यमाण 'दया' शब्दवत्, नपुंसकलिङ्गे च वक्ष्यमाण 'दर्शन' शब्दवदवसेयानि । नवरं र–ष–क्ष–शब्दानां तृतीयैकवचने षष्ठीबहुवचने च यथासङ्ख्यं 'रेण, राणाम्; षेण, षाणाम्; क्षेण, क्षाणाम्' इति णत्वकृतविशेषः स्वधिया परिभावनीयः ॥

इति श्रीमत्तपोगणाम्बराम्बरमणि–शासनसम्राट्–स्वपरसमयपारावारपारीणाऽऽ–चार्यचक्रचूडामणि–कलिकालकल्पतरुकल्प–तीर्थरक्षैकदक्ष–सुगृहीतनामधेय–जगद्गुरु-परमपूज्य-पूज्यपाद-परमोपकारि–भट्टारकाचार्यवर्य–श्रीमद्विजयनेमिसूरीश्वर–पट्टालङ्कार–व्याकरणवाचस्पति–कविरत्न–शास्त्र-विशारद–विबुधशिरोमणि–परमपूज्य–परमोपकारि–श्रीमद्गुरुराजभट्टारकगणाचार्य–श्रीमद्विजयलावण्यसूरीश्वर–चरणारविन्दमिलिन्दायमान–विनेयमुनि–दक्षविजय–विचिते

**श्रीस्याद्यन्तरत्नाकरे—एकाक्षरप्रकरणम् ॥**

॥ ॐ अर्हं श्री जिनेन्द्राय नमो नमः ॥

# ॥ अथ अकारान्तप्रकरणम् ॥

अत्र पूर्वं तावत् पुँल्लिङ्गे द्वादश शब्दाः प्रदर्श्यन्ते ।

## (७४) अकारान्तः पुँल्लिङ्गः 'जिन' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | जिनः | जिनौ | जिनाः |
| द्वि० | जिनम् | ,, | जिनान् |
| तृ० | जिनेन | जिनाभ्याम् | जिनैः |
| च० | जिनाय | ,, | जिनेभ्यः |
| प० | जिनात् / जिनाद् | ,, | ,, |
| ष० | जिनस्य | जिनयोः | जिनानाम् |
| स० | जिने | ,, | जिनेषु |
| सं० | हे जिन | हे जिनौ | हे जिनाः |

एवम्—अजित, सम्भव, अभिनन्दन, वर्धमान, देव, कृष्ण, विरल, किरीट, कर्मठ–प्रमुखाः ॥

## (७५) अकारान्तः पुँल्लिङ्गः 'वीर' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | वीरः | वीरौ | वीराः |
| द्वि० | वीरम् | ,, | वीरान् |
| तृ० | वीरेण | वीराभ्याम् | वीरैः |
| च० | वीराय | ,, | वीरेभ्यः |
| प० | वीरात्-द् | ,, | ,, |
| ष० | वीरस्य | वीरयोः | वीराणाम् |
| स० | वीरे | ,, | वीरेषु |
| सं० | हे वीर | हे वीरौ | हे वीराः |

एवम्—चतुर, चन्द्र, राम, धीर, गम्भीर, शूर, सुर, कर, रेफ, धर्म, स्वर्ग–प्रमुखाः ॥

अत्र " रषृवर्णान्नोण एकपदेऽनन्त्यस्यालचटतवर्गशसान्तरे " [२. ३.

६३] इति सूत्रेण रेफषकारऋवर्णेभ्यः परस्याऽनन्त्यस्य नकारस्य रषृवर्णैरेवैकपदे वर्तमानस्य णो भवति, न चेन्निमित्तनिमित्तिनोरन्तरे लकार–चवर्ग–टवर्ग–तवर्ग–शकार–सकारा भवन्ति। शेषवर्णव्यवधानेऽपि नकारस्य णकारो भवतीति भावः। अनेन सूत्रेण 'वीर' शब्दस्य तृतीयैकवचने षष्ठीबहुवचने च नस्य णत्वप्रदर्शनार्थं पृथगुपादानम्। एवमुत्तरयोरपि ॥

## (७६) अकारान्तः पुँल्लिङ्गः

### + 'मोक्ष' शब्दः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | मोक्षः | मोक्षौ | मोक्षाः |
| द्वि० | मोक्षम् | ,, | मोक्षान् |
| तृ० | मोक्षेण | मोक्षाभ्याम् | मोक्षैः |
| च० | मोक्षाय | ,, | मोक्षेभ्यः |
| प० | मोक्षा–त्,द् | ,, | ,, |
| ष० | मोक्षस्य | मोक्षयोः | मोक्षाणाम् |
| स० | मोक्षे | ,, | मोक्षेषु |
| सं० | हे मोक्ष | हे मोक्षौ | हे मोक्षाः |

एवम्—अक्षय, अक्ष, यक्ष, दक्ष, पक्ष, ऋक्ष वृक्ष, ऋषभ, पुरुष, वृष–प्रमुखाः॥

+ अत्र षकारात् परस्य नस्य णत्वम्॥

## (७७) अकारान्तः पुँल्लिङ्गः

### ❀ 'नृप' शब्दः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | नृपः | नृपौ | नृपाः |
| द्वि० | नृपम् | ,, | नृपान् |
| तृ० | नृपेण | नृपाभ्याम् | नृपैः |
| च० | नृपाय | ,, | नृपेभ्यः |
| प० | नृपा–त्,द् | ,, | ,, |
| ष० | नृपस्य | नृपयोः | नृपाणाम् |
| स० | नृपे | ,, | नृपेषु |
| सं | हे नृप | हे नृपौ | हे नृपाः |

एवम्—कृप, मृग, वृक, नृग, सृग, गृध्र, भृङ्ग, शृङ्ग, जृम्भ–प्रमुखाः

❀ अत्र ऋकारात्परस्य नस्य णत्वम्॥

## अकारान्ताः पुँल्लिङ्गाः नित्यबहुवचनान्तास्त्रयः शब्दाः ।

(७८) 'दार' शब्दः
(दाराः कलत्रम्)

| | |
|---|---|
| प्र० | दाराः |
| द्वि० | दारान् |
| तृ० | दारैः |
| च० | दारेभ्यः |
| प० | ,, |
| ष० | दाराणाम् |
| स० | दारेषु |
| सं० | हे दाराः |

(७९) 'प्राण' शब्दः
(प्राणा असवो जीवितं च)

| | |
|---|---|
| प्र० | प्राणाः |
| द्वि० | प्राणान् |
| तृ० | प्राणैः |
| च० | प्राणेभ्यः |
| प० | ,, |
| ष० | प्राणानाम् |
| स० | प्राणेषु |
| सं० | हे प्राणाः |

(८०) 'वल्वज' शब्दः
(वल्वजाः प्राणाः)

| | |
|---|---|
| प्र० | वल्वजाः |
| द्वि० | वल्वजान् |
| तृ० | वल्वजैः |
| च० | वल्वजेभ्यः |
| प० | ,, |
| ष० | वल्वजानाम् |
| स० | वल्वजेषु |
| सं० | हे वल्वजाः |

"कोणेऽस्त्रश्वपके कोश-स्तलस्तालचपेटयोः ।
अनातोद्ये घनो भूम्नि, दारप्राणासुवल्वजाः ॥५॥"

इति लिङ्गानुशासनवचनादेषां पुंस्त्वं बहुवचनत्वं चावसेयम् ।

क्वचिदेषामेकत्वमपि । असुसाहचर्यात्तद्वाचिन एव प्राणस्य बहुत्वम् ॥

असुशब्दस्य नित्यबहुवचनान्तत्वेऽपि उकारान्तत्वात्तद्रूपाणि उकारान्तेषु शब्देषु प्रदर्शयिष्यन्ते ॥

---

## (८१) अकारान्तः पुँल्लिङ्गः 'मास' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | मासः | मासौ | मासाः |

| | | | |
|---|---|---|---|
| द्वि० | मासम् | मासौ | मासः, मासान् |
| तृ० | मासा, मासेन | माभ्याम्, मास्भ्याम्, माद्भ्याम्, मासाभ्याम् ❀ | माभिः, मास्भिः, माद्भिः, मासैः |
| च० | मासे, मासाय | माभ्याम्, मास्भ्याम्, माद्भ्याम्, मासाभ्याम् | माभ्यः, मास्भ्यः, माद्भ्यः, मासेभ्यः |
| प० | मासः, मासाद्, मासात् | माभ्याम्, मास्भ्याम्, माद्भ्याम्, मासाभ्याम् | माभ्यः, मास्भ्यः, माद्भ्यः, मासेभ्यः |
| ष० | मासः, मासस्य | मासोः, मासयोः | मासाम्, मासानाम् |
| स० | मासि, मासे | मासोः, मासयोः | मास्सु, माःसु, मात्सु, माथ्सु, मासेषु |
| सं० | हे मास | हे मासौ | हे मासाः |

❀'मास्+भ्याम्' इति स्थिते लघुन्यासकारवचनानुरोधेन 'माद्भ्याम्' 'मास्भ्याम्' इति रूपद्वयम् । बृहन्न्यास-(शब्दमहार्णवन्यास)तात्पर्यपर्यालोचनानुसारेण तु ' माभ्याम् ' इति आदेशाभावेच'**मासाभ्याम्**' इति च रूपं प्रदर्शितम् ॥

लघुन्यासकारवचनानीमानि-"मासशब्दस्य भ्यामि अनेनान्तलोपे ×असिद्धं बहिरङ्गम्०× इति अकारस्थानित्वेन "सो रुः" [२.१.७२] रुत्वाभावे "धुटस्तृतीयः" [ २. १. ७६ ] इति दत्वे तु न्यायाऽनित्यत्वाद् ' माद्भ्याम् ' इति मन्यते भाष्यकृत् , दुर्गस्तु ' मास्भ्याम् ' इति । स्वमते तु द्वयमपि भवति॥"

## लघुन्यासकारस्यायमभिप्रायः—

मासशब्दस्य भ्यामि परे "मासनिशाऽऽसनस्य शसादौ लुग्वा" [२.१.१००] इति सूत्रेण अकारलोपे 'मास्+भ्याम्' इति स्थिते "सो रुः" [२. १. ७२] इत्यनेन सकारस्थाने रुत्वं प्राप्नोति, अपि तु न भवति, परप्रत्ययापेक्षत्वेनाकारलोपस्य बहिरङ्गत्वात्। "सो रुः" [२. १. ७२] इति विधीयमानरुत्वस्य परानपेक्षत्वेन अन्तरङ्गत्वात्×असिद्धं बहिरङ्गमन्तरङ्गे× (अन्तरङ्गे कार्ये कर्त्तव्ये बहिरङ्गं कार्यमसिद्धं स्यात्) इति न्यायादन्तरङ्गे रुत्वे कर्त्तव्ये बहिरङ्गस्याकारलोपस्यासिद्धत्वेन पदान्तत्वाभावात् "सो रुः" [२. १. ७२] इति सूत्रं न प्रवर्त्तते। किन्तु "नाम सिदय्व्यञ्जने" [ १. १. २१. ] इति पदसंज्ञायां सत्यां "धुटस्तृतीयः" [२. १. ७६] इति दत्वे 'माद्भ्याम्' इति रूपसिद्धिः।

ननु, "धुटस्तृतीयः" [ २. १. ७६] इति दत्वस्यापि परानपेक्षत्वेनान्तरङ्गत्वात्तस्मिन्कर्त्तव्ये बहिरङ्गाऽकारलोपस्याऽसिद्धत्वेन पदान्तत्वाभावोऽत्रापि तदवस्थ एव। पदान्तत्वाभावे च कथं "धुटस्तृतीयः" [ २. १. ७६ ] इति सूत्रप्रवृत्तिरिति चेत् सत्यम्, न्यायस्यास्याऽनित्यत्वात् "सो रुः" [२. १. ७२] इत्यस्य प्रवृत्तौ×'असिद्धं बहिरङ्गमन्तरङ्गे'×इति न्यायः प्रवर्त्तते, "धुटस्तृतीयः" [ २. १. ७६ ] इत्यस्य प्रवृत्तौ तु न प्रवर्तते। तेन 'माद्भ्याम्' इति रूपं भवतीति भाष्यकृन्मतम्। यदा तु "धुटस्तृतीयः" [२. १, ७६] इत्यस्यापि प्रवृत्तौ×'असिद्धं बहिरङ्गमन्तरङ्गे'×इति न्यायः प्रवर्त्तते तदा 'मास्भ्याम्' इति रूपं भवतीति दुर्गमतम्। स्वमते रूपद्वयसाधनिका तु पर्यायेण निरुक्तमतद्वयादरणेनावसेया॥

"दन्तपादनासिकाहृदयासृग्यूषोदकदोर्यकृच्छकृतो दत्पन्नस्हृदसन्यूषन्नुदन्दोषन्यकन्छकन् वा" [ २. १. १०१ ] इति सूत्रसम्बन्धीनि बृहन्न्यासवचनानीमानि—

"ननु, ददाद्यादेशवत् पूर्वसूत्रेऽपि 'मास्' इत्यादिसमस्तादेशः कर्त्तुमुचितः। तथा च सति प्रकरणभेदोऽपि न स्यात् । अत एव पूर्वैः "पद्, दत्, नस्, मास्, हृद्, निश्, असन्, यूषन्, दोषन्, यकन्, शकन्, उदन्, आसन्" इति आदेशमात्रमेव कृतम्; प्रकृतिस्तु तत्रानुमितेति ।

सत्यम्, तत्रोपलक्षणभूतेन लुक्शब्देन लाघवार्थं लुगन्त आदेश उच्यते। अत एव वृत्तावुक्तम्–लुगन्तादेश इति। लुगन्तश्चासावादेशश्चेति तत्र प्रत्येतव्यम्। अन्तलोपे सति यादृशमेषां रूपं भवति तादृशा 'मास्, निश्, आसन्' इत्येवं रूपा आदेशास्तेन विधीयन्ते, न तु लुगिति ॥"

इत्येतस्य बृहन्न्यासपाठस्य पर्यालोचनायामिदमवबुध्यते—

"मासनिशासनस्य शसादौ लुग्वा" [२. १. १००] इत्यत्र प्रकरणभेद-परिहारार्थमवर्णलोपस्योपलक्षणत्वेन 'मास्, निश्, आसन्' इति आदेशा एव विधीयन्ते। अतः ×'असिद्धं बहिरङ्गमन्तरङ्गे'× इत्यस्य प्रवृत्त्यभावादनवकाशत्वेन "धुटस्तृतीयः" [२. १. ७६] इति बाधित्वा "सोरुः" [२. १. ७२] इत्य-नेन रुत्वे "अवर्णभोभगोऽघोर्लुगसन्धिः" [१. ३. २२.] इति रुलोपे 'माभ्याम्' इति रूपसिद्धिः ॥

अथ "मासनिशासनस्य शसादौ लुग् वा" [२. १. १००] इति सूत्रस्थानां मासादिशब्दानां ये मासादय आदेशाः, "दन्तपादनासिकाहृदयासृ-ग्यूषोदकदोर्यकृच्छकृतो दत्पन्नस्हृदसन्यूषन्नुदन्दोषन्यकञ्छकन् वा" [२. १. १०१] इति सूत्रस्थानां दन्तादिशब्दानां च ये ददादय आदेशास्ते छान्दसे प्रयोगे सर्वेऽपि भवितुमर्हन्ति। लौकिके तु प्रयोगे प्रविरलप्रयोगविषयत्वमस्तीति सर्वाणि रूपाणि न भवन्ति, तथापि रूपस्वरूपोपदर्शनाय सर्वाण्यपि रूपाण्यत्र प्रदर्शितानि ॥

कलिकालसर्वज्ञानां श्रीमतां हेमचन्द्रसूरीश्वराणां स्वोपज्ञ–शब्दमहार्णव-न्यासस्थानि प्रविरलप्रयोगविषयत्वप्रतिपादनपराणीमानि वचनानि—

"ननु पूर्वैश्छन्दोविषयत्वमेषामुक्तम्; न च छान्दसा भवद्भिर्व्युत्पाद्यन्ते, इति "मासनिशे०" त्यादि सूत्रद्वयमनर्थकम्। नैवम्। "अपोद्भे" [ २. १. ४. ] ( "अपोभिः।" पाणि० । ७. ४. ४८ ) इत्यत्र सूत्रे वार्त्तिककारेणोक्तम्—"*अपो भि मासश्छन्दसि*" "अपो भि" रित्यत्र मासश्छन्दसि उपसंख्यानं कर्त्तव्यम्। माद्भिरिष्ट्वा इन्द्रो वृत्रहा "पद्दन्नोमास्०" इति मासशब्दस्य यो 'मास्' आदेशस्तस्य छन्दस्येव विधानात् मासश्छन्दसीति दत्वविधौ छन्दोग्रहणं न कर्त्तव्यम्; तत् क्रियते भाषायामपि क्वचित् पदादयः प्रयुज्यन्ते इति ज्ञापनार्थम्। अत एव प्रविरलप्रयोगविषयत्वात् सर्वासु विभक्तिषु नोदाह्रियते ॥" इत्यलं प्रसङ्गेन ॥

## ( ८२ ) अकारान्तः पुँल्लिङ्गः 'दन्त' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | दन्तः | दन्तौ | दन्ताः |
| द्वि० | दन्तम् | ,, | दतः<br>दन्तान् |
| तृ० | दता<br>दन्तेन | दद्भ्याम्<br>दन्ताभ्याम् | दद्भिः<br>दन्तैः |
| च० | दते<br>दन्ताय | दद्भ्याम्<br>दन्ताभ्याम् | दद्भ्यः<br>दन्तेभ्यः |
| प० | दतः<br>दन्तात्<br>दन्ताद् | दद्भ्याम्<br>दन्ताभ्याम् | दद्भ्यः<br>दन्तेभ्यः |
| ष० | दतः<br>दन्तस्य | दतोः<br>दन्तयोः | दताम्<br>दन्तानाम् |

| | | | |
|---|---|---|---|
| स० | दति, दन्ते | दतोः, दन्तयोः | दत्सु, दथ्सु, दन्तेषु |
| सं० | हे दन्त | हे दन्तौ | हे दन्ताः |

## ( ८३ ) अकारान्तः पुँल्लिङ्गः 'पाद' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | पादः | पादौ | पादाः |
| द्वि० | पादम् | ,, | पदः, पादान् |
| तृ० | पदा, पादेन | पद्भ्याम्, पादाभ्याम् | पद्भिः, पादैः |
| च० | पदे, पादाय | पद्भ्याम्, पादाभ्याम् | पद्भ्यः, पादेभ्यः |
| प० | पदः, पादात्, पादाद् | पद्भ्याम्, पादाभ्याम् | पद्भ्यः, पादेभ्यः |
| ष० | पदः, पादस्य | पदोः, पादयोः | पदाम्, पादानाम् |
| स० | पदि, पादे | पदोः, पादयोः | पत्सु, पथ्सु, पादेषु |
| सं० | हे पाद | हे पादौ | हे पादाः |

## ( ८४ ) अकारान्तः पुँल्लिङ्गः 'यूष' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | यूषः | यूषौ | यूषाः |

| | | | |
|---|---|---|---|
| द्वि० | यूषम् | यूषौ | यूष्णः<br>यूषान् |
| तृ० | यूष्णा<br>यूषेण | यूषभ्याम्<br>यूषाभ्याम् | यूषभिः<br>यूषैः |
| च० | यूष्णे<br>यूषाय | यूषभ्याम्<br>यूषाभ्याम् | यूषभ्यः<br>यूषेभ्यः |
| प० | यूष्णः<br>यूषात्<br>यूषाद् | यूषभ्याम्<br>यूषाभ्याम् | यूषभ्यः<br>यूषेभ्यः |
| ष० | यूष्णः<br>यूषस्य | यूष्णोः<br>यूषयोः | यूष्णाम्<br>यूषाणाम् |
| स० | यूष्णि<br>यूषणि<br>यूषे | यूष्णोः<br>यूषयोः | यूषसु<br>यूषेषु |
| सं० | हे यूष | हे यूषौ | हे यूषाः |

यूष शब्दः क्लीबेऽप्यस्ति, तद्रूपाणि-यूषम्, यूषे, यूषाणि प्र० । यूषम्, यूषे, यूष्णि-यूषाणि द्वि० । हे यूष, हे यूषे, हे यूषाणि । शेषं पुंवत् ।

## ( ८५ ) अकारान्तः पुँल्लिङ्गः 'द्व्यह्न' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | द्व्यह्नः | द्व्यह्नौ | द्व्यह्नाः |
| द्वि० | द्व्यह्नम् | ,, | द्व्यह्नान् |
| तृ० | द्व्यह्नेन | द्व्यह्नाभ्याम् | द्व्यह्नैः |
| च० | द्व्यह्नाय | ,, | द्व्यह्नेभ्यः |
| प० | द्व्यह्नात्-द् | ,, | ,, |
| ष० | द्व्यह्नस्य | द्व्यह्नयोः | द्व्यह्नानाम् |
| स० | द्व्यह्नि<br>द्व्यहनि<br>द्व्यह्ने | ,, | द्व्यह्नेषु |
| सं | हे द्व्यह्न | हे द्व्यह्नौ | हे द्व्यह्नाः |

एवम्—त्र्यह्न, चतुरह्न, पञ्चाह्न, षडह्न, सप्ताह्न, अष्टाह्न, नवाह्न—इत्यादयोऽहन्शब्दपरकसङ्ख्यावाचकशब्दाः बोध्याः। एवं पुनः (सायमह्नः) 'सायाह्न' शब्दः, ( विगतमहः ) 'व्यह्न' शब्दश्च ॥

+ 'रात्राह्नाहाः पुंसि' इति वचनात् पुंस्येवैषां रूपाणि ॥

## इति स्वरान्तप्रकरणान्तर्गते-ऽकारान्तप्रकरणे पूर्वं तावत् पुँल्लिङ्गे द्वादशशब्दाः प्रदर्शिताः।

॥ श्री शङ्खेश्वरपार्श्वनाथाय नमो नमः ॥

# ॥ अकारान्तप्रकरणान्तर्गतं तद्धितान्तप्रकरणम् ॥

अथ तद्धितप्रत्ययान्ताः पञ्चाशच्छब्दाः द्विलिङ्ग (पुंसि स्त्रियां च) निरूप्यन्ते तथा हि—

## (८६) अकारान्तः पुँल्लिङ्गः 'बैद' शब्दः ।

(बिदस्यापत्यं पौत्रादि, अथवा बिदस्यापत्यं वृद्धं पुमान् बैदः ।)

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | बैदः | बैदौ | बिदाः |
| द्वि० | बैदम् | ,, | बिदान् |
| तृ० | बैदेन | बैदाभ्याम् | बिदैः |
| च० | बैदाय | ,, | बिदेभ्यः |
| प० | बैदात्-द् | ,, | ,, |
| ष० | बैदस्य | बैदयोः | बिदानाम् |
| स० | बैदे | ,, | बिदेषु |
| सं० | हे बैद | हे बैदौ | हे बिदाः |

एवम्—काश्यप, और्व, भारद्वाज, कौशिक, वैश्वानर, हारित, नैषाद, शाबर-प्रमुखाः ।

अत्र "बिदादे वृद्धे [ ६. १. ४१ ]" इति अञि " अवर्णेवर्णस्य " [ ७. ४. ६८] इत्यकारलुकि "वृद्धिः स्वरेष्वादेञ्णिति तद्धिते" [७. ४. १] इति प्रकृतेराद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च "बैद" इति प्रकृतिः, बहुत्वेतु " यञञोऽश्यापर्णान्तगोपवनादेः [ ६. १. १२६ ] " इत्यनेन 'अञ्-प्रत्ययस्य लुपि 'बिद' इति मूलप्रकृतिरेवावतिष्ठते ॥

| | | | एकव० | द्विव० | बहुव० | वि० |
|---|---|---|---|---|---|---|
| कश्यपस्य | वृद्धमपत्यं | पुमान् | =काश्यपः | काश्यपौ | कश्यपाः | प्रथमा |
| उर्वस्य | " | " | =और्वः | और्वौ | उर्वाः | " |
| भरद्वाजस्य | " | " | =भारद्वाजः | भारद्वाजौ | भरद्वाजाः | " |
| कुशिकस्य | " | " | =कौशिकः | कौशिकौ | कुशिकाः | " |
| विश्वानरस्य | " | " | =वैश्वानरः | वैश्वानरौ | विश्वानराः | " |
| हरितस्य | " | " | =हारितः | हारितौ | हरिताः | " |
| निषादस्य | " | " | =नैषादः | नैषादौ | निषादाः | " |
| शबरस्य | " | " | =शाबरः | शाबरौ | शबराः | " |

शेषं सर्वं "बैद" ( ८६ ) वज्ज्ञेयम् ॥

स्त्रियां त्वनुक्रमेण-और्वी । भारद्वाजी । कौशिकी । वैश्वानरी । हारिती। नैषादी । शाबरी । एतेषां रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्विज्ञेयानि ॥

बिदस्यापत्यं वृद्धं स्त्री 'बैदी' ।"अणञेयेकण्० [२-४-२०]"इति ङीप्रत्यये ईकारान्तत्वम् । एतद्रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवत्परिभावनीयानि॥

बिदस्यानन्तरमपत्यं बैदिः—अत्र "अत इञ्" [६. १. ३१] इति इञि "अवर्णेवर्णस्य" [७-४-६८] इत्यकारलुकि "वृद्धिः स्वरेष्वादे०" [७. ४. १] इति वृद्धौ च सत्यां 'बैदि' रिति प्रकृतिः पुंसि, तद्रूपाणि वक्ष्यमाण 'मुनि' (१७५) शब्दवद्बोध्यानि ॥

स्त्रियां तु—"नुर्जातेः" [ २. ४. ७२ ] इति ङी 'बैदी' इति प्रकृतिः, एतद्रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवज्ज्ञेयानि ॥

एवमन्येषामप्यदन्तानां शब्दानामनन्तरेऽपत्येऽर्थे "अत इञ्" इति 'इञ्' भवति, न चेद्विशेषविधानम् । स्त्रियां तु " नुर्जाते " रिति ङीर्भवति । यथा गर्गस्यानन्तरमपत्यं पुमान् 'गार्गिः', स्त्री तु 'गार्गी' इत्यादयः ॥

## ( ८७ ) अकारान्तः पुँल्लिङ्गः 'गार्ग्य' शब्दः ।
## (गर्गस्यापत्यं वृद्धं पुमान् गार्ग्यः)

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | गार्ग्यः | गार्ग्यौ | गर्गाः |
| द्वि० | गार्ग्यम् | ,, | गर्गान् |
| तृ० | गार्ग्येण | गार्ग्याभ्याम् | गर्गैः |

शेषाणि रूपाणि 'वीर' (७५) शब्दवदवसेयानि । किन्त्वत्र "गर्गादे र्यञ्" [६. १. ४२ ] इति वृद्धेऽपत्येऽर्थे यञि " अवर्णेवर्णस्य " [ ७. ४. ६८ ] इत्यकारलुकि "वृद्धिःस्वरेष्वादे—[ ७. ४. १ ]" रित्यादिनाऽऽद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च 'गार्ग्य' इति प्रकृतिः; बहुत्वे तु "यञञो [६. १, १२६] इत्यादिना यञो लुपि 'गर्ग' इति मूलप्रकृतिरवतिष्ठते ॥

## स्त्रियां तु—

गर्गस्यापत्यं वृद्धं स्त्री 'गार्गी' 'गार्ग्यायणी' इति प्रकृतिद्वयस्य सर्वाण्यपि रूपाणि वक्ष्यमाण ' नदी ' (२२५) शब्दवज्ज्ञेयानि ॥ यञन्तत्वाद् गार्ग्यशब्दस्य "यञो डायन् च वा" [२. ४. ६७] इत्यनेन ङीप्रत्ययस्तद्योगे डायन् चान्तो विकल्पेन भवति । यदा डायन्युक्तङीर्भवति तदा 'गार्ग्यायणी' इति प्रकृतिः, यदा तु केवलो ङीस्तदा "अस्य ङ्यां लुक्" [२. ४. ८६] इत्यकारलुकि " व्यञ्जनात्तद्धितस्य " [ २. ४. ८८ ] इति यञो यकारस्य लुग्भवति, तेन 'गार्गी' इत्येवंस्वरूपा प्रकृतिर्विज्ञेया ॥

एवम्—वात्स्य, वाज्य, आग्निवेश्य, याज्ञवल्क्य, वार्षगण्य, पाराशर्य, पैङ्गल्य, कार्ष्ण्य, कार्कट्य, भैषज्य, चाणक्य, सौवर्ण्य—प्रमुखाः ॥ ( इमे गर्गादिगणस्थाः शब्दाः)

| | | | एकव० | द्विव० | बहुव० | वि० |
|---|---|---|---|---|---|---|
| वत्सस्य | वृद्धमपत्यं | पुमान् | -वात्स्यः | वात्स्यौ | वत्साः | प्रथमा० |
| वाजस्य | ,, | ,, | -वाज्यः | वाज्यौ | वाजाः | |
| अग्निवेशस्य | ,, | ,, | -आग्निवेश्यः | आग्निवेश्यौ | अग्निवेशाः | ,, |
| यज्ञवल्कस्य | ,, | ,, | -याज्ञवल्क्यः | याज्ञवल्क्यौ | यज्ञवल्काः | ,, |
| वृषगणस्य | ,, | ,, | -वार्षगण्यः | वार्षगण्यौ | वृषगणाः | ,, |
| पराशरस्य | ,, | ,, | -पाराशर्यः | पाराशर्यौ | पराशराः | ,, |
| पिङ्गलस्य | ,, | ,, | -पैङ्गल्यः | पैङ्गल्यौ | पिङ्गलाः | ,, |
| कृष्णस्य | ,, | ,, | -कार्ष्ण्यः | कार्ष्ण्यौ | कृष्णाः | ,, |
| कर्कटस्य | ,, | ,, | -कार्कट्यः | कार्कट्यौ | कर्कटाः | ,, |
| भिषजस्य | ,, | ,, | -भैषज्यः | भैषज्यौ | भिषजाः | ,, |
| चणकस्य | ,, | ,, | -चाणक्यः | चाणक्यौ | चणकाः | ,, |
| सुवर्णस्य | ,, | ,, | -सौवर्ण्यः | सौवर्ण्यौ | सुवर्णाः | ,, |

एतेषां शेषाणि सर्वाण्यपि रूपाणि 'गार्ग्य' शब्दवत् पुंसि ज्ञेयानि ॥

एवम्—वत्सस्यापत्यं वृद्धं स्त्री 'वात्सी' 'वात्स्यायनी' वा इति प्रकृतिद्वयस्य सर्वाणि रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवत् परिभावनीयानि। अग्रेतनाग्निवेश्यादारभ्य सौवर्ण्यपर्यन्तानां शब्दानां स्त्रियां निरुक्तवद्व्यवस्था स्वधिया ज्ञेया ॥

## (८८) अकारान्तः पुँल्लिङ्गः 'जामदग्न्य' शब्दः ।

( जमदग्नेर्वृद्धमपत्यं पुमान् जामदग्न्यः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | जामदग्न्यः | जामदग्न्यौ | जमदग्नयः |

| | | | |
|---|---|---|---|
| द्वि० | जामदग्न्यम् | जामदग्न्यौ | जमदग्नीन् |
| तृ० | जामदग्न्येन | जामदग्न्याभ्याम् | जमदग्निभिः |
| च० | जामदग्न्याय | ,, | जमदग्निभ्यः |
| प० | जामदग्न्यात्-द् | ,, | ,, |
| ष० | जामदग्न्यस्य | जामदग्न्ययोः | जमदग्नीनाम् |
| स० | जामदग्न्ये | ,, | जमदग्निषु |
| सं० | हे जामदग्न्य | हे जामदग्न्यौ | हे जमदग्नयः |

'जमदग्नि' शब्दस्य गर्गादिपाठात् " गार्गादेर्यञ् " [ ६. १. ४२ ] इति यञि " अवर्णेवर्णस्य " [ ७-४-६८ ] इति अन्त्येकारलुकि आद्यस्वर-वृद्धौ च सत्याम्, एकत्वे द्वित्वे च 'जामदग्न्य' इति प्रकृतिः। बहुत्वे तु " यञञोऽ० " [ ६. १. १२६ ] इत्यादिना यञ्प्रत्ययस्य लुपि 'जमदग्नि' इति मूलप्रकृतिः ॥

स्त्रियां तु—जमग्नेर्वृद्धमपत्यं स्त्री 'जामदग्न्यायनी' 'जामदग्नी' इति प्रकृतिद्वयस्य सर्वाण्यपि रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्बोध्यानि। निरुक्तप्रकृतिद्वयसाधनिका तु 'गार्गी, 'गार्ग्यायणी' वद्बोध्या ॥

## (८९) अकारान्तः पुँल्लिङ्गः 'लौहित्य' शब्दः ।

( लोहितस्य वृद्धमपत्यं पुमान् लौहित्यः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | लौहित्यः | लौहित्यौ | लोहिताः |
| द्वि० | लौहित्यम् | ,, | लोहितान् |
| तृ० | लौहित्येन | लौहित्याभ्याम् | लोहितैः |

शेषाणि रूपाणि 'गार्ग्य' (८७) शब्दवज्ज्ञेयानि ।

एवम्—आर्क्ष्य, शाकल्यप्रमुखाः ॥

| | | | | |
|---|---|---|---|---|
| ऋक्षस्य वृद्धमपत्यं पुमान्-आर्क्ष्यः | आर्क्ष्यौ | ऋक्षाः | प्रथमा० |
| शकलस्य ,, ,, - शाकल्यः | शाकल्यौ | शकलाः | ,, |

अग्रेतनानि रूपाणि 'गार्ग्य' शब्दवज्ज्ञेयानि ।

## स्त्रियां तु—

लोहितादिशब्दानां " लोहितादिशकलान्तात् " [२. ४. ६८] इत्यनेन ङीप्रत्ययस्तत्सन्नियोगे डायन् चान्तो नित्यं भवति । तेन लोहितस्य वृद्धमपत्यं स्त्री 'लौहित्यायनी'; ऋक्षस्य वृद्धमपत्यं स्त्री 'आर्क्ष्यायणी'; शकलस्य वृद्ध-मपत्यं स्त्री 'शाकल्यायनी' इति शब्दत्रयस्य तिसृणां प्रकृतीनां सर्वाण्यपि रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्विज्ञेयानि ॥

## ( ९० ) अकारान्तः पुँल्लिङ्गः 'वातण्ड्य' शब्दः ।

### वतण्डस्यापत्यं वृद्धमाङ्गिरसः वातण्ड्यः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | वातण्ड्यः | वातण्ड्यौ | वतण्डाः |
| द्वि० | वातण्ड्यम् | " | वतण्डान् |
| तृ० | वातण्ड्येन | वातण्ड्याभ्याम् | वतण्डैः |

शेषाणि रूपाणि 'लौहित्य' ( ८९ ) शब्दवद्विज्ञेयानि ।

अत्राङ्गिरसेऽपत्यविशेषे " वतण्डात् " [ ६. १. ४५ ] इति यञ् एव भवति, तदनु अन्त्याकारलुक्याद्यस्वरवृद्धावेकत्वे द्वित्वे च ' वातण्ड्य ' इति प्रकृतिः, बहुत्वे तु " यञञोः० " [ ६. १. १२६ ] इति यञो लुपि 'वत-ण्ड' इति मूलप्रकृतिः ।

आङ्गिरसादन्यत्र गर्गादिस्थलोहितादौ पाठाद् यञि (उपर्युक्तवत्) 'वाता-ण्ड्य' इति शब्दस्वरूपं भवति । शिवादिपाठाच्च यदा " शिवादेरण् " [ ६. १. ६० ] इति अण् भवति तदा 'वातण्ड' इति शब्दस्वरूपं जायते । 'वातण्ड' शब्दस्य सर्वाण्यपि रूपाणि 'जिन' (७४) शब्दवद्भवन्ति ।

न च वाच्यं गर्गादिपाठादेव यञि सिद्धे " वतण्डात् " [६. १. ४५] इति वचनं निरर्थकम्, यतोऽमेनाङ्गिरसेऽपत्यविशेषे विहितेन यञा शिवाद्यण् बाध्यते ।

ननु यः शिवादौ अण् सोऽपत्यमात्रे विहितः, गर्गादौ तु यञ् वृद्धापत्ये, तस्माद्विशेषविधानादेवाऽऽङ्गिरसेऽन्यत्रापि च यञ्सिद्धौ किमर्थमिदम् " वतण्डात् " [ ६. १. ४५ ] इति सूत्रं सूत्रकृता सूत्रितमिति चेत्? मैवं वादीः यतो वतण्डशब्दस्य शिवादिपाठोऽपि वृद्ध एवाऽण्विधानार्थः ।

## स्त्रियां तु—

वतण्डस्यापत्यं वृद्धं स्त्री आङ्गिरसी 'वतण्डी' इत्यस्य रूपाणि वक्ष्यमाण-'नदी' (२२५) शब्दवद्बोध्यानि ।

अत्र " स्त्रियां लुप् " [ ६. १. ४६ ] इति यञो लुपि " जातेरयान्त० " [ २. ४. ५४ ] इति जातिलक्षणो ङीर्भवति, तेन 'वतण्डी' इति प्रकृतिर्जायते ।

ननु " स्त्रियां लुप् " [ ६. १. ४६ ] इत्यनेन विहितयञ्लुपःस्थानिवद्भावे कृते यान्तत्वात् जातिलक्षणो ङीः कथं भवतीति चेत्? सत्यम्, जातिलक्षणङीविधायके " जातेरयान्त० " [ २. ४. ५४ ] इत्यस्मिन् सूत्रे अन्तग्रहणं साक्षात्प्रतिपत्त्यर्थम्; तेन वतण्डस्यापत्यं पौत्रादि ( वृद्धं ) स्त्रीति यञ्, तस्य लोपे स्थानिवद्भावेऽपि ' वतण्डी ' इत्यत्र यान्तलक्षणः प्रतिषेधो न भवतीति ।

अनाङ्गिरसे तु शिवादिपाठादणि " अणञे० " [ २. ४. २० ] इति ङ्याम् 'वातण्डी' इति। गर्गादिस्थलोहितादिपाठाच्च यञि "लोहितादिशकलान्तात्" [२. ४. ६८] इति ङीर्डायँश्च भवति, तेन 'वातण्ड्यायनी' इति। 'वातण्डी' 'वातण्ड्यायनी' इत्येतयो रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्विज्ञेयानि ॥

## (९१) अकारान्तः पुँल्लिङ्गः 'बाभ्रव्य' शब्दः ।

(बभ्रोः कौशिकविशेषोऽपत्यं वृद्धं पुमान् बाभ्रव्यः कौशिकः)

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | बाभ्रव्यः | बाभ्रव्यौ | बभ्रवः |

| | | | |
|---|---|---|---|
| द्वि० | बाभ्रव्यम् | बाभ्रव्यौ | बभ्रून् |
| तृ० | बाभ्रव्येण | बाभ्रव्याभ्याम् | बभ्रुभिः |
| च० | बाभ्रव्याय | ,, | बभ्रुभ्यः |
| प० | बाभ्रव्यात्-द् | ,, | ,, |
| ष० | बाभ्रव्यस्य | बाभ्रव्ययोः | बभ्रूणाम् |
| स० | बाभ्रव्ये | ,, | बभ्रुषु |
| सं० | हे बाभ्रव्य | हे बाभ्रव्यौ | हे बभ्रवः |

अत्र " मधुबभ्रोर्ब्राह्मणकौशिके " [६. १. ४३] इति सूत्रेण कौशिके वृद्धापत्यविशेषेऽर्थे 'यञ्' भवति, तदनु " अस्वयम्भुवोऽव् " [७. ४. ७०] इति उकारस्य 'अव्' आदेशे सति " वृद्धिः स्वरेष्वादे० " [ ७. ४. १. ] इत्याद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च 'बाभ्रव्य' इति प्रकृतिः; बहुत्वे तु "यञञोऽ०" [६. १. १२६] इत्यादिना यञो लुपि 'बभ्रु' इति मूलप्रकृतिः ।

## स्त्रियां तु—

बभ्रोः कौशिकविशेषापत्यं वृद्धं स्त्री 'बाभ्रव्यायणी' । अत्र बभ्रुशब्दस्य गर्गाद्यन्तर्गणलोहितादौ पठितत्वात् " लोहितादिशकलान्तात्" [२. ४. ६८] इति ङीप्रत्ययस्तत्सन्नियोगे ङायन् चान्तो भवति, तेन 'बाभ्रव्यायणी' इति प्रकृतिः, एतद्रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवज्ज्ञेयानि ॥

## (९२) अकारान्तः पुँल्लिङ्गः 'शाङ्कव्य' शब्दः ।

( शङ्कोरपत्यं वृद्धं शाङ्कव्यः । यद्वा शङ्कोरपत्यं शाङ्कव्यः । )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | शाङ्कव्यः | शाङ्कव्यौ | शङ्कवः |
| द्वि० | शाङ्कव्यम् | ,, | शङ्कून् |
| तृ० | शाङ्कव्येन | शाङ्कव्याभ्याम् | शङ्कुभिः |

शेषाणि रूपाणि 'बाभ्रव्य' (९१) शब्दवद्बोध्यानि ।

शङ्कुशब्दस्य गर्गाद्यन्तर्गतलोहितादौ पाठात् " गर्गादेर्यञ् " [ ६. १. ४२ ] इति यञि, " अस्वयम्भुवोऽव् " [७. ४. ७०] इत्युकारस्याऽवि " वृद्धिः स्वरेष्वादे० " [७. ४. १] इत्याद्यस्वरवृद्धौ च सत्याम् 'शाङ्कव्य' शब्दनिष्पत्तिः। एकत्वे द्वित्वे च 'शाङ्कव्य' इति प्रकृतिः, बहुत्वे तु "यञञोऽ०" [ ६. १. १२६ ] इति यञो लुपि 'शङ्कु' इति मूलप्रकृतिः ।

## स्त्रियां तु—

शङ्कोर्वृद्धमपत्यं स्त्री 'शाङ्कव्यायनी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्विज्ञेयानि । अत्र " लोहितादि० " [ २. ४. ६८ ] इति ङीप्रत्ययो डायँश्चान्तः ॥

शङ्कुशब्दस्य कुर्वादिष्वपि पाठस्तेन शङ्कोरपत्यं पुमान् " कुर्वादेर्ञ्यः " [ ६. १. १०० ] इति ञ्यप्रत्यये उपर्युक्तवत् 'शाङ्कव्य' शब्दनिष्पत्तिः । अस्य तु सर्वाण्यपि रूपाणि 'जिन' (७४) शब्दवद्वाच्यानि। स्त्री 'शाङ्कव्या' इत्यस्य रूपाणि वक्ष्यमाण 'दया' (१६५) शब्दवद्बोध्यानि ॥

## (३९) अकारान्तः पुँल्लिङ्गः 'काप्य' शब्दः ।

(कपेरपत्यं पौत्रादि पुमान् आङ्गिरसः काप्यः ।)

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | काप्यः | काप्यौ | कपयः |
| द्वि० | काप्यम् | ,, | कपीन् |
| तृ० | काप्येन | काप्याभ्याम् | कपिभिः |
| च० | काप्याय | ,, | कपिभ्यः |
| प० | काप्यात्-द् | ,, | ,, |
| ष० | काप्यस्य | काप्ययोः | कपीनाम् |
| स० | काप्ये | ,, | कपिषु |
| सं० | हे काप्य | हे काप्यौ | हे कपयः |

अत्र " कपिबोधादाङ्गिरसे " [ ६. १. ४४ ] इति यञि " अवर्णेवर्णस्य [ ७. ४ ६८ ] इतीकारलुकि " वृद्धिःस्वरेष्वादेर्ञ्णिति तद्धिते " [ ७. ४. १. ] इति वृद्धौ च सत्यामेकत्वे द्वित्वे च 'काप्य' इति प्रकृतिः, बहुत्वे तु " यञञोऽश्यापर्णान्तगोपवनादेः " [ ६. १. १२६ ] इति यञो लुपि 'कपि' इति मूलप्रकृतिः ।

## स्त्रियां तु—

कपेरपत्यं वृद्धं स्त्री आङ्गिरसी 'काप्यायनी' । कपिशब्दो यद्यपि गर्गादिषु पठितस्तथापि " कपिबोधादाङ्गिरसे " [ ६. १. ४४ ] इत्यत्रोपादानमाङ्गिरसे एव 'यञ्' नान्यत्रेति नियमार्थम्, स्त्रियां लोहितादिकार्यार्थश्च गणपाठस्तेन " लोहितादिशकलान्तात् " [ २. ४. ६८] इति ङीप्रत्ययो डायन् चान्तो भवति । तेन 'काप्यायनी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्वसेयानि ॥

## (९४) अकारान्तः पुँल्लिङ्गः "बौध्य" शब्दः ।

( बोधस्यापत्यं वृद्धं पुमानाङ्गिरसो बौध्यः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | बौध्यः | बौध्यौ | बोधाः |
| द्वि० | बौध्यम् | ,, | बोधान् |
| तृ० | बौध्येन | बौध्याभ्याम् | बोधैः |

शेषाणि रूपाणि 'जिन' (७४) शब्दवद्भवन्ति । किन्त्वत्र—

" कपिबोधादाङ्गिरसे " [ ६. १. ४४ ] इति आङ्गिरसेऽपत्यविशेषे वृद्धेऽर्थे 'यञ्' प्रत्ययस्तदनु " अवर्णेवर्णस्य " [ ७. ४. ६८ ] इत्यकारलुकि " वृद्धिःस्वरेष्वादेः " [ ७. ४. १. ] " इत्यादिनाऽऽद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च 'बौध्य' इत्येवंरूपा प्रकृतिः; बहुत्वे तु " यञञो-[ ६. १. १२६ ] " इत्यादिना यञो लुपि 'बोध' इति मूलप्रकृतिः ।

## स्त्रियां तु—

बोधस्यापत्यं वृद्धं स्त्री आङ्गिरसी 'बौधी' बौध्यायनी' इति प्रकृतिद्विकस्य सर्वाण्यपि रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्बोध्यानि ।

उपर्युक्तप्रकृतिद्विकस्य यञन्तत्वात् " यञो डायन् च वा " [ २. ४. ६७ ] इति ङीप्रत्ययो डायञ्चान्तो वा भवति, यदा केवलो ङीप्रत्ययस्तदा " व्यञ्जनात्तद्धितस्य " [ २. ४. ८८ ] " इत्यनेन ङ्यां परस्यां सत्यां यञो यकारस्य लुकि 'बौधी' इति प्रकृतिः । यदा तु ङीप्रत्ययो डायँश्च तदा 'बौध्यायनी' इत्येवंरूपा प्रकृतिर्ज्ञेया ॥

## (९५) अकारान्तः पुँल्लिङ्गः 'धैनव' शब्दः ।

(धेनोरपत्यं वृद्धं पुमान् धैनवः) (अयम् ऋषिवचनः)

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | धैनवः | धैनवौ | धेनवः |
| द्वि० | धैनवम् | " | धेनून् |
| तृ० | धैनवेन | धैनवाभ्याम् | धेनुभिः |
| च० | धैनवाय | " | धेनुभ्यः |
| प० | धैनवात्-द् | " | " |
| ष० | धैनवस्य | धैनवयोः | धेनूनाम् |
| स० | धैनवे | " | धेनुषु |
| सं० | हे धैनव | हे धैनवौ | हे धेनवः |

अत्र धेनुशब्दस्य बिदादौ पठितत्वात् " बिदादेर्वृद्धे " [६. १. ४१] इति अञि " अस्वयम्भुवोऽव् " [ ७. ४. ७० ] इत्युकारस्थाने अवादेशे, आद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च " धैनव " इति प्रकृतिः, बहुत्वे तु " यञञोऽ० " [६. १. १२६] इति यञो लुपि 'धेनु' इति मूलप्रकृतिः ।

उत्सादिष्वपि धेनुशब्दः पठ्यते । स प्रत्यग्रप्रसवगव्यादिवाचकः । अथ-सृविवचनः । धीयते अस्मात्तत्वमिति धेनुः ।

## स्त्रियां तु—

धेनोरपत्यं वृद्ध स्त्री धैनवी । सर्वाणि रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवदवसेयानि ॥

## (९६) अकारान्तः पुँल्लिङ्गः 'गौपवन' शब्दः ।

### ( गोपवनस्यापत्यं वृद्धं पुमान् गौपवनः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | गौपवनः | गौपवनौ | गौपवनाः |

अग्रेतनानि शेषाणि सर्वाणि रूपाणि 'जिन' (७४) शब्दवज्ज्ञेयानि ।

एवम्—शैग्रव—बैन्दव—ताजम—आश्वावतान—श्यामाक—श्यापर्णाः शब्दाः । अत्रायं विशेषः—बिदादित्वादस्य 'अञ्' प्रत्ययेऽन्त्याकारलुक्याद्यस्वरवृद्धौ च त्रिष्वपि वचनेषु 'गौपवन' इति प्रकृतिः । यञञो० [६. १. १२६] इत्यत्र 'अश्यापर्णान्तगोपवनादिभ्य' इति बहुत्वे लुपः प्रतिषेधात् गोपवनादारभ्य श्यापर्णपर्यन्तानां बहुत्वे अञो लुब् न भवति । तेन—गौपवनाः । शैग्रवाः । बैन्दवाः । ताजमाः । आश्वावतानाः । श्यामाकाः । श्यापर्णाः । इत्येवं रूपाणि भवन्ति ।

## स्त्रियां तु—

गौपवनी । शैग्रवी । बैन्दवी । ताजमी । आश्वावतानी । श्यामाकी । श्यापर्णी । एतेषां रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्बोध्यानि ॥

## (९७) अकारान्तः पुँल्लिङ्गः 'शारद्वत' शब्दः ।

### ( शरद् उपकारकतयाऽस्यास्तीति शरद्वत्, तस्यापत्यं वृद्धं पुमान् शारद्वतः ॥ )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | शारद्वतः | शारद्वतौ | शरद्वतः |

| | | | |
|---|---|---|---|
| द्वि० | शारद्वतम् | शारद्वतौ | शरद्वतः |
| तृ० | शारद्वतेन | शारद्वताभ्याम् | शरद्वद्भिः |
| च० | शारद्वताय | ,, | शरद्वद्भ्यः |
| प० | शारद्वतात्-द् | ,, | ,, |
| ष० | शारद्वतस्य | शारद्वतयोः | शरद्वताम् |
| स० | शारद्वते | ,, | शरद्वत्सु, शरद्वथ्सु |
| सं० | हे शारद्वत | हे शारद्वतौ | हे शरद्वतः |

अस्य बिदादिपाठात् " बिदादेर्वृद्धे " [ ६. १. ४१ ] इति अञि आद्यस्वरवृद्धावेकत्वे द्वित्वे च 'शारद्वत' इति प्रकृतिः । बहुत्वे त्वञो लुपि 'शरद्वत्' इति मूलप्रकृतिः ।

### स्त्रियां तु—

शरद्वतोऽपत्यं वृद्धं स्त्री 'शारद्वती' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्बोध्यानि ॥

## (९८) अकारान्तः पुँल्लिङ्गः 'कौञ्जायन्य' शब्दः ।

( कुञ्जस्यापत्यं वृद्धं पुमान् कौञ्जायन्यः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | कौञ्जायन्यः | कौञ्जायन्यौ | कौञ्जायनाः |
| द्वि० | कौञ्जायन्यम् | ,, | कौञ्जायनान् |
| तृ० | कौञ्जायन्येन | कौञ्जायन्याभ्याम् | कौञ्जायनैः |
| च० | कौञ्जायन्याय | ,, | कौञ्जायनेभ्यः |
| प० | कौञ्जायन्या-त्, द् | ,, | ,, |
| ष० | कौञ्जायन्यस्य | कौञ्जायन्ययोः | कौञ्जायनानाम् |
| स० | कौञ्जायन्ये | ,, | कौञ्जायनेषु |
| सं० | हे कौञ्जायन्य | हे कौञ्जायन्यौ | हे कौञ्जायनाः |

कुञ्जशब्दात् " कुञ्जादेर्ञायन्यः [ ६. १. ४७ ] " इति ञायन्यप्रत्ययो भवति, एकत्वे द्वित्वे च ' कौञ्जायन्य' इति प्रकृतिः, बहुत्वे तु "स्त्रीबहुष्वायनञ् [ ६. १. ४८ ]" इति 'आयनञ्' प्रत्ययो भवति, तेन 'कौञ्जायन' इति प्रकृतिः ।

कुञ्जस्यापत्यं वृद्धं कौञ्जायन्यः, कौञ्जायन्यस्याप्यपत्यानि युवानः 'कौञ्जायनाः' इति रूपं भवति । यतः कौञ्जायन्यशब्दस्यादन्तत्वात् " अत इञ् " [ ६. १. ३१ ] इत्यनेन 'इञ्' प्रत्ययो भवति, तदनु "ञिदार्षादणिञोः" [ ६. १. १४० ] इति इञो लुपि एकत्वद्वित्वरूपनिमित्ताभावात् 'ञायन्य' प्रत्ययो न भवति, किन्तु बहुत्वसद्भावात् " स्त्रीबहुष्वायनञ् " [६. १. ४८] इत्यनेनैव 'आयनञ्' प्रत्ययो भवति ॥

यदातु कुञ्जस्यापत्यानि वृद्धानि कौञ्जायनास्तेषामपत्यं युवा 'कौञ्जायन्यः' इति क्रियेत तदा कौञ्जायनशब्दस्याप्यदन्तत्वादिञि तल्लुपि च 'आयनञ्' निमित्तकबहुत्वाभावात् तन्न भवति, नवरमत्रैकवचनस्य विवक्षितत्वात् तन्निमित्तको 'ञायन्य' प्रत्ययो भवति, तेन 'कौञ्जायन्य' इत्येवं रूपं भवतीति विशेषः॥

## स्त्रियां तु—

कुञ्जस्यापत्यं स्त्री 'कौञ्जायनी' इत्यस्य सर्वाणि रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवदवसेयानि ।

अत्रायं विशेषः—" स्त्रीबहुष्वायनञ् " [ ६. १. ४८ ] इति सूत्रं पुंसि बहुत्वे एव प्रवर्त्तते, स्त्रीलिङ्गे तु 'स्त्रियां वा बहुत्वेऽपि' इति वृत्तिव्याख्यानात् त्रिष्वपि वचनेषु प्रवर्त्तत इति ॥

## (९९) अकारान्तः पुँल्लिङ्गः 'पौतिमाष्य' शब्दः ।

(पूतयो माषा अस्य पूतिमाषः, तस्यापत्यं वृद्धं पुमान् पौतिमाष्यः)

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | पौतिमाष्यः | पौतिमाष्यौ | पूतिमाषाः |

| | | | |
|---|---|---|---|
| द्वि० | पौतिमाष्यम् | पौतिमाष्यौ | पूतिमाषान् |
| तृ० | पौतिमाष्येण | पौतिमाषाभ्याम् | पूतिमाषैः |

शेषाणि रूपाणि 'गार्ग्य' (८७) शब्दवज्ज्ञेयानि । अत्रास्य गर्गादित्वात् यञि अन्त्याकारलुक्याद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च 'पौतिमाष्य' इति प्रकृतिः, बहुत्वे तु यञो लुपि 'पूतिमाष' इति मूलप्रकृतिः ।

## स्त्रियां तु—

पूतिमाषस्यापत्यं वृद्धं स्त्री 'पौतिमाष्यायणी' 'पौतिमाष्या' इति द्वे प्रकृती । अत्र "षावटाद्वा" [ २. ४. ६९ ] इति सूत्रेण षकारान्तनाम्नोऽवटशब्दाच्च यञन्तात् स्त्रियां वा ङीर्भवति, तत्सन्नियोगे डायन् चान्तः । यदा ङीर्डायँश्च तदा 'पौतिमाष्यायणी' प्रकृतिः, पक्षे "आत्" [ २. ४. १८ ] इत्यापि 'पौतिमाष्या' इति प्रकृतिर्विज्ञेया । तत्राद्याया वक्ष्यमाण 'नदी' ( २२५ ) शब्दवद्रूपाणि, अपरायाश्च वक्ष्यमाण 'दया' ( १६५ ) शब्दवद्रूपाणि भवन्ति ॥

एवम्—शार्क्कराक्ष्य-गौकक्ष्य-प्रमुखाः । यथा—शर्कराक्षस्य वृद्धमपत्यं पुमान्—शार्कराक्ष्यः, शार्कराक्ष्यौ, शर्कराक्षाः । गोकक्षस्य वृद्धमपत्यं पुमान्—गौकक्ष्यः, गौकक्ष्यौ, गोकक्षाः । शेषाणि रूपाणि 'पौतिमाष्य' शब्दवद्बोध्यानि । स्त्रियां तु—'शार्क्कराक्ष्यायणी' 'शार्क्कराक्ष्या' । 'गौकक्ष्यायणी' 'गौकक्ष्या' । इति शब्दद्वयस्य प्रकृतिद्विकस्यानुक्रमेण वक्ष्यमाण 'नदी' ( २२५ ) शब्दवत् 'दया' (१६५) शब्दवच्च रूपाणि ज्ञेयानि ॥

## (१००) अकारान्तः पुँल्लिङ्गः 'आवट्य' शब्दः ।

( अवटस्यापत्यं वृद्धं पुमान् आवट्यः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आवट्यः | आवट्यौ | अवटाः |

| | | | |
|---|---|---|---|
| द्वि० | आवट्यम् | आवट्यौ | अवटान् |
| तृ० | आवट्येन | आवट्याभ्याम् | अवटैः |

शेषाणि रूपाणि 'जिन' (७४) शब्दवद्बोध्यानि । नवरमस्य गर्गादित्वाद् यञि अन्त्याकारलुक्याद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च 'आवट्य' इति प्रकृतिः, बहुत्वे च यञो लुपि 'अवट' इति मूलप्रकृतिः ।

## स्त्रियां तु—

अवटस्यापत्यं वृद्धं स्त्री 'आवट्यायनी' 'आवट्या' चेति । अत्र "षावटाद्वा" [२. ४. ६९] इति ङीर्विकल्पेन जायते, ङीसन्नियोगे डायन्नन्तश्च । यदा ङीर्डायँश्च तदा 'आवट्यायनी' प्रकृतिः । ङ्यभावपक्षे तु "आत्" [ २. ४. १८ ] इत्यापि 'आवट्या' इति प्रकृतिर्बोध्या । निरुक्तप्रकृतिद्विकस्य सर्वाण्यपि रूपाणि यथासङ्ख्यं वक्ष्यमाण 'नदी' (२२५) शब्दवत्, 'दया' (१६५) शब्दवच्च ज्ञेयानि ।

## (१०१) अकारान्तः पुँल्लिङ्गः 'वैदेह' शब्दः ।

विदेहानां राष्ट्रस्य राजा वैदेहः,
अथवा विदेहस्य राज्ञोऽपत्यं पुमान् वैदेहः ॥

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | वैदेहः | वैदेहौ | विदेहाः |
| द्वि० | वैदेहम् | " | विदेहान् |
| तृ० | वैदेहेन | वैदेहाभ्याम् | विदेहैः |

शेषाणि सर्वाणि रूपाणि 'जिन' (७४) शब्दवद्बोध्यानि ।

अत्र "राष्ट्रक्षत्रियात्सरूपाद् राजाऽपत्ये द्रिरञ्" [ ६. १. ११४ ] इति सूत्रेण, क्षत्रियवाचिसरूपाद्राष्ट्रवाचिनो राष्ट्रवाचिसरूपाच्च क्षत्रियवाचिनो यथासङ्ख्यं राजनि क्षत्रियेऽपत्ये चाऽञ् भवति, स च द्रिसंज्ञः । तथा च—

उपर्युक्तेन सूत्रेण द्रिसंज्ञकेऽञि " अवर्णेवर्णस्य " [ ७. ४. ६८ ] इत्यकारलुकि " वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते " [ ७. ४. १ ] इति प्रकृतेराद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च 'वैदेह' इति प्रकृतिः, बहुत्वे तु " बहुष्वस्त्रियाम् " [ ६. १. ११४ ] इति द्रिसंज्ञस्याऽञो लुपि 'विदेह' इति मूल प्रकृतिरत्रतिष्ठते

## स्त्रियां तु--

विदेहस्य राज्ञोऽपत्यं स्त्री 'वैदेही' । एतद्रूपाणि वक्ष्यमाण 'नदी' ( २२५ ) शब्दवद्विज्ञेयानि । अत्र " अणञेयेकण्० " [ २. ४. २० ] इति ङीर्भवति ॥

## (१०२) अकारान्तः पुँल्लिङ्गः 'ऐक्ष्वाक' शब्दः ।

( इक्ष्वाकूणां राष्ट्रस्य राजा, इक्ष्वाको राज्ञोऽपत्यं वा ऐक्ष्वाकः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | ऐक्ष्वाकः | ऐक्ष्वाकौ | इक्ष्वाकवः |
| द्वि० | ऐक्ष्वाकम् | ,, | इक्ष्वाकून् |
| तृ० | ऐक्ष्वाकेण | ऐक्ष्वाकाभ्याम् | इक्ष्वाकुभिः |

शेषाणि रूपाणि 'बाभ्रव्य' (९१) शब्दवज्ज्ञेयानि ।

अत्र " राष्ट्रक्षत्रियात्० " [६. १. ११४] इति द्रिसंज्ञकेऽञि " सारवैक्ष्वाक-मैत्रेय-भ्रौणहत्य-धैवत्य-हिरण्मयम् " [ ७. ४. ३० ] इति निपातनादुकारलोपे " वृद्धिः स्वरेष्वादे० " [ ७. ४. १ ] इत्याद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च ' ऐक्ष्वाक' इति प्रकृतिः, बहुत्वे तु " बहुष्वस्त्रियाम् " [ ६. १. १२४ ] इति द्रेरञो लुपि 'इक्ष्वाकु' इति मूलप्रकृतिः ॥

## स्त्रियां तु—

इक्ष्वाको राज्ञोऽपत्यं स्त्री 'ऐक्ष्वाकी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवदवसेयानि ।

अञन्तत्वादस्य " अणञेयेकण्० " [ २. ४. २० ] इति ङीर्भवति । एवमन्यत्रापि बोध्यम् ॥

## (१०३) अकारान्तः पुँल्लिङ्गः 'पाञ्चाल' शब्दः ।

( पञ्चालानां राष्ट्रस्य राजा, पञ्चालस्य राज्ञोऽपत्यं च पाञ्चालः । )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | पाञ्चालः | पाञ्चालौ | पञ्चालाः |
| द्वि० | पाञ्चालम् | ,, | पञ्चालान् |
| तृ० | पाञ्चालेन | पाञ्चालाभ्याम् | पञ्चालैः |

शेषाणि सर्वाणि रूपाणि 'वैदेह' (१०१) शब्दवद्बोध्यानि ।

अत्रापि " राष्ट्रक्षत्रियात्० " [ ६. १. ११४ ] इति द्रिसंज्ञकेऽञि " अवर्णे० " [ ७. ४. ६७ ] इत्यकारलुकि " वृद्धिः स्वरेष्वादे० " [ ७. ४. १ ] इत्याद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च 'पाञ्चाल' इति प्रकृतिः, बहुत्वे तु " बहुष्वस्त्रियाम् " [६. १. १२४] इति द्रेरञो लुपि 'पञ्चाल' इति मूलप्रकृतिः ॥

### स्त्रियां तु--

पञ्चालस्य राज्ञोऽपत्यं स्त्री 'पाञ्चाली' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवज्ज्ञातव्यानि ॥

## (१०४) अकारान्तः पुल्लिङ्गः 'गान्धार' शब्दः ।

( गान्धारीणां राजा, गान्धारे राज्ञोऽपत्यं च गान्धारः । )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | गान्धारः | गान्धारौ | गान्धारयः |
| द्वि० | गान्धारम् | गान्धारौ | गान्धारीन् |

| | | | |
|---|---|---|---|
| तृ० | गान्धारेण | गान्धाराभ्याम् | गान्धारिभिः |
| च० | गान्धाराय | ,, | गान्धारिभ्यः |
| प० | गान्धारात्-द् | ,, | ,, |
| ष० | गान्धारस्य | गान्धारयोः | गान्धारीणाम् |
| स० | गान्धारे | ,, | गान्धारिषु |
| सं० | हे गान्धार | हे गान्धारौ | हे गान्धारयः |

अत्र "गान्धारिसाल्वेयाभ्याम्" [ ६. १. ११५ ] इति द्रिसंज्ञकः 'अञ्' भवति, तदनु "अवर्णेवर्णस्य" [ ७. ४. ६७ ] इत्यन्त्येकारलुकि आद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च 'गान्धार' इति प्रकृतिः, बहुत्वे तु "बहुष्वस्त्रियाम्" [६. १. १२४] इत्यञो लुपि 'गान्धारि' इति मूलप्रकृतिः।

'गान्धारि' इति प्रकृतिः कथं संजाता? इति जिज्ञासायामुच्यते–गन्धमियर्ति (प्राप्नोति) इत्यर्थे "कर्मणोऽण्" [ ५. १. ७२ ] इत्यणि गान्धारः, तस्यापत्यम् "अत इञ्" [६. १. ३१] इतीञि 'गान्धारि' इति प्रकृतिसिद्धिः।

यद्यपि गान्धारिशब्दोऽपत्यप्रत्ययान्तस्तथाप्युपचाराद्राष्ट्रे वर्त्तते।

## स्त्रियां तु—

गान्धारे राज्ञोऽपत्यं स्त्री 'गान्धारी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्वाच्यानि॥

## (१०५) अकारान्तः पुँल्लिङ्गः 'साल्वेय' शब्दः।

### साल्वेयानां राजा, साल्वेयस्य राज्ञोऽपत्यं च साल्वेयः। अथवा साल्वाया अपत्यं साल्वेयः।

अस्य शब्दस्य त्रिष्वपि वचनेषु समानप्रकृतित्वात् सर्वाणि रूपाणि 'जिन' ( ७४ ) शब्दवद्भवन्ति। नवरमत्रायं विशेषः—यदा साल्वाया अपत्यमित्यर्थो विवक्ष्यते तदा "द्विस्वरादनद्याः" [ ६. १. ७१ ] इति 'एयण्' प्रत्ययो भवति; तेन 'साल्वेय' इत्यपत्यप्रत्ययान्तोऽपि उपचाराद्राष्ट्रे वर्तते। यदातु साल्वे-

यानां राजा, साल्वेयस्य राज्ञोऽपत्यं वा साल्वेय इत्यर्थो विवक्षितस्तदा "गान्धारिसाल्वेयाभ्याम्" [ ६. १. ११५ ] इति द्रिसंज्ञकोऽञ् भवतीति 'साल्वेय' शब्दस्य द्विधा निष्पत्तिः। द्रेरञो बहुषु लुब् भवति, तेनास्य त्रिष्वपि वचनेषु समाना प्रकृतिः।

ननु 'गान्धार' इत्यत्र लुबभावे फलमस्ति; यतो लुप्ते गान्धारिरिति स्यात्, स्थिते तु गान्धारः, 'साल्वेय' इत्यत्र तु किं फलम्? उच्यते-अत्राऽलुपि सङ्घादिविवक्षायामण्, लुपि तु "गोत्राददण्ड०" [६. ३. १६९] इत्यकञ् स्यात्।

## स्त्रियां तु--

साल्वेयस्य राज्ञोऽपत्यं स्त्री 'साल्वेयी', यद्वा साल्वाया अपत्यं स्त्री 'साल्वेयी', अभयत्रापि "अणञेयेकण्०" [२. ४. २०] इति ङ्यन्तत्वम्; रूपाणि तु वक्ष्यमाण 'नदी' (२२५) शब्दवदवसेयानि॥

## (१०६) अकारान्तः पुँल्लिङ्गः 'पौरव' शब्दः।

पुरोरपत्यं पुमान् पौरवः। अस्ति राजा पुरुर्नाम न तु राष्ट्रम्।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | पौरवः | पौरवौ | पुरवः |
| द्वि | पौरवम् | ,, | पुरून् |
| तृ० | पौरवेण | पौरवाभ्याम् | पुरुभिः |

शेषाणि रूपाणि 'बाभ्रव्य' ( ९१ ) शब्दवद्विज्ञेयानि।

अत्र "पुरुमगधकलिङ्गशूरमसद्विस्वरादण्" [ ६. १. ११६ ] इति द्रिसंज्ञकोऽण् भवति, तदनु "अस्वयम्भुवोऽव्" [ ७. ४. ७० ] इत्युकारस्याऽवि "वृद्धिः स्वरेष्वादे०" [७. ४. १] इत्याद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च 'पौरव' इति प्रकृतिः, बहुत्वे तु "बहुष्वस्त्रियाम्" [६. १. १२४] इति द्रेरणो लुपि 'पुरु' इति मूलप्रकृतिः॥

### स्त्रियां तु—

पुरोरपत्यं स्त्री 'पौरवी' इत्यस्य रूपाणि तु वक्ष्यमाण 'नदी' (२२५) शब्दवद्बोध्यानि । अत्र " अणञेयेकण्० " [ २, ४, २० ] इति ङ्यन्तत्वम् । एवमुत्तरत्रापि विज्ञेयम् ॥

## (१०७) अकारान्तः पुँल्लिङ्गः 'मागध' शब्दः ।

मगधानां राजा, मगधस्यापत्यं पुमान्वा मागधः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | मागधः | मागधौ | मगधाः |
| द्वि० | मागधम् | ,, | मगधान् |
| तृ० | मागधेन | मागधाभ्याम् | मगधैः |

शेषाणि सर्वाणि रूपाणि 'वैदेह' (१०१) शब्दवद्वाच्यानि ।

अत्र "पुरुमगध०" [ ६, १, ११६ ] इत्यादिना द्रिसंज्ञकोऽण् भवति, तदनु " अवर्णेवर्णस्य " [ ७, ४, ६७ ] इत्यन्त्याऽकारलुकि " वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते [ ७, ४, १ ] इत्याद्यस्ववृद्धौ च सत्यामेकत्वे द्वित्वे च 'मागध' इति प्रकृतिः, बहुत्वे तु " बहुष्वस्त्रियाम् " [ ६. १. १२४ ] इति द्रेरणो लुपि 'मगध' इति मूलप्रकृतिः ।

### स्त्रियां तु—

मगधस्य राज्ञोऽपत्यं स्त्री 'मागधी' इत्यस्य वक्ष्यमाण 'नदी' (२२५) शब्दवत् सर्वाणि रूपाणि भवन्ति ।

## (१०८) अकारान्तः पुँल्लिङ्गः 'कालिङ्ग' शब्दः ।

कलिङ्गानां राजा, कलिङ्गस्य राज्ञोऽपत्यं वा पुमान् कालिङ्गः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | कालिङ्गः | कालिङ्गौ | कलिङ्गाः |

शेषं सर्वं 'मागध' (१०७) शब्दवद्बोध्यम् ।

## स्त्रियां तु—

कलिङ्गस्य राज्ञोऽपत्यं स्त्री 'कालिङ्गी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्वाच्यानि ॥

## (१०९) अकारान्तः पुँल्लिङ्गः 'शौरमस' शब्दः ।

शूरमसानां राजा, शूरमसस्य राज्ञोऽपत्यं वा पुमान् शौरमसः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | शौरमसः | शौरमसौ | शूरमसाः |
| द्वि० | शौरमसम् | ,, | शूरमसान् |
| तृ० | शौरमसेन | शौरमसाभ्याम् | शूरमसैः |

शेषं सर्वं 'मागध' (१०७) शब्दवद्बोध्यम् ।

## स्त्रियां तु—

शूरमसस्य राज्ञोऽपत्यं स्त्री 'शौरमसी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवत्परिभावनीयानि ॥

## (११०) अकारान्तः पुँल्लिङ्गः 'आङ्ग' शब्दः ।

अङ्गानां राजा, अङ्गस्यापत्यं वा पुमान् आङ्गः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आङ्गः | आङ्गौ | अङ्गाः |
| द्वि० | आङ्गम् | ,, | अङ्गान् |
| तृ० | आङ्गेन | आङ्गाभ्याम् | अङ्गैः |

शेषाणि सर्वाणि रूपाणि 'मागध' (१०७) शब्दवज्ज्ञेयानि ।

अङ्गशब्दस्य द्विस्वरत्वात् " पुरुमगधकलिङ्गशूरमसद्विस्वरादण् " [ ६.

१. ११६ ] इति द्रिसंज्ञकोऽण् भवति, तदनु " अवर्णे० " [ ७, ४, ६८ ] इत्यन्त्यस्याऽकारस्य लुकि " वृद्धिः स्वरेष्वादे० " [ ७, ४, १ ] इत्याद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च 'आङ्ग' इति प्रकृतिः, बहुत्वेतु द्रेरणो लुपि 'अङ्ग' इति मूलप्रकृतिः ।

## स्त्रियां तु—

अङ्गस्य राज्ञोऽपत्यं स्त्री 'आङ्गी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवज्ज्ञेयानि ॥

## पुंसि

| | | |
|---|---|---|
| एवम्—वाङ्गः | वाङ्गौ | वङ्गाः |
| सौह्मः | सौह्मौ | सुह्माः |
| पौण्ड्रः | पौण्ड्रौ | पुण्ड्राः |
| भार्गः | भार्गौ | भर्गाः |
| साल्वः | साल्वौ | साल्वाः |

शेषं सर्वम् 'आङ्ग' शब्दवत् ।

## स्त्रियाम्

वाङ्गी साह्मी पौण्ड्री भार्गी साल्वी

एतेषां रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्बोध्यानि ॥

## (१११) अकारान्तः पुल्लिङ्गः 'दारद' शब्दः ।

दरदां राजा, दरदो राज्ञोऽपत्यं पुमान्वा दारदः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | दारदः | दारदौ | दरदः |
| द्वि० | दारदम् | ,, | ,, |
| तृ० | दारदेन | दारदाभ्याम् | दरद्भिः |
| च० | दारदाय | ,, | दरद्भ्यः |
| प० | दारदात्-द् | ,, | ,, |

| | | | |
|---|---|---|---|
| ष० | दारदस्य | दारदयोः | दरदाम् |
| स० | दारदे | ,, | दरत्सु }<br>दरथ्सु } |
| सं० | हे दारद | हे दारदौ | हे दरदः |

अत्र 'दरद्' शब्दस्य द्विस्वरत्वेन "पुरुमगधकलिङ्गशूरमसद्विस्वरादण्" [ ६, १, ११६ ] इति द्रिसंज्ञकेऽणि "वृद्धिः स्वरेष्वादे०" [ ७, ४, १ ] इत्याद्यस्वरवृद्धावेकत्वे द्वित्वे च 'दारद' इति प्रकृतिः, बहुत्वे तु "बहुष्वस्त्रियाम्" [ ६, १, १२४ ] इति द्रेरणो लुपि 'दरद्' इति मूलप्रकृतिर्विज्ञेया ॥

## स्त्रियां तु—

दरदोऽपत्यं स्त्री 'दरद्' इत्यस्य रूपाणि व्यञ्जनान्तप्रकरणे वक्ष्यमाणेषु दकारान्तेषु शब्देषु प्रदर्शयिष्यन्ते ।

अत्रायं विशेषः—"द्रेरञणोऽप्राच्यभर्गादेः" [ ६, १, १२३ ] इति सूत्रेण द्रेरणो लुपि 'दरद्' इति प्रकृतिर्ज्ञातव्या ॥

## (११२) अकारान्तः पुँल्लिङ्गः 'आम्बष्ठ्य' शब्दः ।

आम्बष्ठानां राजा, आम्बष्ठस्यापत्यं वा पुमानाम्बष्ठ्यः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आम्बष्ठ्यः | आम्बष्ठ्यौ | आम्बष्ठाः |
| द्वि० | आम्बष्ठ्यम् | ,, | आम्बष्ठान् |
| तृ० | आम्बष्ठ्येन | आम्बष्ठ्याभ्याम् | आम्बष्ठैः |

शेषाणि रूपाणि 'वैदेह' (१०१) शब्दवदवसेयानि ।

आम्बष्ठ्यशब्दस्य "वृद्धिर्यस्य स्वरेष्वादिः" [ ६, १, ८ ] इति दुसंज्ञायाम् "दुनादिकुर्वित्कोशलाजादाञ्ञ्यः" [ ६, १, ११८ ] इति द्रिसंज्ञको ञ्यप्रत्ययो भवति, तदनु-अन्त्याऽकारलुक्याद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च 'आम्बष्ठ्य' इति प्रकृतिः, बहुत्वे तु "बहुष्वस्त्रियाम्" [६, १, १२४] इति द्रेर्ञ्यस्यलुपि 'आम्बष्ठ' इति मूलप्रकृतिर्ज्ञेया ।

## स्त्रियां तु--

आम्बष्ठस्य राज्ञोऽपत्यं स्त्री 'आम्बष्ठ्या' इत्यस्य रूपाणि वक्ष्यमाण "दया' (१६५) शब्दवज्ज्ञेयानि ।

एवम्-सौवीराणां राजा, सौवीरस्य राज्ञोऽपत्यं वा पुमान् सौवीर्यः । सौवीराः ।

| | | | | | |
|---|---|---|---|---|---|
| काम्बवानां | ,, | काम्बवस्य | ,, | ,, | काम्बव्यः । काम्बवाः । |
| दार्वाणां | ,, | दार्वस्य | ,, | ,, | दार्व्यः । दार्वाः । |

शेषं सर्वम् 'आम्बष्ठ्य' शब्दवज्ज्ञेयम् । स्त्रियां तु-सौवीरा । काम्बवा । दार्वा । एतद्रूपाणि वक्ष्यमाण 'दया' (१६५) शब्दवद्बोध्यानि ॥

## (११३) अकारान्तः पुँल्लिङ्गः 'नैषध्य' शब्दः ।

निषधानां राजा, निषधस्य राज्ञोऽपत्यं वा पुमान् नैषध्यः ॥

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | नैषध्यः | नैषध्यौ | निषधाः |
| द्वि० | नैषध्यम् | ,, | निषधान् |
| तृ० | नैषध्येन | नैषध्याभ्याम् | निषधैः |

शेषाणि सर्वाणि रूपाणि 'वैदेह' (१०१) शब्दवज्ज्ञेयानि ।

नकारादित्वान्नैषध्यशब्दस्य " दुनादि० " [ ६, १, ११८ ] इत्यादिना द्रिसंज्ञको ञ्यो भवति, तदनु, अन्त्याऽकारलुक्याद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च 'नैषध्य' इति प्रकृतिः, बहुत्वेतु ञ्यस्य लुपि 'निषध' इति मूलप्रकृतिः ।

## स्त्रियां तु—

निषधस्य राज्ञोऽपत्यं स्त्री 'नैषध्या' इत्यस्य रूपाणि वक्ष्यमाण 'दया' (१६५) शब्दवदवसेयानि ॥

एवम्—नैचक्य, नैप्यप्रमुखा नकारादयः शब्दा विज्ञेयाः ।

निचकानां राजा, निचकस्य राज्ञोऽपत्यं वा पुमान् नैचक्यः । निचकाः ।

| | | | | | |
|---|---|---|---|---|---|
| नीपानां | ,, | नीपस्य | ,, | ,, | नैप्यः । नीपाः । |

स्त्री तु—नैचक्या। नैच्या। एतद्रूपाणि वक्ष्यमाण 'दया' (१६५) शब्दवत्॥
शेषं सर्वं 'नैषध्य' शब्दवत्॥

## (११४) अकारान्तः पुँल्लिङ्गः 'कौरव्य' शब्दः।

कुरूणां राजा कुरो राज्ञोऽपत्यं वा पुमान् कौरव्यः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | कौरव्यः | कौरव्यौ | कुरवः |
| द्वि० | कौरव्यम् | ,, | कुरून् |
| तृ० | कौरव्येण | कौरव्याभ्याम् | कुरुभिः |

शेषाणि रूपाणि 'बाभ्रव्य' (९१) शब्दवद्वाच्यानि।

अत्र "दुनादिकुर्वित्०" [६. १. ११८] इति द्रिसंज्ञको ञ्यप्रत्ययो भवति, तदनु "अस्वयम्भुवोऽव्" [७. ४. ७०] इत्युकारस्याऽवि "वृद्धिः स्वरेष्वादे०" [७. ४. १] इत्याद्यस्वरवृद्धावेकत्वे द्वित्वे च 'कौरव्य' इति प्रकृतिः, बहुत्वे तु "बहुष्वस्त्रियाम्" [६. १. १२४] इति द्रेर्ञ्यस्य लुपि 'कुरु' इति मूलप्रकृतिः।

### स्त्रियां तु—

कुरोरपत्यं स्त्री 'कुरूः' 'कौरव्यायणी' इति द्वे प्रकृती। अत्र 'कुरोर्वा'[६. १. १२२] इति सूत्रेण कुरुशब्दात् परस्य "दुनादिकुर्वित्" इति विहितस्य द्रेर्ञ्यस्य विकल्पेन लुब्भवति। अतो यदा लुब्भवति तदा गोत्रं च चरणैः सहेति जातित्वात् "उतोऽप्राणिनश्चायुरज्वादिभ्य ऊङ्" [२. ४. ७३] इति ऊङि 'कुरू' रित्यस्य रूपाणि वक्ष्यमाणेषु ऊकारान्तेषु स्त्रीलिङ्गेषु शब्देषु निरूपयिष्यन्ते। लुबभावपक्षे तु "कौरव्यमाण्डूकासुरेः" [२. ४. ७०] इत्यनेन ङीर्भवति तत्सन्नियोगे डायन् चान्तः; तदनु नस्य णत्वे 'कौरव्यायणी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवज्ज्ञेयानि॥

यदा तु कुरोर्ब्राह्मणस्याऽपत्यमित्यर्थो विवक्षितस्तदा "कुर्वादेर्ञ्यः" [६. १. १००] इत्यनेनैव ञ्यप्रत्ययो भवतीत्यस्य 'कौरव्य' शब्दस्य पुंसि

'वीर' (७५) शब्दवद्रूपाणि भवन्ति, यतोऽत्र ञ्यस्य द्रिसंज्ञाया अभावाद्बहुषु लुप् न भवति, तेन बहुत्वेऽपि 'कौरव्य' इति प्रकृतिः। स्त्रियां तु "आत्" [ २. ४. १८ ] इत्यापि 'कौरव्या' इत्यस्य रूपाणि वक्ष्यमाण 'दया' (१६५) शब्दवद्बोध्यानि।

अथ कौरव्यशब्दस्य तिकादिष्वपि पाठः, तत्र हि औरशशब्देन क्षत्रियप्रत्ययान्तेन साहचर्यात् कौरव्यशब्दः क्षत्रियप्रत्ययान्त एव गृह्यते। अन्यस्मादिञेव। अत एव कुरोर्ब्राह्मणस्यापत्यं 'कौरव्य' इत्यत्र "कुर्वादेर्ञ्यः" [६. १. १००] इत्यनेनैव ञ्यन्तत्वम्; कौरव्यस्यापत्यं युवा "अत इञ्" [ ६. १. ३१ ] इति 'इञ्' प्रत्यये "ञिदार्षादणिञोः" [ ६. १. १४० ] इति तस्य लुपि **कौरव्यः पिता, कौरव्यः पुत्रः**। तिकादिषु औरशशब्दसाहचर्यात् कौरव्यशब्दः क्षत्रियगोत्रवृत्तिर्विज्ञायते, अयन्तु ब्राह्मणगोत्रवृत्तिरिति, अत 'आयनिञ्' प्रत्ययो न भवति।

क्षत्रियवचनात्तु "दुनादिकुर्वित्" [ ६. १. ११८ ] इति ञ्यन्तत्वे सति कौरव्यस्यापत्यं युवा तिकादिपाठात् "तिकादेरायनिञ्" [६. १. १०७] इति 'आयनिञ्' प्रत्यये जाते **'कौरव्यः पिता, कौरव्यायणिः पुत्रः'** कौरव्यशब्दात् क्षत्रियवचनाद्यूनि उत्पन्नस्याऽऽयनिञ्प्रत्ययस्य "अब्राह्मणात्" [६. १. १४१] इति प्राप्तावपि लुब् न भवति, विधानसामर्थ्यात्॥

## (११५) अकारान्तः पुँल्लिङ्गः 'आवन्त्य' शब्दः।

### अवन्तीनां राजा, अवन्ते राज्ञोऽपत्यं पुमान् वाऽऽवन्त्यः॥

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आवन्त्यः | आवन्त्यौ | अवन्तयः |
| द्वि० | आवन्त्यम् | ,, | अवन्तीन् |
| तृ० | आवन्त्येन | आवन्त्याभ्याम् | अवन्तिभिः |

शेषाणि रूपाणि 'काप्य' (९३) शब्दवदवसेयानि।

इदन्तस्याऽवन्तिशब्दस्यात्र "दुनादिकुर्वित०" [ ६. १. ११८ ] इति द्रिसंज्ञके ञ्यप्रत्ययेऽन्त्याऽकारलुक्याद्यस्वरवृद्धावेकत्वे द्वित्वे च 'आवन्त्य' इति

प्रकृतिः, बहुत्वे तु "बहुष्वस्त्रियाम्" [ ६, १, १२४ ] इति द्रेर्ञ्यस्य लुपि 'अवन्ति' इति मूलप्रकृतिः ।

### स्त्रियां तु—

अवन्तेरपत्यं स्त्री 'अवन्ती' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवज्ज्ञेयानि । अत्र "दुनादिकुर्वित्०" इति विहितस्य द्रेर्ञ्यस्य "कुन्त्य-वन्तेः स्त्रियाम्" [ ६, १, १२१ ] इति लुपि "नुर्जातेः" [२, ४, ७२] इति ङीप्रत्यये 'अवन्ती' इति प्रकृतिः ॥

## ( ११६ ) अकारान्तः पुँल्लिङ्गः 'कौन्त्य' शब्दः

**कुन्तीनां राजा, कुन्ते राज्ञोऽपत्यं वा पुमान् कौन्त्यः ॥**

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | कौन्त्यः | कौन्त्यौ | कुन्तयः |

शेषं सर्वं 'आवन्त्य' (११५) शब्दवद्विज्ञेयम् ।

### स्त्रियां तु—

कुन्ते राज्ञोऽपत्यं स्त्री 'कुन्ती' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्बोध्यानि । साधनिका तु 'अवन्ती' शब्दवद्बोध्या ।

यदा कुन्तेर्युधिष्ठिरादिमातुरपत्यमित्यर्थो विवक्ष्यते तदौत्सर्गिकोऽण् भवति, तेन पुंसि 'कौन्त' इति प्रकृतिर्भवतीत्येतस्य सर्वाण्यपि रूपाणि 'जिन' (७४) शब्दवद्भवन्ति ।

स्त्रियां तु "नुर्जातेः" [ २. ४. ७२ ] इति ङ्याम् 'कौन्ती' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवज्ज्ञेयानि ॥

## (११७) अकारान्तः पुँल्लिङ्गः 'कौशल्य' शब्दः ।

**कोशलानां राजा, कोशलस्य राज्ञोऽपत्यं वा पुमान् कौशल्यः ॥**

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | कौशल्यः | कौशल्यौ | कोशलाः |

| | | | |
|---|---|---|---|
| द्वि० | कौशल्यम् | कौशल्यौ | कोशलान् |
| तृ० | कौशल्येन | कौशल्याभ्याम् | कोशलैः |

शेषाणि रूपाणि 'आम्बष्ठ्य' (११२) शब्दवद्भवन्ति ॥

अत्र " दुनादिकुर्वित्कोशलाजादाञ् ञ्यः " [ ६, १, ११८ ] इति द्रिसंज्ञको ञ्यप्रत्ययो भवति, तदनु, अन्त्याऽकारस्य लुक्याद्यस्वरवृद्धावेकत्वे द्वित्वे च 'कौशल्य' इति प्रकृतिः, बहुत्वे तु " बहुष्वस्त्रियाम्" [ ६, १, १२४ ] इति द्रेर्ञ्यस्य लुपि 'कोशल' इति मूलप्रकृतिः ।

## स्त्रियां तु--

कोशलस्य राज्ञोऽपत्यं स्त्री 'कौशल्या' इत्यस्य रूपाणि वक्ष्यमाण 'दया' (१६५) शब्दवज्ज्ञेयानि ।

अत्र कौशल्यशब्दात् " आत् " [ २, ४, १८ ] इत्यापि 'कौशल्या' इति प्रकृतिः ॥

## (११८) अकारान्तः पुँल्लिङ्गः 'आजाद्य' शब्दः ।

अजादानां जनपदस्य राजा, अजादस्य राज्ञोऽपत्यं पुमान् वाऽऽजाद्यः ॥

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आजाद्यः | आजाद्यौ | अजादाः |
| द्वि० | आजाद्यम् | ,, | अजादान् |
| तृ० | आजाद्येन | आजाद्याभ्याम् | अजादैः |

शेषाणि रूपाणि 'आम्बष्ठ्य' (११२) शब्दवद्वाच्यानि ।

अत्रापि " दुनादिकुर्वित्कोशलाजादाञ् ञ्यः " [ ६, १, ११८ ] इति द्रौ ञ्येऽन्त्याकारलुक्याद्यस्वरवृद्धावेकत्वे द्वित्वे च 'आजाद्य' इति प्रकृतिः, बहुषु द्रेर्ञ्यस्य लुपि 'अजाद' इति मूलप्रकृतिः ।

## स्त्रियां तु—

अजादस्य राज्ञोऽपत्यं स्त्री "आत्" [ २, ४, १८ ] इत्यापि 'आजाद्या' इत्यस्य रूपाणि वक्ष्यमाण 'दया' (१६५) शब्दवदवसेयानि ॥

## (११९) अकारान्तः पुँल्लिङ्गः 'पाण्ड्य' शब्दः ।

**पाण्डूनां जनपदस्य राजा, पाण्डो राज्ञोऽपत्यं वा पुमान् पाण्ड्यः ॥**

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | पाण्ड्यः | पाण्ड्यौ | पाण्डवः × |
| द्वि० | पाण्ड्यम् | ,, | पाण्डून् |
| तृ० | पाण्ड्येन | पाण्ड्याभ्याम् | पाण्डुभिः |

शेषाणि रूपाणि 'बाभ्रव्य' (९१) शब्दवद्विज्ञेयानि । षष्ठीबहुवचने पाण्डूनाम् इति णत्वाभावो विशेषः ।

अत्र "पाण्डोर्ड्यण्" [ ६, १, ११९ ] इति द्रिसंज्ञको ड्यण् प्रत्ययो भवति, तदनु "डिन्त्यस्वरादेः" [ २, १, ११४ ] इत्युकारस्य लुक्याद्यस्वरवृद्धावेकत्वे द्वित्वे च 'पाण्ड्य' इति प्रकृतिः, बहुषु द्रेर्ड्यणो लुपि 'पाण्डु' इति मूलप्रकृतिः ।

× ननु कथं 'पाण्डवाः यस्य दासाः' इति चेदुच्यते—यदि राष्ट्रक्षत्रिययोरेकशब्दवाच्यता भवति तदानीं ड्यण् भवति, नान्यत्र । अत्र तु कुरवो जनपदस्तस्य राजा पाण्डुरिति शिवादिपाठादण् भवति ॥

### स्त्रियां तु—

पाण्डोराज्ञोऽपत्यं स्त्री 'पाण्ड्या' इत्यस्य रूपाणि वक्ष्यमाण 'दया' (१६५) शब्दवद्बोध्यानि ॥

## (१२०) अकारान्तः पुँल्लिङ्गः 'कौण्डिन्य' शब्दः ।

**कुण्डिन्या अपत्यं वृद्धं पुमान् कौण्डिन्यः ॥**

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | कौण्डिन्यः | कौण्डिन्यौ | कुण्डिनाः |

| | | | |
|---|---|---|---|
| द्वि० | कौण्डिन्यम् | कौण्डिन्यौ | कुण्डिनान् |
| तृ० | कौण्डिन्येन | कौण्डिन्याभ्याम् | कुण्डिनैः |
| च० | कौण्डिन्याय | ,, | कुण्डिनेभ्यः |
| प० | कौण्डिन्यात्-द् | ,, | ,, |
| ष० | कौण्डिन्यस्य | कौण्डिन्ययोः | कुण्डिनानाम् |
| स० | कौण्डिन्ये | ,, | कुण्डिनेषु |
| सं० | हे कौण्डिन्य | हे कौण्डिन्यौ | हे कुण्डिनाः |

कुण्डिनीशब्दस्य गर्गादिपाठात् " गर्गादेर्यञ् " [ ६, १, ४२ ] इति यञि " अवर्णेवर्णस्य " [ ७, ४, ६८ ] इतीकारलुक्याद्यस्वरवृद्धावेकत्वे द्वित्वे च 'कौण्डिन्य' इति प्रकृतिः । बहुत्वे तु " कौण्डिन्यागस्त्ययोः कुण्डिनागस्ती च " [ ६, १, १२७ ] इति सूत्रेण कौण्डिन्य आगस्त्य इत्येतयोर्बहुत्वविशिष्टे गोत्रेऽर्थे वर्तमानयोर्यञोऽणश्चाऽस्त्रियां लुब् भवति, तयोश्च कुण्डिनी अगस्त्य शब्दयोः 'कुण्डिन' 'अगस्ति' इत्येतावादेशौ भवतः; तेन बहुत्वे 'कुण्डिन' इति प्रकृतिर्ज्ञेया । अत एव निर्देशात् पुंवद्भावाभावः । प्रत्ययलुपं कृत्वाऽऽदेशकरणमगस्तीनामीमे 'आगस्तीया' इत्येवमर्थम् । प्रत्ययान्तादेशे हि कृते अगस्तिशब्दस्यादेराकारस्याभावात् " वृद्धिर्यस्य स्वरेष्वादिः " [ ६, १, ८ ] इति दुसंज्ञा न स्यात् , तदभावे च तन्निमित्तो " दोरीयः [ ६, ६, ३१ ] इतीयः प्रत्ययोऽपि न स्यात् । यदा तु प्रत्ययस्य लुब् विधीयते तदा स्वरादावीयप्रत्यये भाविनि " न प्रागजितीये स्वरे " [ ६, १, १३५ ] इति प्रतिषेधात् प्रत्ययस्य लुब् न भवति । तथा च सति दुसंज्ञत्वादीयः सिद्धो भवति ।

ईयप्रत्ययापेक्षया कुण्डिन्यामविशेषः । प्रत्ययान्तादेशे हि कुण्डिनशब्दाददुसंज्ञकात् " तस्येदम् " [ ६, ३, १५९ ] इत्यणा भवितव्यम् । प्रत्ययस्य तु लुपि " न प्रागजितीये स्वरे " [ ६, १, १३५ ] इति लुप्प्रतिषेधे, सत्यामपि दुसंज्ञायामीयप्रत्ययापवादः शकलादित्वादञेव स्यात् , अतो न विशेषः ॥

## स्त्रियां तु—

कुण्डिन्या वृद्धमपत्यं स्त्री 'कौण्डिनी' 'कौण्डिन्यायनी' इति । अत्र गर्गादित्वात् यञन्तत्वेन " यञो डायन् च वा " [ २, ४, ६७ ] इत्यनेन ङीप्रत्ययस्तत्सन्नियोगे डायन् चान्तो विकल्पेन भवति । यदा डायन्युक्तङीर्भवति तदा 'कौण्डिन्यायनी' इति प्रकृतिः, यदा तु केवला ङीस्तदा " अस्य ङ्यां लुक् " [ २, ४, ८६ ] इति ङीप्रत्यये परे पूर्वस्य यञोऽकारस्य लुकि " व्यञ्जनात्तद्धितस्य " [ २, ४, ८८ ] इति यञो यकारस्य लुग् भवति, तेन 'कौण्डिनी' इति प्रकृतिः । उपर्युक्तप्रकृतिद्वयस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्बोध्यानि ॥

## (१२१) अकारान्तः पुँल्लिङ्गः 'आगस्त्य' शब्दः ।

अगस्त्यस्यापत्यं पुमान् आगस्त्यः ॥

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आगस्त्यः | आगस्त्यौ | अगस्तयः |
| द्वि० | आगस्त्यम् | ,, | अगस्तीन् |
| तृ० | आगस्त्येन | आगस्त्याभ्याम् | अगस्तिभिः |

शेषाणि रूपाणि 'काप्य' ( ९३ ) शब्दवद्बोध्यानि ।

अत्र ऋषिवाचकाद् '×अगस्त्य' शब्दात् " ऋषिवृष्ण्यन्धककुरुभ्यः " [६, १, ६१] इत्यणि, एकत्वे द्वित्वे च 'आगस्त्य' इति प्रकृतिः, बहुत्वे तु " कौण्डिन्यागस्त्ययोः कुण्डिनागस्ती च " [६, १, १२७] इत्यनेन बहुत्वविशिष्टे गोत्रेऽर्थे वर्त्तमानस्याऽणो लुब् भवति, तद्योगे चाऽगस्त्यशब्दस्य 'अगस्ति' इत्यादेशः स्यात्तेन 'अगस्ति' इति ( बहुत्वविशिष्टेऽर्थे ) प्रकृतिर्भवतीति भावनीयम् ।

## स्त्रियां तु—

अगस्त्यस्यापत्यं स्त्री 'आगस्ती' । अत्र "ऋषिवृष्ण्य०" [६, १, १२७]

इत्यणि " व्यञ्जनात्तद्धितस्य " [ २, ४, ८८ ] इति यकारलोपे 'आगस्ती' इति प्रकृतिः, एतद्रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्बोध्यानि ॥

× " अगपुलाभ्यां स्तम्भेर्डित् " [ ३६३ ] इति उणादिसूत्रेण 'अग' इत्यस्मात् परस्मात् स्तम्भेः सौत्राड्डिति ये प्रत्यये सति " डित्यन्त्यस्वरादेः " [२, १, ११४] इत्यनेनान्त्यस्वरादिलोपे जाते 'अगस्त्य' शब्दनिष्पत्तिर्विज्ञेया॥

## (१२२) अकारान्तः पुँल्लिङ्गः 'भार्गव' शब्दः ।

### भृगोर्गोत्रापत्यं पुमान् 'भार्गवः' ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | भार्गवः | भार्गवौ | भृगवः |
| द्वि० | भार्गवम् | ,, | भृगून् |
| तृ० | भार्गवेण | भार्गवाभ्याम् | भृगुभिः |
| च० | भार्गवाय | ,, | भृगुभ्यः |
| प० | भार्गवा-त्, द् | ,, | ,, |
| ष० | भार्गवस्य | भार्गवयोः | भृगूणाम् |
| स० | भार्गवे | ,, | भृगुषु |
| सं० | हे भार्गव | हे भार्गवौ | हे भृगवः |

अत्र ऋषिवाचकाद् भृगुशब्दाद् "ऋषिवृष्ण्यन्धककुरुभ्यः" [६, १, ६१] इत्यणि " अस्वयम्भुवोऽव् " [ ७, ४, ७० ] इत्युकारस्य 'अव्' आदेशे सति " वृद्धिः स्वरेष्वादे० " [ ७, ४, १ ] इत्याद्यस्य ऋकारस्य वृद्धौ च सत्यामेकत्वे द्वित्वे च 'भार्गव' इति प्रकृतिः; बहुत्वे तु " भृग्वङ्गिर० " [ ६, १, १२८ ] इति बहुत्वविशिष्टगोत्रापत्येऽर्थे वर्त्तमानस्याणो लुपि 'भृगु' इति मूलप्रकृतिः ।

## स्त्रियां तु—

भृगोरपत्यं स्त्री 'भार्गवी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्बोध्यानि । अत्रापि " अणञेयेकण् " [२, ४, २०] इति ङ्यन्तत्वम्॥

## (१२३) अकारान्तः पुँल्लिङ्गः 'आङ्गिरस' शब्दः ।

( अङ्गिरसो गोत्रापत्यं पुमान् आङ्गिरसः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आङ्गिरसः | आङ्गिरसौ | अङ्गिरसः |
| द्वि० | आङ्गिरसम् | ,, | ,, |
| तृ० | आङ्गिरसेन | आङ्गिरसाभ्याम् | अङ्गिरोभिः |
| च० | आङ्गिरसाय | ,, | अङ्गिरोभ्यः |
| प० | आङ्गिरसात्-द् | ,, | ,, |
| ष० | आङ्गिरसस्य | आङ्गिरसयोः | अङ्गिरसाम् |
| स० | आङ्गिरसे | ,, | अङ्गिरस्सु }<br>अङ्गिरःसु } |
| सं० | हे आङ्गिरस | हे आङ्गिरसौ | हे अङ्गिरसः |

अत्र ×'अङ्गिरस्' शब्दादौत्सर्गिकोऽण् भवति, तेनैकत्वे द्वित्वे च 'आङ्गिरस' इति प्रकृतिः, बहुत्वे तु "भृग्वङ्गिरस्कुत्सवसिष्ठगोतमात्रेः" [६, १, १२८] इति सूत्रेण बहुत्वविशिष्टे गोत्रेऽर्थे वर्त्तमानस्यौत्सर्गिकस्याणो(ऽस्त्रियां)लुब्भवति, तेन 'अङ्गिरस्' इति मूलप्रकृतिर्विज्ञेया ।

### स्त्रियां तु—

अङ्गिरसो गोत्रापत्यं स्त्री 'आङ्गिरसी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्बोध्यानि । अत्र " अणजेयेकण्० " [ २, ४, २० ] इति ङ्यन्तत्वम् ॥

×" विहायस्सुमनस्पुरुदंशस्पुरूरवोऽङ्गिरसः " [ ९७६ ] इति उणादिसूत्रेण 'अङ्गिरस' शब्दो निपात्यते । निपातने हि अङ्गेरिरोन्तश्च । अङ्गतीति । अङ्गिरा ऋषिः॥

## (१२४) अकारान्तः पुँल्लिङ्गः 'गौतम' शब्दः।

गोतमस्यापत्यं गोत्रं पुमान् गौतमः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | गौतमः | गौतमौ | गोतमाः |
| द्वि० | गौतमम् | ,, | गोतमान् |
| तृ० | गौतमेन | गौतमाभ्याम् | गोतमैः |

शेषाणि रूपाणि कौशल्य (११७) शब्दवद्बोध्यानि॥

एवं कौत्स–वासिष्ठशब्दौ ज्ञेयौ॥ यथा–कौत्सः, कुत्साः। वासिष्ठः, वसिष्ठाः।

अत्र "ऋषिवृष्ण्यन्धककुरुभ्यः" [ ६, १, ६१ ] इति ऋषिवाचकाद् गोतमशब्दादण् भवति, तदनु,अन्त्याऽकारलुक्याद्यस्वरवृद्धावेकत्वे द्वित्वे च 'गौतम' इति प्रकृतिः, बहुत्वे तु "भृग्वङ्गिरस्कुत्सवसिष्ठगोतमात्रेः" [ ६, १, १२८ ] इति बहुत्वविशिष्टगोत्रापत्येऽर्थे वर्त्तमानस्याणो लुपि 'गोतम' इति मूलप्रकृतिर्ज्ञेया।

### स्त्रियां तु—

गोतमस्यापत्यं स्त्री 'गौतमी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवज्ज्ञेयानि। अत्रापि "अणञे०" [ २, ४, २० ] इति ङ्यन्तत्वम्॥

## (१२५) अकारान्तः पुँल्लिङ्गः 'आत्रेय' शब्दः।

अत्रेर्गोत्रापत्यं पुमान् आत्रेयः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आत्रेयः | आत्रेयौ | अत्रयः |
| द्वि० | आत्रेयम् | ,, | अत्रीन् |
| तृ० | आत्रेयेण | आत्रेयाभ्याम् | अत्रिभिः |

शेषाणि रूपाणि 'काप्य' ( ९३ ) शब्दवज्ज्ञेयानि॥

अत्राऽत्रिशब्दात् " इतोऽनिञः " [ ६. १. ७२ ] इत्यनेन एयण् प्रत्ययो भवति, तदनु " अवर्णेवर्णस्य " [ ७, ४, ६८ ] इतीकारलुकि "वृद्धिः स्वरेष्वादे०" [७, ४, १,] इति वृद्धावेकत्वे द्वित्वे च 'आत्रेय' इति प्रकृतिः; बहुत्वे तु " भृग्वङ्गि० " [ ६, १, १२८ ] इत्येयणो लुपि ' अत्रि ' इति मूलप्रकृतिः ।

अत्रेरपत्यं स्त्री ' आत्रेयी ' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवज्ज्ञेयानि ॥

## (१२६) अकारान्तः पुँल्लिङ्गः 'औपकायन' शब्दः

उपकस्य गोत्रापत्यं वृद्धं पुमान् औपकायनः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | औपकायनः | औपकायनौ | उपकाः<br>औपकायनाः |
| द्वि० | औपकायनम् | ,, | उपकान्<br>औपकायनान् |
| तृ० | औपकायनेन | औपकायनाभ्याम् | उपकैः<br>औपकायनैः |
| च० | औपकायनाय | ,, | उपकेभ्यः<br>औपकायनेभ्यः |
| प० | औपकायनात्<br>औपकायनाद् | ,, | उपकेभ्यः<br>औपकायनेभ्यः |
| ष० | औपकायनस्य | औपकायनयोः | उपकानाम्<br>औपकायनानाम् |
| स० | औपकायने | ,, | उपकेषु<br>औपकायनेषु |
| सं० | हे औपकायन | हे औपकायनौ | हे उपकाः<br>हे औपकायनाः |

एवं लामकायनः। उपकशब्दस्य नडादौ पाठात् "नडादिभ्य आयनण्" [ ६, १, ५३ ] इत्यायनणि " अवर्णेवर्णस्य " [ ७, ४, ६८ ] इत्यन्त्याऽकारलुकि " वृद्धिः स्वरेष्वादे० " [ ७, ४, १ ] इत्याद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च 'औपकायन' इति प्रकृतिः; बहुत्वे तु " वोपकादेः " [ ६, १, १३० ] इत्यनेन बहुत्वविशिष्टे गोत्रापत्येऽर्थे वर्त्तमानस्य नडादिविहितस्यायनणो विकल्पेन लुप् भवति, लुप्पक्षे 'उपक' इति मूलप्रकृतिः, लुबभावपक्षे च 'औपकायन' इत्येवंरूपा प्रकृतिर्विज्ञेया ॥

## स्त्रियां तु—

उपकस्यापत्यं वृद्धं स्त्री 'औपकायनी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवदवसेयानि । अत्र " जातेरयान्त० " [ २, ४, ५४ ] इत्यनेन 'गोत्र च चरणैः सह' इति वचनात् जातिलक्षणो ङीर्भवतीति भावनीयम्॥

लमकस्यापत्यं वृद्धं स्त्री 'लामकायनी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्भवन्ति । शेषं सर्वं 'औपकायनी' वद्बोध्यम् ॥

## (१२७) अकारान्तः पुँल्लिङ्गः 'माण्डूक' शब्दः ।

मण्डूकस्यापत्यं पुमान् माण्डूकः ॥

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | माण्डूकः | माण्डूकौ | माण्डूकाः |

एवं सर्वाण्यपि रूपाणि 'जिन' (७४) शब्दवद्बोध्यानि ।

अत्र मण्डूकशब्दादपत्येऽर्थे " पीलासाल्वामण्डूकाद्वा " [ ६, १, ६८ ] इति सूत्रेणाऽण्प्रत्ययो विकल्पेन भवति। यदाऽण् तदाऽन्त्याऽकारलुक्याद्यस्वरवृद्धौ च सत्यां ' माण्डूक ' इति भवति । अणभावपक्षे तु " दितेश्चैयण् वा " [ ६, १, ६९ ] इत्यस्मिन् सूत्रे चकारेण मण्डूकस्यानुकर्षणात्तत एयण् विकल्पेन भवति; यदा एयण् तदा 'माण्डूकेय' इति स्यात् । उपर्युक्तसूत्रद्वयस्य

विकल्पत्वात्तयोरभावपक्षे " अत इञ् " [ ६, १, ३१ ] इति इञि " अवर्णेवर्णस्य " [७, ४, ६८] इतीकारलुकि " वृद्धिः स्वरेष्वादे०'' [७, ४, १] इत्याद्याकारवृद्धौ च सत्याम् 'माण्डूकि' रिति। एवं मण्डूकशब्दादपत्येऽर्थे तिस्रः प्रकृतयो भवन्तीति बोध्यम् ।

माण्डूकेयशब्दस्य रूपाणि 'जिन' (७४) वत्, माण्डूकिशब्दस्य तु रूपाणि वक्ष्यमाण 'मुनि' (१७५) शब्दवज्ज्ञेयानि ॥

## स्त्रियां तु—

मण्डूकस्यापत्यं स्त्री 'माण्डूकायनी', 'माण्डूकेयनी', 'माण्डूकी' इति निरुक्तशब्दत्रयस्य तिसृणां प्रकृतीनां सर्वाण्यपि रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्विज्ञेयानि ।

अत्राऽयं विशेषः—यदा " पीलासाल्वामण्डूकाद्वा " [ ६, १, ६८ ] इत्यनेनाऽण् तदा " कौरव्यमाण्डूकासूरेः " [ २, ४, ७० ] इति ङीर्भवति तत्सन्नियोगे डायन् चान्तः स्यात्तेन 'माण्डूकायनी' इति भवति । यदा च "दितेश्चैयण् वा " [ ६. १, ६९ ] इत्येयण् तदा " अणञेयेकण्० " [२, ४. २०, ] इति ङ्याम् " अस्य ङ्यां लुक " [ २, ४, ८६ ] इत्यकारलुकि 'माण्डूकेयी' इति भवति । यदा तु " अत इञ् " [ ६, १, ३१ ] इतीञ् तदा " नुर्जातेः " [ २, ४, ७२ ] इति ङीर्भवति, तदनु " अस्य ङ्यां लुक् " इत्यकारलुकि 'माण्डूकी' इति भवतीति भावनीयम् ॥

## (१२८) अकारान्तः पुँल्लिङ्गः 'कौषीतकेय' शब्दः ।

कुषीतकस्यापत्यं पुमान् काश्यपः कौषीतकेयः ॥

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | कौषीतकेयः | कौषीतकेयौ | कुषीतकाः<br>कौषीतकेयाः |
| द्वि० | कौषीतकेयम् | ,, | कुषीतकान्<br>कौषीतकेयान् |

| | | | |
|---|---|---|---|
| तृ० | कौषीतकेयेन | कौषीतकेयाभ्याम् | कुषीतकैः<br>कौषीतकेयैः |
| च० | कौषीतकेयाय | ,, | कुषीतकेभ्यः<br>कौषीतकेयेभ्यः |
| प० | कौषीतकेया-त्,द् | ,, | कुषीतकेभ्यः<br>कौषीतकेयेभ्यः |
| ष० | कौषीतकेयस्य | कौषीतकेययोः | कुषीतकानाम्<br>कौषीतकेयानाम् |
| स० | कौषीतकेये | ,, | कुषीतकेषु<br>कौषीतकेयेषु |
| सं० | हे कौषीतकेय | हे कौषीतकेयौ | हे कुषीतकाः<br>हे कौषीतकेयाः |

अत्र कुषीतकशब्दात् काश्यपेऽपत्यविशेषेऽर्थे "विकर्णकुषीतकात्काश्यपे" [६, १, ७५] इत्येयणि "अवर्णे०" [७, ४, ६८] इत्यन्त्याऽकारलुकि "वृद्धिः स्वरेष्वादे०" [७, ४, १] इत्याद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च "कौषीतकेय" इति प्रकृतिः; बहुत्वे तु "यौपकादेः" [६, १, १३०] इत्यनेन बहुत्वविशिष्टे गोत्रापत्ये वर्त्तमानस्यैयणो विकल्पेन लुब्भवति, तेन यदा तु लुप् तदा 'कुषीतक' इति मूलप्रकृतिः, तदभावे च 'कौषीतकेय' इति प्रकृतिर्ज्ञेया ॥

## स्त्रियां तु--

कुषीतकस्यापत्यं स्त्री काश्यपी 'कौषीतकेयी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवज्ज्ञेयानि । एयणन्तत्वादस्य "अणञेयेकण्०" [२, ४, २०] इति ङ्यन्तत्वम् ॥

## (१२९) अकारान्तः पुँल्लिङ्गः 'मासुरकर्ण' शब्दः ।

**मसुरवत् कर्णौ यस्य स मसुरकर्णः, तस्यापत्यं गोत्रं पुमान् मासुरकर्णः॥**

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | मासुरकर्णः | मासुरकर्णौ | मसुरकर्णाः<br>मासुरकर्णाः |

| | | | |
|---|---|---|---|
| द्वि० | मासुरकर्णम् | मासुरकर्णौ | मसुरकर्णान् / मासुरकर्णान् |
| तृ० | मासुरकर्णेन | मासुरकर्णाभ्याम् | मसुरकर्णैः / मासुरकर्णैः |

एवं—कार्णक, पार्णक, जाटिलक, बाधिरक इति चत्वारः शब्दाः ज्ञेयाः

एवं शेषाणि रूपाणि 'जिन' ( ७४ ) शब्दवद्विज्ञेयानि । किन्त्वयं विशेषः मसुरकर्णशब्दस्य शिवादिपाठात् "शिवादेरण्" [ ६, १, ६० ] इति अणि, अन्त्याकारलुक्याद्यस्वरवृद्धावेकत्वे द्वित्वे च 'मासुरकर्ण' इति प्रकृतिः; बहुत्वे तु "वोपकादेः" [ ६, १, १३० ] इत्यनेन बहुत्वविशिष्टे गोत्रापत्येऽर्थे वर्त्त॰मानस्याऽणो लुप् विकल्पेन भवति, तेन यदा लुप् तदा 'मसुरकर्ण' इति प्रकृतिर्यदा तु तदभावस्तदा 'मासुरकर्ण' इति प्रकृतिः, एवं बहुवचने निरुक्ते द्वे प्रकृती स्वधिया ज्ञेये ॥

## स्त्रियां तु—

मसुरकर्णस्यापत्यं स्त्री 'मासुरकर्णी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवज्ज्ञेयानि । एवं-कार्णकी, पार्णकी, जाटिलकी, बाधिरकी शब्दानामपि ॥

## (१३०) अकारान्तः पुँल्लिङ्गः 'पातञ्जल' शब्दः ।

पतोऽञ्जलेः पतञ्जलिः, तस्यापत्यं गोत्रं पुमान् पातञ्जलः ॥

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | पातञ्जलः | पातञ्जलौ | पतञ्जलयः / पातञ्जलाः |
| द्वि० | पातञ्जलम् | ,, | पतञ्जलीन् / पातञ्जलान् |
| तृ० | पातञ्जलेन | पातञ्जलाभ्याम् | पतञ्जलिभिः / पातञ्जलैः |

| | | | |
|---|---|---|---|
| च० | पातञ्जलाय | पातञ्जलाभ्याम् | पतञ्जलिभ्यः<br>पातञ्जलेभ्यः |
| प० | पातञ्जलात्<br>पातञ्जलाद् | ,, | पतञ्जलिभ्यः<br>पातञ्जलेभ्यः |
| ष० | पातञ्जलस्य | पातञ्जलयोः | पतञ्जलीनाम्<br>पातञ्जलानाम् |
| स० | पातञ्जले | ,, | पतञ्जलिषु<br>पातञ्जलेषु |
| सं० | हे पातञ्जल | हे पातञ्जलौ | हे पतञ्जलयः<br>हे पातञ्जलाः |

अत्र पतञ्जलिशब्दादपत्येऽर्थे "ङसोऽपत्ये" ( ६, १, २८, ) इत्यनेनौत्सर्गिकोऽण् भवति, तदनु "अवर्णेवर्णस्य" [ ७, ४, ६८, ] इतीकारलुकि "वृद्धिः स्वरेष्वादे०" [ ७, ४, १, ] इत्याद्यस्वरवृद्धौ च सत्यामेकत्वे द्वित्वे च 'पातञ्जल' इति प्रकृतिः; बहुत्वे तु " वोपकादेः " [ ६, १, १३०, ] इति सूत्रेण बहुत्वविशिष्टे गोत्रापत्येऽर्थे वर्त्तमानस्याणो विकल्पेन लुप् भवति, ततो लुप् पक्षे 'पातञ्जल' इति प्रकृतिः, लुबभावपक्षे च 'पतञ्जलि' इति मूलप्रकृतिः । एवं बहुवचने प्रकृतियुग्मम् ॥

## स्त्रियां तु—

पतञ्जलेरपत्यं स्त्री 'पातञ्जली' इत्येतद्रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवज्ज्ञेयानि । अणन्तत्वादस्य "अणञे०" (२, ४, २०,) इति ङीर्भवति ॥

## (१३१) अकारान्तः पुँल्लिङ्गो नित्यंबहुवचनान्तः 'अङ्गवङ्गसुह्म' शब्दः ।

आङ्गश्च वाङ्गश्च सौह्मश्च=अङ्गवङ्गसुह्माः ॥

| | | | |
|---|---|---|---|
| वि० | बहुवचनम् | वि० | बहुवनम् |
| प्र० | अङ्गवङ्गसुह्माः | द्वि० | अङ्गवङ्गसुह्मान् |

| | | | |
|---|---|---|---|
| तृ० | अङ्गवङ्गसुह्मैः | ष० | अङ्गवङ्गसुह्मानाम् |
| च० | अङ्गवङ्गसुह्मेभ्यः | स० | अङ्गवङ्गसुह्मेषु |
| पं० | ,, | सं० | हे अङ्गवङ्गसुह्माः |

अत्र " पुरुमगधकलिङ्गशूरमसद्विस्वरादण् " [ ६, १, ११६, ] इति द्विस्वरलक्षणस्याऽण्प्रत्ययस्य " द्रयादेस्तथा " [ ६, १, १३२, ] इति सूत्रेण लुप् भवतीति बोध्यम् ॥

## (१३२) अकारान्तः पुँल्लिङ्गो नित्यंबहुवचनान्तः

## 'वृकलोहध्वजकुण्डीवृश' शब्दः ।

वार्केण्यश्च लौहध्वज्यश्च कौण्डीवृश्यश्च=वृकलोहध्वजकुण्डीवृशाः ॥

| वि० | बहुवचनम् | वि० | बहुवचनम् |
|---|---|---|---|
| प्र० | वृकलोहध्वजकुण्डीवृशाः | पं० | वृकलोहध्वजकुण्डीवृशेभ्यः |
| द्वि० | वृकलोहध्वजकुण्डीवृशान् | ष० | वृकलोहध्वजकुण्डीवृशानाम् |
| तृ० | वृकलोहध्वजकुण्डीवृशैः | स० | वृकलोहध्वजकुण्डीवृशेषु |
| च० | वृकलोहध्वजकुण्डीवृशेभ्यः | सं० | हे वृकलोहध्वकुण्डीवृशाः |

अत्र वृकशब्दात् "वृकाट्टेण्यण्" [ ७, ३, ६४, ] इति टेण्यण्प्रत्ययस्य, लोहध्वजशब्दात् " पूगादमुख्यकाञ्ज्यो द्रिः " [ ७, ३, ६०, ] इति द्रेर्ञ्यस्य, कुण्डीवृशशब्दाच्च " बाहीकेष्वब्राह्मणराजन्येभ्यः " [७, ३, ६३,] इति ञ्यट्प्रत्ययस्य च " द्रयादेस्तथा " [ ६, १, १३२, ] इति सूत्रेण [निरुक्तानां प्रत्ययानां] लुप् भवतीति ज्ञेयम् ॥

## (१३३) अकारान्तः पुँल्लिङ्गो नित्यंबहुवचनान्तः

## 'भृगुवत्साग्रायण' शब्दः ।

भार्गवश्च वात्स्यश्चाग्रायणश्च=भृगुवत्साग्रायणाः ॥

| वि० | बहुवचनम् | |
|---|---|---|
| प्र० | भृगुवत्साग्रायणाः | भार्गववात्स्याग्रायणाः |

| | | |
|---|---|---|
| द्वि० | भृगुवत्साग्रायणान् | भार्गववात्स्याग्रायणान् |
| तृ० | भृगुवत्साग्रायणैः, | भार्गववात्स्याग्रायणैः |
| च० | भृगुवत्साग्रायणेभ्यः | भार्गववात्स्याग्रायणेभ्यः |
| प० | ,, | ,, |
| ष० | भृगुवत्साग्रायणानाम् | भार्गववात्स्याग्रायणानाम् |
| स० | भृगुवत्साग्रायणेषु | भार्गववात्स्याग्रायणेषु |
| सं० | हे भृगुवत्साग्रायणाः, | हे भार्गववात्स्याग्रायणाः |

अत्र ऋषिवाचकाद् भृगुशब्दात् "ऋषिवृष्ण्यन्धककुरुभ्यः" [६, १, ६१,] इति ऋषिलक्षणस्याणः, गर्गादिपठितवत्सशब्दाच्च "गर्गादेर्यञ्" [६, १, ४२,] इति यञश्च " वान्येन " [ ६, १, १३३, ] इत्यनेन [उपर्युक्तप्रत्ययद्वयस्य] विकल्पेन लुप् भवति; तेन यदा लुप् तदा 'भृगुवत्साग्रायण' इति प्रकृतिः, यदा तु तदभावस्तदा 'भार्गववात्स्याग्रायण' इति प्रकृतिर्भवतीति ज्ञेयम् ॥

## (१३४) अकारान्तः पुँल्लिङ्गो नित्यंबहुवचनान्तः 'गर्गवत्सौपगव' शब्दः ।

गार्ग्यश्च वात्स्यश्चौपगवश्च=गर्गवत्सौपगवाः ॥

| वि० | बहुवचनम् | |
|---|---|---|
| प्र० | गर्गवत्सौपगवाः, | गार्ग्यवात्स्यौपगवाः |
| द्वि० | गर्गवत्सौपगवान्, | गार्ग्यवात्स्यौपगवान् |
| तृ० | गर्गवत्सौपगवैः | गार्ग्यवात्स्यौपगवैः |
| च० | गर्गवत्सौपगवेभ्यः, | गार्ग्यवात्स्यौपगवेभ्यः |
| प० | ,, | ,, |
| ष० | गर्गवत्सौपगवानाम् | गार्ग्यवात्स्यौपगवानाम् |
| स० | गर्गवत्सौपगवेषु | गार्ग्यवात्स्यौपगवेषु |
| सं० | हे गर्गवत्सौपगवाः | हे गार्ग्यवात्स्यौपगवाः |

अत्र गर्गशब्दात् वत्सशब्दाच्च " गर्गादेर्यञ् " [ ६. १. ४२ ] इति वृद्धापत्यलक्षणस्य यञ्प्रत्ययस्य " वान्येन " [ ६. १. १३३ ] इति सूत्रेण लुब् वा भवति तेन लुप्पक्षे 'गर्गवत्सौपगव' इति, लुबभावपक्षे च "गार्ग्यवात्स्यौपगव " इति प्रकृतिर्विज्ञेया ॥

## (१३५) अकारान्तः पुँल्लिङ्गो नित्यबहुवचनान्तः 'गर्गकश्यपगालव' शब्दः ।

गार्ग्यश्च काश्यपश्च गालवश्च=गर्गकश्यपगालवाः ॥

| वि० | बहुवचनम् । | |
|---|---|---|
| प्र० | गर्गकश्यपगालवाः | गार्ग्यकाश्यपगालवाः |
| द्वि० | गर्गकश्यपगालवान् | गार्ग्यकाश्यपगालवान् |
| तृ० | गर्गकश्यपगालवैः | गार्ग्यकाश्यपगालवैः |
| च० | गर्गकश्यपगालवेभ्यः | गार्ग्यकाश्यपगालवेभ्यः |
| प० | " | " |
| ष० | गर्गकश्यपगालवानाम् | गार्ग्यकाश्यपगालवानाम् |
| स० | गर्गकश्यपगालवेषु | गार्ग्यकाश्यपगालवेषु |
| सं० | हे गर्गकश्यपगालवाः | हे गार्ग्यकाश्यपगालवाः |

अत्र गर्गशब्दाद् वृद्धापत्येऽर्थे विहितस्य यञः, कश्यपशब्दाच्च "बिदादे र्वृद्धे " [ ६. १ ४१ ] इत्यनेनाऽपि वृद्धेऽपत्येऽर्थे विहितस्याऽञः "वान्येन', [ ६. १. १३३ ] इति विकल्पेन लुप् भवति; तेन लुपि 'गर्गकश्यपगालव इति प्रकृतिः, अलुपि च 'गार्ग्यकाश्यपगालव' इति प्रकृतिर्विज्ञेया ॥

इति श्रीमत्तपोगणाम्बराम्बरमणि-शासनसम्राट्-स्वपरसमयपारावारपारीणाऽऽ-चार्यचक्रचूडामणि-कलिकालकल्पतरुकल्प-तीर्थरक्षैकदक्ष-सुगृहीतनामधेय-जगद्गुरु-परमपूज्य पूज्यपाद-परमोपकारि-भट्टारकाचार्यवर्य-श्रीमद्विज-यनेमिसूरीश्वर--पट्टालङ्कार--व्याकरणवाचस्पति--कविरत्न--शास्त्र-विशारद-विबुधशिरोमणि-परमपूज्य-परमोपकारि-श्रीमद्गुरुरा-जभट्टारकगणाचार्य-श्रीमद्विजयलावण्यसूरीश्वर-चरणार-विन्दमिलिन्दायमान-विनेयमुनि-दक्षविजय--विरचिते

## श्रीस्याद्यन्तरत्नाकरे स्वरान्तप्रकरणस्थम्-अकारान्तं तद्धितान्तप्रकरणम् ॥



# ॥ अथ त्रिलिङ्गका अकारान्ता एकोनविंशतिः शब्दाः ॥

(१३६) अकारान्तस्त्रिलिङ्गकः 'स्वर्गकाम' शब्दः । तत्र पुँलिङ्गे—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | स्वर्गकामः | स्वर्गकामौ | स्वर्गकामाः |
| द्वि० | स्वर्गकामम् | ,, | स्वर्गकामान् |
| तृ० | स्वर्गकामेण | स्वर्गकामाभ्याम् | स्वर्गकामैः |
| च० | स्वर्गकामाय | ,, | स्वर्गकामेभ्यः |
| प० | स्वर्गकामा-त् ,द् | ,, | ,, |
| ष० | स्वर्गकामस्य | स्वर्गकामयोः | स्वर्गकामाणाम् |
| स० | स्वर्गकामे | ,, | स्वर्गकामेषु |
| सं० | हे स्वर्गकाम | हे स्वर्गकामौ | हे स्वर्गकामाः |

एवम्--धर्मकाम, मोक्षकाम, क्षीरप, यूषप, उरःप, गुरुमुख, पुष्पमेव-प्रभृतयः ।

---

१. स्वर्गं कामयते इच्छतीति " शीलिकामिभक्ष्याचरीक्षिक्षमो णः " [ ५ । १ । ७३ ] इति णप्रत्यये स्वर्गकामशब्दनिष्पत्तिः ।

## स्त्रीलिङ्गे तु--

आत् " [ २, ४, १८ ] इत्यादि 'स्वर्गकामा' इत्यस्य वक्ष्यमाण 'दया' ( १६५ ) शब्दवद्रूपाणि बोध्यानि, षष्ठीबहुवचने ' स्वर्गकामाणाम् ' इति णत्वविशेषः ।

## नपुंसकलिङ्गे तु--

वक्ष्यमाण 'चारित्र' (१५७) शब्दवद्रूपाणि ज्ञेयानि ॥

अत्र " रषृवर्णान्नोण० " [ २, ३, ६३ ] इति नित्यं प्राप्तं " वोत्तरपद० " [ २, ३, ७५ ] इति विकल्पितं " कवर्गैक० " [ २, ३, ७६ ] इत्यनेन नित्यं णत्वं भवतीति प्रदर्शनार्थमस्योपादानम् ॥

## (१३७) अकारान्तस्त्रिलिङ्गकः 'व्रीहिवाप' शब्दः । तत्र पुंसि--

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | व्रीहिवापः | व्रीहिवापौ | व्रीहिवापाः |
| द्वि० | व्रीहिवापम् | ,, | व्रीहिवापान् |
| तृ० | व्रीहिवापेन / व्रीहिवापेण | व्रीहिवापाभ्याम् | व्रीहिवापैः |
| च० | व्रीहिवापाय | ,, | व्रीहिवापेभ्यः |
| प० | व्रीहिवापात्-द् | ,, | ,, |
| ष० | व्रीहिवापस्य | व्रीहिवापयोः | व्रीहिवापानाम् / व्रीहिवापाणाम् |
| स० | व्रीहिवापे | ,, | व्रीहिवापेषु |
| सं० | हे व्रीहिवाप | हे व्रीहिवापौ | हे व्रीहिवापाः |

एवम्--माषवापप्रभृतीनां शब्दानां रूपाणि बोध्यानि ॥

१. 'टुवपीं बीजसन्ताने' इत्यस्य वपनं वापः, व्रीहीणां वापो व्रीहिवाप इति विग्रहे तु पुंस्येवास्य रूपाणि भवन्ति; व्रीहीन्वपतीति विग्रहे तु त्रिष्वपि लिङ्गेषु ॥

" वोत्तरपदान्तनस्यादेरयुवपक्वाह्नः [ २, ३, ७५ ]" इति तृतीयैकवचने षष्ठीबहुवचने च स्यादिनिमित्तस्य नस्य णत्वविकल्पः, एतत्प्रदर्शनार्थमेवास्योपादानम् ॥

## स्त्रियां तु--

" कर्मणोऽण् " [ ५, १, ७२ ] इत्यणि "अणञेयेकण्नञ्स्नञ्टिताम्" [ २, ४, २० ] इति ङीप्रत्यये ' व्रीहिवापी ' इति, एतद्रूपाणि वक्ष्यमाण 'नदी' ( २२५ ) शब्दवज्ज्ञेयानि; अपि तु षष्ठीबहुवचने ' व्रीहिवापीनाम्, व्रीहिवापीणाम् ' इति णत्वविकल्पविशेषः ॥

## नपुंसकलिङ्गे तु--

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | व्रीहिवापम् | व्रीहिवापे | व्रीहिवापानि<br>व्रीहिवापाणि |
| द्वि० | ,, | ,, | ,, |
| तृ० | व्रीहिवापेन<br>व्रीहिवापेण | व्रीहिवापाभ्याम् | व्रीहिवापैः |
| च० | व्रीहिवापाय | ,, | व्रीहिवापेभ्यः |
| प० | व्रीहिवापा-त्-द् | ,, | ,, |
| ष० | व्रीहिवापस्य | व्रीहिवापयोः | व्रीहिवापानाम्<br>व्रीहिवापाणाम् |
| स० | व्रीहिवापे | ,, | व्रीहिवापेषु |
| सं० | हे व्रीहिवाप | हे व्रीहिवापे | हे व्रीहिवापानि<br>हे व्रीहिवापाणि |

एवम्--माषवाप-प्रभृतयः ॥

## (१३८) अकारान्तस्त्रिलिङ्गकः 'निर्जर' शब्दः । तत्र पुंसि-

जीर्यतेऽनयेति जरा, जराया वृद्धावस्थाया निर्गतो निर्जरः, अथवा निर्गता जरा यस्मात् स निर्जरोऽमरः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | निर्जरः | निर्जरसौ, निर्जरौ [1] | निर्जरसः, निर्जराः |
| द्वि० | निर्जरसम्, निर्जरम् | निर्जरसौ, निर्जरौ | निर्जरसः, निर्जरान् |
| तृ० | निर्जरसा [2], निर्जरेण | निर्जराभ्याम् | निर्जरसैः, निर्जरैः [3] |
| च० | निर्जरसे, निर्जराय | ,, | निर्जरेभ्यः |
| प० | निर्जरसः, निर्जरा-त्, द् [4] | ,, | ,, |
| ष० | निर्जरसः, निर्जरस्य | निर्जरसोः, निर्जरयोः | निर्जरसाम्, निर्जराणाम् |
| स० | निर्जरसि, निर्जरे | निर्जरसोः, निर्जरयोः | निर्जरेषु |
| सं० | हे निर्जर | हे निर्जरसौ, हे निर्जरौ | हे निर्जरसः, हे निर्जराः |

एवम्---अतिजर, अजर-प्रभृतयः ॥

जरामतिक्रान्तोऽतिजरः, अथवा अतिशयिता जरा यस्य सोऽतिजरः । न विद्यते जरा यस्य सोऽजर, अमर इत्यर्थः ॥

१ अत्र अन्यपदार्थे प्रधानो बहुव्रीहिरस्ति, तेनान्यपदार्थे " गोश्चान्ते ह्रस्वोऽनंशिसमासे यो बहुव्रीहौ " [ २, ४, ९६ ] इति सूत्रेण ह्रस्वत्वे कृते 'एकदेशविकृतमनन्यवद्' इति न्यायेन जरशब्दस्यापि जराशब्दत्वम्, तेन

" जराया जरस् वा " [ २, १, ३ ] इति सूत्रेण स्वरादिस्यादिप्रत्ययेषु परेषु 'जरस्' इत्यादेशो विकल्पेन भवतीति बोध्यम् ।

२ केचित्तु तृतीयैकवचने 'निर्जरसिन' इत्येवं रूपमप्यभिलषन्ति ।

३ केषांचिन्मते तु तृतीयाबहुवचने ' निर्जरैः ' इत्येकमेव रूपं भवति, यतस्ते तृतीयाबहुवचने स्वरपरत्वाभावेन जरसादेशं नेच्छन्ति ।

४ केचन वैयाकरणाः पञ्चम्येकवचने 'निर्जरसात्' इति रूपमपीच्छन्ति॥

## स्त्रियां तु—

जराया निर्गता, निर्गता जरा यस्या वा सा, 'निर्जरा' । जरामतिक्रान्ता, अतिशयिता जरा यस्यां यस्या वा सा 'अतिजरा' । न विद्यते जरा यस्यां यस्या वा सा 'अजरा'। एतेषु शब्देषु विभक्तः 'आप्' प्रत्ययेन व्यवधानान्न जरसादेशस्तेनैतेषां शब्दानां रूपाणि वक्ष्यमाण 'दया' (१६५) शब्दवद्बोध्यानि, नवरं षष्ठी बहुवचने ' निर्जराणाम् ' ' अतिजराणाम् ' ' अजराणाम् ' इति णत्वविशेषः ॥

---

केषाञ्चिन्मते तु विप्रतिषेधसूत्रे ( " स्पर्द्धे " ७, ४, ११९ इति सूत्रे ) परशब्दस्य इष्टार्थवाचित्वेन इनातोः कृतयोः सन्निपातपरिभाषाया अनित्यत्वमाश्रित्य जरसि कृते ' निर्जरसिन, निर्जरसाद् ' इति रूपे, न तु ' निर्जरसा, निर्जरसः ' इति ॥

' निर्जरै ' रिति भवितव्यं सन्निपातपरिभाषया, भाष्यवचनात् 'निर्जरैः' इत्येकमेव रूपं भवतीति ॥

स्वमते " भिस् ऐस् " [ १.४ २ ] इत्यत्र ऐस्करणसामर्थ्यात्, ऐस्विधावेव सन्निपातपरिभाषाया अनित्यत्वाभ्युपगमो नान्यत्र ॥

卐 'निर्जरसा' इत्यत्र परत्वात् नित्यत्वाच्च प्रागेव जरसादेशे कृतेऽदन्तत्वाभावः, अर्थात् इनादीन् बाधित्वा परत्वाज्जरसादेशो भवतीति भावः ।

## नपुंसकलिङ्गे तु—

| वि० | एकव० | द्विव० | बहु० |
|---|---|---|---|
| प्र० | निर्जरः निर्जरसम् निर्जरम् | निर्जरसी निर्जरे; | निर्जरांसि निर्जराणि |
| द्वि० | निर्जरः निर्जरसम् निर्जरम् | निर्जरसी निर्जरे; | निर्जरांसि निर्जराणि |
| सं० | हे निर्जर हे निर्जरसम् हे निर्जरः | हे निर्जरे हे निर्जरसी | हे निर्जरांसि हे निर्जराणि |

शेषं पुंवज्ज्ञेयम् । एवमतिजराजरप्रभृतय: ।

एवम्–जरामतिक्रान्तं यत् कुलादिकं तद् अतिजर; अतिजरसम्, 'अतिजरम्, अतिजरसी; अतिजरे, अतिजरांसि अतिजराणि, शेषं सर्वं नपुं० 'निजर' शब्दवज्ज्ञेयम् ।

एवं पुनः–न विद्यते जरा यस्मिन् कुले तदजरम् कुलम् । एतद्रूपाण्यपि नपुं० निर्जर शब्दवद्बोध्यानि ॥

साधनीकेयम्—

'निर्जर+सि, निर्जर+अम्' इति स्थिते "अत: स्यमोऽम्" [१, ४, ५७] इति सूत्रेण स्यमोरमादेशः, [ अत्र अमोऽकारोच्चारणं जरसादेशार्थम् ] तदनु "जराया जरस् वा" [ २, १, ३ ] इति जरसादेशे "जरसो वा" [ १, ४, ६० ] इति स्यमो लुब्वा भवति, तेन लुपि 'निर्जरः' अलुपि च 'निर्जरसम्ः' जरसादेशस्यापि वैकल्पिकत्वेन पक्षे 'निर्जरम्' इति । एवं प्रथमा-द्वितीयैकवचने रूपत्रयसिद्धिः ॥

सम्बोधनेऽपि एवमेव, नवरं जरसाभावपक्षे "अदेतः स्यमोर्लुक्" [ १, ४, ४४ ] इति सेर्लुकि 'हे निर्जर' इति विशेषः ॥

'निर्जर×औ' इति स्थिते " औरीः " [ १, ४, ५६ ] इति औस्थाने 'ई' इत्यादेशे, जरसादेशे च 'निर्जरसी', तदभावे तु 'निर्जरे' इति ॥

जसि शसि च ' नपुंसकस्य शिः " [ १, ४, ५५ ] इति जस्शसोः शिरित्यादेशे "स्वराच्छौ " [ १, ४, ६५ ] इति नेऽन्ते सति "नि दीर्घः" [ १, ४, ८५ ] इति दीर्घे " रषृवर्णात्० " [ २, ३, ६३ ] इति नस्य णत्वे ' निर्जराणि ' । जरसादेशपक्षे तु शौ सति परत्वाज्जरसादेशे, "धुटां प्राक्" [ १, ४, ६६ ] इति नेऽन्ते, "न्स्महतोः" [ १, ४, ८६ ] इति दीर्घत्वे " शिड्ढेऽनुस्वारः "[ १, ३, ४० ] इति नस्यनुस्वारे च सति 'निर्जरांसी' इति ॥ शेषा साधनिका सुगमैव ॥

मन्तारे तु—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | निर्जरम् | निर्जरे, निर्जरसी | निर्जराणि, निर्जरांसि |
| द्वि० | निर्जरम्, निर्जरसम् | " | " |
| सं० | हे निर्जर | " | " |

शेषं पुंवद्बोध्यम् । एवं-अतिजराऽजरशब्दयोरपि ॥

## (१३९) अकारान्तस्त्रिलिङ्गकः 'अर्ध' शब्दः । तत्र पुँल्लिङ्गे—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अर्धः, अर्धौ | | अर्धे, अर्धाः |
| सं० | हे अर्ध, हे अर्धौ | | हे अर्धे, हे अर्धाः |

शेषाणि रूपाणि 'जिन' (७४) शब्दवज्ज्ञेयानि ।

१ अर्धशब्दोऽसमांशेऽर्थे पुँल्लिङ्गः ॥ अन्ये त्वसमांशे वाच्यलिङ्गमेनमाहुः ॥

२ व्यवस्थितविभाषाविज्ञानात् संज्ञायां द्वे रूपे न स्याताम्, यथा-अर्धा नाम केचित् ॥

एवम्-प्रथमाल्पशब्दौ ज्ञेयौ ॥

अत्र "नेमार्धप्रथमचरमतयायाल्पकतिपयस्य वा" [१, ४, १०] इति सूत्रेणाऽर्धशब्दस्य जस इर्वा स्यात् ।

अर्धसुदर्शनदेवनमह्राऽभिजनजनाः [१]परिघातनफेनौ ।
यूपायूपौ सूपकलापौ रेफः शोफः स्तम्बनितम्बौ ॥ १ ॥

इति लिङ्गानुशासनस्य पुंल्लिङ्गप्रकरणेऽर्धशब्दस्य पठनादस्य पुंस्त्वं ज्ञेयम् ॥

## स्त्रीलिङ्गे तु—

"आत्" (२, ४, १८] इत्यादि 'अर्धा' इत्यस्य रूपाणि वक्ष्यमाण 'दया' [१६५] शब्दवद्बोध्यानि; एवं 'प्रथमा' 'अल्पा' शब्दयोरपि ॥

## नपुंसकलिङ्गे तु—

वक्ष्यमाण 'दर्शन' [१५६] शब्दवद्रूपाणि भवन्ति । एवं प्रथमाल्पयोरपि॥
'समेंऽशे अर्धशब्द आविष्टलिङ्गी नपुंसकः' इति वचनादस्य क्लीबत्वम् ॥

## (१४०) अकरान्तस्त्रिलिङ्गकः '卐चरम' शब्दः । तत्र पुंसि—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | चरमः | चरमौ | चरमे [१] / चरमाः |
| द्वि० | चरमम् | ,, | चरमान् |
| तृ० | चरमेण卐 | चरमाभ्याम् | चरमैः |
| च० | चरमाय | ,, | चरमेभ्यः |
| प० | चरमात् द् | ,, | ,, |
| ष० | चरमस्य | चरमयोः | चरमाणाम्卐 |

卐 णत्ववैषम्यप्रदर्शनार्थं पृथगुपादानम् ॥

१ अत्रापि "नेमार्धप्रथमचरम०" [ १४, १० ] इति जसः स्थाने इर्वा भवति ॥

| | | | |
|---|---|---|---|
| स० | चरमे | चरमयोः | चरमेषु |
| सं० | हे चरम | हे चरमौ | हे चरमे<br>हे चरमाः |

## स्त्रियां तु—

"आत्" [ २, ४, १८ ] इत्यापि 'चरमा' इत्यस्य वक्ष्यमाण 'दया' (१६५) शब्दवद्रूपाणि ज्ञेयानि ॥

## नपुंसकलिङ्गे तु—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | चरमम् | चरमे | चरमाणि |
| द्वि० | " | " | " |
| सं० | हे चरम | हे चरमे | हे चरमाणि |

शेषं पुंवत्परिभावनीयम् ॥

## (१४१) अकारान्तस्त्रिलिङ्गकस्तयट्प्रत्ययान्तः 'द्वितय' शब्दः । तत्र पुंसि—

| वि० | एकव | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | द्वितयः, | द्वितयौ | द्वितये, द्वितयाः |
| सं० | हे द्वितय, | हे " | हे ", हे " |

शेषाणि सर्वाणि रूपाणि 'जिन' (७४) शब्दवदवसेयानि ॥

अत्र "अवयवात्तयट्" [ ७, १, १५१ ] इति सूत्रेणावयवे वर्त्तमानात् संख्यावाचिनः प्रथमान्तान्नाम्नः षष्ठ्यर्थे अवयविनि तयट् प्रत्ययो भवति

एवम्–एकतय, त्रितय, चतुष्टय, पञ्चतय, सप्ततय, दशतय, द्वादशतय-प्रभृतयः ॥

---

२ अत्रापि "नेमार्ध०" [ १, ४, १० ] इति जस इर्वा भवति, तेन–रूपद्वयम् ॥

यथा-एकतयोऽसंयमः। द्वितयो द्वयो वा जीवः। त्रितयः त्रयो वा मोक्षमार्गः। चतुष्टयो धर्मः। पञ्चतयो यमः। सप्ततयो नयः। दशतयः श्रमणधर्मः। द्वादशतयः सिद्धान्त इत्यादयः॥

## स्त्रियां तु--

एकतयी, द्वितयी, त्रितयी, चतुष्टयी, पञ्चतयी, सप्ततयी, दशतयी, द्वादशतयी च। एतेषां रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्बोध्यानि।

## नपुंसकलिङ्गे तु--

एकतयम्, द्वितयम्, त्रितयम्, चतुष्टयम्, पञ्चतयम्, सप्ततयम् दशतयम्, द्वादशतयम्, इत्यादीनां रूपाणि वक्ष्यमाण 'दर्शन' (१५६) शब्दवज्ज्ञेयानि॥

## (१४२) अकारान्तस्त्रिलिङ्गकोऽयट्प्रत्ययान्तः 'द्वय' शब्दः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | द्वयः, | द्वयौ | द्वये[1], द्वयाः |
| सं० | हे द्वय, | हे ,, | हे ,, हे ,, |

शेषाणि सर्वाण्यपि रूपाण्यस्य 'जिन' (७४) शब्दवज्ज्ञेयानि॥

अत्र "द्वित्रिभ्यामयड्वा" [७, १, १५२] इति सूत्रेण प्रथमान्ताभ्यामवयववाचिभ्यां द्वित्रिशब्दाभ्यां षष्ठ्यर्थे अवयविनि 'अयट्' प्रत्ययो विकल्पेन भवति।

तेन द्वौ अवयवौ यस्य स 'द्वयः' [द्वितयो वा]।

एवम्—त्रयशब्दो बोध्यः। यथा—त्रयो (ज्ञानदर्शनचारित्ररूपाः) अवयवा यस्य सः 'त्रयः' (त्रितयो वा मोक्षमार्गः)॥

---

१ अत्रापि नेमार्ध० [१, ४, १०] इति जस स्थाने इर्वा स्यात्।

## स्त्रियां तु —

द्वाववयवावस्या 'द्वयी' त्रयोऽवयवा अस्याः 'त्रयी' इति । एतद्रूपाणि वक्ष्यमाण 'नदी' ( २२५ ) शब्दवद्बोध्यानि । त्रयीशब्दस्य तु षष्ठीबहुवचने 'त्रयीणाम्' इति णत्वविशेषः । अत्राऽयट्प्रत्ययान्तत्वेन टित्वात् " अणञेयेकणनञ्स्नञ्टिताम् " [ २, ४, २० ] इति ङीप्रत्यये सति 'द्वयी' 'त्रयी' इति ॥

## नपुंसकलिङ्गे तु—

द्वाववयवावस्य द्वयं तपः । त्रयोऽवयवा अस्य त्रयं जगत् । द्वयशब्दस्य रूपाणि तु वक्ष्यमाण 'दर्शन' ( १५६ ) शब्दवत् , त्रयशब्दस्य तु वक्ष्यमाण 'चारित्र' ( १५७ ) शब्दवद्रूपाणि बोध्यानि ॥

## ( १४३ ) अकारान्तस्त्रिलिङ्गको बहुवचनान्तः 'कतिपय' शब्दः । तत्र पुंसि—

| वि० | बहुवचनम् |
|---|---|
| प्र० | कतिपये, कतिपयाः |
| द्वि० | कतिपयान् |
| तृ० | कतिपयैः |
| च० | कतिपयेभ्यः |
| पं० | ,, |
| ष० | कतिपयानाम् |
| स० | कतिपयेषु |
| सं० | हे कतिपये, हे कतिपयाः |

अत्र " नेमार्धप्रथमचरमतयायाल्पकतिपयस्य वा" [ १, ४, १० ] इति जस्प्रत्ययस्य 'इ' इत्यादेशो विकल्पेन भवति ॥

## स्त्रियां तु—

वक्ष्यमाण 'दया' (१६५) शब्दस्य बहुवचनवद्रूपाणि भवन्ति ॥

## नपुंसकलिङ्गे तु—

वक्ष्यमाण 'दर्शन' (१५६) शब्दस्य बहुवचनवद्रूपाणि वाच्यानि ॥

## ( १४४ ) अकारान्तस्त्रिलिङ्गकः 'नील' शब्दः । तत्र पुंसि—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | नीलः | नीलौ | नीलाः |

एवं शेषाणि सर्वाणि रूपाणि 'जिन' (७४) शब्दवदवसेयानि ॥

### स्त्रियां तु—

" नीलात् प्राण्यौषध्योः " [ २, ४, २७ ] इति प्राणिनि औषधौ च ङीप्रत्ययो भवति । यथा—नीली गौः, नीली औषधिः, अन्यत्र नीला शाटी; स्त्रीसंज्ञायां तु " क्ताच्च नाम्नि वा " [ २, ४, २८ ] इति वा ङीर्भवति । यथा 'नीली, नीला' इति ।

'नीली' इत्यस्य वक्ष्यमाण 'नदी' (२२५) शब्दवत्, 'नीला' इत्यस्य च वक्ष्यमाण 'दया' (१६५) शब्दवद्रूपाणि ज्ञेयानि ।

### क्लीबे तु—

वक्ष्यमाण 'दर्शन' (१५६) शब्दवद्रूपाणि वाच्यानि ॥

## ( १४५ ) अकारान्तस्त्रिलिङ्गकः 'शोण' शब्दः । तत्र पुंसि—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | शोणः | शोणौ | शोणाः |

एवं शेषाणि सर्वाणि रूपाणि 'जिन' (७४) शब्दवद्बोध्यानि ॥

### स्त्रियां तु—

" नवा शोणादेः " [२, ४, ३१] इति ङीप्रत्ययो विकल्पेन भवति, तेन यदा ङीस्तदा 'शोणी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद्बोध्यानि । ङ्यभावे तु आपि 'शोणा' इत्यस्य रूपाणि वक्ष्यमाण 'दया' ( १६५ ) शब्दवज्ज्ञेयानि ॥

### क्लीबे तु—

वक्ष्यवमाण 'दर्शन' (१५६) शब्दवद्रूपाणि भवन्ति ॥

## ( १४६ ) अकारान्तस्त्रिलिङ्गकः 'चण्ड' शब्दः । तत्र पुँल्लिङ्गे—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | चण्डः | चण्डौ | चण्डाः |

एवमवशिष्टानि रूपाणि 'जिन' ( ७४ ) शब्दवज्ज्ञेयानि ॥

### स्त्रीलिङ्गे तु—

" नवा शोणादेः " [२, ४, ३१] इति वा ङीस्तेन 'चण्डी चण्डा' इति द्वे प्रकृती, आद्याया वक्ष्यमाण 'नदी' (२२५) शब्दवदपरायाश्च वक्ष्यमाण 'दया' [१६५] शब्दवद्रूपाणि बोध्यानि ॥

क्लीबे तु—वक्ष्यमाण 'दर्शन' (१५६) शब्दवद्रुपाण्यवसेयानि ।

## ( १४७ ) अकारान्तस्त्रिलिङ्गकः 'श्येत' शब्दः । तत्र पुँल्लिङ्गे—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | श्येतः | श्येतौ | श्येताः |

एवं शेषाणि रूपाणि 'जिन' (७४) शब्दवद्भावनीयानि ॥

### स्त्रीलिङ्गे तु—

" श्येतैतहरितभरतरोहिताद्वर्णात्तो नश्च " [ २, ४, ३६ ] इति वर्णवाचिभ्यः श्येतादिशब्देभ्यो ङीर्वास्यात्तत्सन्नियोगे तकारस्य नकारादेशश्च भवति, तेन श्येतः शुक्लवर्णस्तद्वती स्त्री 'श्येनी, श्येता' इति प्रकृतिद्वयम् । वर्णवाचकादन्यस्मिन्नर्थे तु 'श्येता इति एकैव प्रकृतिः ।

'श्येनी' इत्यस्य वक्ष्यमाण 'नदी' (२२५) शब्दवत्, 'श्येता' इत्यस्य च वक्ष्यमाण 'दया' (१६५) शब्दवद्रूपाणि ज्ञेयानि ॥

### नपुंसकलिङ्गे तु—

वक्ष्यमाण 'दर्शन' (१५६) शब्दवद्रूपाणि वाच्यानि ॥

---

१ अत्र 'श्यैङ् गतौ' इत्यतः "हश्यारुहिशोणिपलिभ्य इतः [२१०] इति उणादिसूत्रेण 'इत' प्रत्यये सति श्येतशब्दोत्पत्तिः ॥

श्येतो वर्णो मृगो मत्स्यः श्येनश्च ॥

## ( १४८ ) अकारान्तस्त्रिलिङ्गकः 'एत' शब्दः । तत्र पुँल्लिङ्गे--

| वि० | एकव० | द्वि० | बहुव० |
|---|---|---|---|
| प्र० | एतः | एतौ | एताः |

एवमवशिष्टानि रूपाणि 'जिन' (७४) शब्दवज्ज्ञेयानि ॥

### स्त्रीलिङ्गे तु--

"श्येतैत०" [ २, ४, ३६ ] इति वर्णवाचकादेतशब्दाद् ङीर्वा स्यात्, ङीयोगे च तस्य नः स्यात् , तेन 'एनी, एता' इति प्रकृतियुग्मम् । तत्र 'एनी' इत्यस्य वक्ष्यमाण 'नदी' [२२५] शब्दवत्, 'एता' इत्यस्य वक्ष्यमाण 'दया' [१६५] शब्दवद्रूपाणि बोध्यानि ॥

### क्लीबे तु--

वक्ष्यमाण 'दर्शन' ( १५६ ) शब्दवदवसेयानि रूपाणि ॥

## ( १४९ ) अकारान्तस्त्रिलिङ्गकः 'हरित[1]' शब्दः । तत्र पुंसि--

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | हरितः | हरितौ | हरिताः |

एवं शेषाणि रूपाणि 'जिन' [७४] शब्दवद्बोध्यानि ॥

### स्त्रियां तु--

"श्येतैतहरित०" [ २, ४, ३६ ] इति वर्णवाचकहरितशब्दात् ङीर्वा भवति, तद्योगे च तकारस्य नकारादेशो भवति, तदनु "रषृवर्णात्०" [ २, ३, ६३ ] इति नस्य णत्वे 'हरिणी' इति, रूपाणि वक्ष्यमाण 'नदी' ( २२५ ) शब्दवदवसेयानि । ङ्यभावे तु "आत्" [२, ४, १८] इत्यापि 'हरिता' इति । रूपाणि च वक्ष्यमाण 'दया' (१६५) शब्दवद्वाच्यानि ॥

### क्लीबे तु--

वक्ष्यमाण 'दर्शन' [१५६] शब्दवद्रूपाणि बोध्यानि ॥

---

१ अत्र 'हृग् हरणे' इत्यतः "हृश्याऽरुहि०" (२१८) इति उणादिसूत्रत 'इत' प्रत्यये सति हरितशब्दनिष्पत्तिः । हरितो वर्णः ॥

## (१५०) अकारान्तस्त्रिलिङ्गकः 'भरित' शब्दः । तत्र पुंसि—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | भरितः | भरितौ | भरिताः |

एवमवशिष्टानि सर्वाणि रूपाणि 'जिन' (७४) शब्दवत् ॥

### स्त्रियां तु—

"श्येतैतहरितभरित०" [ २, ४, ३६ ] इति वर्णेऽर्थे ङीर्वास्यात्तद्योगे च तस्य नस्तदनु नस्य णत्वे कृते 'भरिणी' इत्यस्य रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवत्; ङ्यभावे तु आपि 'भरिता' इति, रूपाणि वक्ष्यमाण 'दया' (१६५) शब्दवत्परिभावनीयानि ॥

### क्लीबे तु—

वक्ष्यमाण 'दर्शन' (१५६) शब्दवद्रूपाणि भवन्ति ॥

## (१५१) अकारान्तस्त्रिलिङ्गकः 'पलित' शब्दः । तत्र पुँल्लिङ्ग—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | पलितः | पलितौ | पलिताः |

एवं शेषाणि रूपाणि 'जिन' (७४) शब्दवज्ज्ञेयानि ॥

### स्त्रियां तु—

" क्नः पलितासितात् " [ २, ४, ३७ ] इति पलितशब्दात् ङीप्रत्ययो विकल्पेन भवति तत्सन्नियोगे च तकारस्य क्नादेशो भवति, तेन 'पलिक्नी' 'पलिता' इति प्रकृतियुगलं जायते; एतद्रूपाणि अनुक्रमेण वक्ष्यमाण 'नदी' (२२५) शब्दवत् 'दया' (१६५) शब्दवच्च ज्ञेयानि ॥

---

अत्र "हृश्यारुहिशोणिपलिभ्यः०" [२१०] इति उणादिसूत्रेण 'पल गतौ' इत्यत 'इत' प्रत्यये सति 'पलित' शब्दसिद्धिः । पलितः श्वेतकेशः ॥

## नपुंसक लिङ्गे तु—

रूपाणि वक्ष्यमाण 'दर्शन' (१५६) शब्दवदवसेयानि ॥

## (१५२) अकारान्तस्त्रिलिङ्गकः 'असित' शब्दः । तत्र पुँल्लिङ्गे—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | असितः | असितौ | असिताः |

एवं शेषाणि रूपाणि 'जिन' (७४) शब्दवद्भावनीयानि ॥

## स्त्रीलिङ्गे तु—

'असिक्नी, असिता' इति शब्दद्वयस्य रूपाण्यनुक्रमेण वक्ष्यमाण 'नदी' (२२५) शब्दवत 'दया' (१६५) शब्दवच्च चिन्तनीयानि ।

अत्र " क्नः पलितासितात् [ २, ४, ३७ ] इति असितशब्दाद् ङीर्वा स्यात्तद्योगे च तकारस्य क्नादेशो भवति, तेन ङीपक्षे 'असिक्नी,' ङ्यभावे तु आपि 'असिता' इति ॥

असितशब्देनाधर्मानृतन्यायेन सितप्रतिपक्षो वर्ण उच्यते, तदैव ङीप्रत्ययः क्नादेशश्च । यदा तु सिता बद्धा, न सिताऽसितेति, तदा न स वर्ण इति तत्र द्वयमपि न भवति ।

या गौर्लव्ध्यपि गर्भं दधाति सा 'असिक्नी' अन्तःपुरदूती च ॥

## नपुंसकलिङ्गे तु--

वक्ष्यमाण 'दर्शन' [ १५६ ] शब्दवद्रूपाणि बोध्यानि ॥

## (१५३) अकारान्तस्त्रिलिङ्गकः 'रोहित'[२] शब्दः । तत्र पुँल्लिङ्गे—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | रोहितः | रोहितौ | रोहिताः |

२ अत्र " हृश्यारुहिशोगिपलिभ्य इतः " [२१०] इत्युणादिसूत्रेण 'रुहं जन्मनि' इत्यतः 'इत' प्रत्यये सति रोहितशब्दनिष्पत्तिः । रोहितो वर्णो मत्स्यो मृगजातिश्च ॥

एवमवशिष्टानि रूपाणि 'जिन' (७४) शब्दवद्भवन्ति ॥

## स्त्रियां तु—

" श्येतैतहरितभरितरोहिताद्वर्णात्तो नश्च " [ २, ४, ३६ ] इति वर्णवाचकरोहितशब्दात् ङीर्वा स्यात्तद्योगे तस्य नश्च, तदनु नस्य णत्वे कृते 'रोहिणी' इति, रूपाणि वक्ष्यमाण 'नदी' ( २२५ ) शब्दवद्भवन्ति । ङ्यभावे तु आपि 'रोहिता' इति, रूपाणि च वक्ष्यमाण 'दया' ( १६५ ) शब्दवदवसेयानि ॥

## नपुंसके तु—

वक्ष्यमाण 'दर्शन' (१५६) शब्दवद्रूपाणि वाच्यानि ॥

## (१५४) अकारान्तस्त्रिलिङ्गकः 'प्रष्ठ' शब्दः । तत्र पुंसि—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | प्रष्ठः | प्रष्ठौ | प्रष्ठाः |

एवं शेषाणि रूपाणि 'जिन' (७४) शब्दवद्भवन्ति ॥

## स्त्रियां तु—

" धवाद्योगादपालकान्तात् " [ २, ४, ५९ ] इति धवयोगे ङ्यां सत्यां 'प्रष्ठी' ( प्रष्ठस्य भार्या इत्यर्थः ) इत्यस्य वक्ष्यमाण 'नदी' ( २२५ ) शब्दवद्रूपाणि भवन्ति । धवयोगाभावे तु आप्प्रत्यये 'प्रष्ठा' इत्यस्य रूपाणि वक्ष्यमाण 'दया' (१६५) शब्दवद् बोध्यानि ॥

## क्लीबे तु—

वक्ष्यमाण 'दर्शन' (१५६) शब्दवद्रूपाणि ज्ञेयानि ॥

एवम्-प्रवरप्रमुखाः शब्दा धवयोगे बोध्याः ॥

## ॥ इति त्रिलिङ्गका अकारान्ता एकोनविंशतिः शब्दाः ॥

# ॥ केवलनपुंसकलिङ्गाः अकारान्ताः सप्त शब्दाः ॥

## (१५५) अकारान्तः पुँल्लिङ्गः 'गृह' शब्दः ।

'गृहाः पुंसि बहुवचनान्त एव' इति वचनाद् बहुवचने रूपाणि निरूप्यन्ते । तद्यथा-प्र० गृहाः । द्वि० गृहान् । तृ० गृहैः । च० प० गृहेभ्यः । ष० गृहाणाम् । स० गृहेषु । सं० हे गृहाः । दुर्गस्त्वेकवचनान्तमेवाह ॥

### नपुंसकलिङ्गे तु--

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | गृहम् | गृहे | गृहाणि |
| द्वि० | ,, | ,, | ,, |
| सं० | हे गृह | हे गृहे | हे गृहाणि |

शेषाणि रूपाणि 'नृप' (७७) शब्दवद्भवन्ति ॥

## (१५६) अकारान्तो नपुंसकलिङ्गः 'दर्शन' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | दर्शनम् | दर्शने | दर्शनानि |
| द्वि० | ,, | ,, | ,, |
| तृ० | दर्शनेन | दर्शनाभ्याम् | दर्शनैः |
| च० | दर्शनाय | ,, | दर्शनेभ्यः |
| प० | दर्शनात्, दर्शनाद् | ,, | ,, |
| ष० | दर्शनस्य | दर्शनयोः | दर्शनानाम् |
| स० | दर्शने | ,, | दर्शनेषु |
| सं० | हे दर्शन | हे दर्शने | हे दर्शनानि |

एवम्--ज्ञान-धन-वन-मूर्च्छन-तीर्थ-कूल-कनक-वन्दन-चन्दन-प्रतिक्रमण-रजोहरण-प्रभृतयः शब्दाः ज्ञेयाः ।

साधनिकेयम्–'दर्शन+सि' इति स्थिते "अतः स्यमोऽम्" [१,४,५७] इति सिस्थाने 'अम्' इत्यादेशे सति "समानादमोऽतः" [१, ४, ४६] इत्यमोऽकारस्य लुकि 'दर्शनम्' इति रूपं भवति ॥

'दर्शन+औ' इति स्थिते "औरीः" [१, ४, ५६] इति औस्थाने 'ई' भवति, तदनु "अवर्णस्येवर्णादिनैदोदरल्" [१, २, ६] इत्यकारस्य ईकारेण सह एत्वे जाते 'दर्शने' २ इति ॥

'दर्शन×जस्' इति स्थिते "नपुंसकस्य शिः" [१, ४, ८५] इति जसः शिर्भवति, तदनु "स्वराच्छौ" [१, ४, ६५] इति शौ परे नेऽन्ते "नि दीर्घः" [१, ४, ८५] इति शेषे घुटि परे यो नस्तस्मिन्परे [अकारस्य] स्वरस्य दीर्घत्वे सति 'दर्शनानि' ॥

'शि' इत्यत्र "अप्रयोगीत्" [१, १, ३७] इति सूत्रेण शकार इत् (संज्ञकः) स्यात्। एति अपगच्छतीति इत्। एवं सर्वत्राऽपि 'इत्' पदेन ज्ञेयम्।

'दर्शन×टा' इति स्थिते "टाङसोरिनस्यौ" [१, ४, ५] इति टास्थाने इनादेशे "अवर्णस्ये०" [१, २, ६] इति अस्य इना सह एत्वे 'दर्शनेः' ॥

भ्यामि "अत आः स्यादौ जस्भ्याम्ये" [१, ४, १] इत्यकारस्य आत्वे 'दर्शनाभ्याम्' ३ ॥

भिसि "भिस ऐस्" [१, ४, २] इति भिस ऐस्त्वे "ऐदौत्सन्ध्यक्षरैः [१, २, १२] इत्यकारस्य ऐकारेण सह ऐत्वे सस्य रुत्वे विसर्गे च 'दर्शनैः' ॥

ङयि "ङेङस्योर्यातौ [१, ४, ६] इति ङेस्थाने यकारादेशे, तस्य स्थानिवत्त्वेन विभक्तित्वे "अत आः स्यादौ जस्भ्याम्ये" [१, ४, १] इति अकारस्य आत्वे 'दर्शनाय' ॥

भ्यसि " एद् बहुस्भोसि " [१, ४, ४] इति भ्यसि परे अकारस्य एत्वे, " सो रुः " [ २, १, ७२ ] इति सस्य रुत्वे ( अत्र-उ इत् ) " रः पदान्ते विसर्गस्तयोः" [१, ३, ५३] इति रस्य विसर्गे सति 'दर्शनेभ्यः' २॥

ङसौ " ङेङस्योर्यातौ " [ १, ४, ६ ] इति ङसिस्थाने 'आत्' इत्यादेशे " समानानां तेन दीर्घः " [ १, २, १ ] इति द्वयोः स्थाने दीर्घत्वे 'दर्शनात्' इति जाते " धुटस्तृतीयः " [ २, १, ७६ ] इति तस्य दत्वे " विरामे वा " [ १, ३, ५१ ] इति दस्य वैकल्पिकतत्वे 'दर्शनात्, दर्शनाद्, इति द्वे रूपे भवतः ॥

ङसि " टाङसोरिनस्यौ " [ १, ४, ५ ] इति ङसः स्यादेशे सति 'दर्शनस्य' इति ॥

ओसि " एद् बहुस्भोसि " [१, ४, ४] इति ओसि परे अस्य एत्वे " एदैतोऽयाय् " [ १, २, २३ ] इत्येकारस्य अयादेशे सति सस्य रुत्वे विसर्गे च दर्शनयोः २ ॥

आमि " ह्रस्वापश्च " [१, ४, ३२] इत्यामो नामादेशे सति " दीर्घो नाम्यतिसृचतसृषः" [१, ४, ४७] इत्यकारस्य दीर्घत्वे जाते दर्शनानाम्' इति॥

ङौ "अवर्णस्ये०" [१, २, ६] इत्यकारस्य इकारेण सह एत्वे 'दर्शने'॥

सुपि " एद् बहुस्भोसि " [ १, ४, ४ ] इति अस्य एत्वे सति " नाम्यन्तःस्था०" [ २, ३, १५ ] इति सस्य षत्वे 'दर्शनेषु' इति ॥

सम्बोधने तु—" अतः स्यमोऽम् " [ १, ४, ५७ ] इति सेरमादेशे सति " अदेतः स्यमोर्लुक् " [१, ४, ४४] इत्यामन्त्र्यवृत्तेरदन्तान्नाम्नः परस्यामो लुकि 'हे दर्शन' इति ॥

एवम्-अकारान्तपुँल्लिङ्गशब्दानामपि तृतीयाया आरभ्य सप्तमीपर्यन्ता साधनिका समैव, अवशिष्टा तु सुगमा स्वधिया ज्ञेया ॥

## ( १५७ ) अकारान्तो नपुंकलिङ्गकः 'चारित्र' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | चारित्रम् | चारित्रे | चारित्राणि |
| द्वि० | ,, | ,, | ,, |
| तृ० | चारित्रेण[1] | चारित्राभ्याम् | चारित्रैः |
| च० | चारित्राय | ,, | चारित्रेभ्यः |
| प० | चारित्रा-त् ,द् | ,, | ,, |
| ष० | चारित्रस्य | चारित्रयोः | चारित्राणाम्[1] |
| स० | चारित्रे | ,, | चारित्रेषु |
| सं० | हे चारित्र | हे चारित्रे | हे चारित्राणि |

एवम्—शास्त्र, मित्र, चरित्र, पवित्र, पत्र, वस्त्र, पात्र, आम्र, शीर्ष—प्रमुखाः शब्दा बोध्याः ।

## ( १५८ ) अकारान्तो नपुंसकलिङ्गः 'हृदय' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | हृदयम् | हृदये | हृदयानि |
| द्वि० | ,, | ,, | हृन्दि, हृदयानि |
| तृ० | हृदा, हृदयेन; | हृद्भ्याम्, हृदयाभ्याम् ; | हृद्भिः, हृदयैः |
| च० | हृदे, हृदयाय; | ,, ,, | हृद्भ्यः, हृदयेभ्यः |
| प० | हृदः, हृदयात्-द् | ,, ,, | ,, ,, |
| ष० | हृदः, हृदयस्य, | हृदोः, हृदयोः; | हृदाम्, हृदयानाम् |
| स० | हृदि, हृदये, | ,, ,, | हृत्सु, हृत्सु, हृदयेषु |
| सं० | हे हृदय | हे हृदये | हे हृदयानि |

१ अत्र " रषृवर्णान्नोग० " [ २, ३, ६३ ] इति णत्वप्रदर्शनार्थमिदम्॥

अत्र "दन्तपादनासिकाहृदया०" [२, १, १०१] इति सूत्रेण शसादौ स्यादौ हृदयशब्दस्य 'हृद्' इत्यादेशो विकल्पेन भवति, तेन द्वितीयाबहुवचनादारभ्य सप्तमीबहुवचनपर्यन्तं पक्षे हृदादेशघटितानि रूपाणि बोध्यानि ॥

शसि हृदादेशे "नपुंसकस्य शिः" [१, ४, ५५] इति शसः शिर्भवति, तदनु "धुटां प्राक्" [१, ४, ६६] इति शौ परे (धुडभ्यएव प्राक्) नेऽन्ते सति 'हृन्दि' इति। पक्षे हृदयानि दर्शनानिवत् ॥

सुपि हृदादेशे "अघोषे प्रथमोऽशिटः" [१, ३, ५०] इति दस्य तत्वे 'हृत्सुः' इति जाते "शिट्याद्यस्य द्वितीयो वा" [१, ३, ५९] इति तस्य वैकल्पिकथत्वे 'हृथ्सु, हृत्सु' पक्षे 'हृदयेषु' दर्शनेषुवत्। अत्र विकल्पद्वयेन रूपत्रयम् ॥

## (१५९) अकारान्तो नपुंसकलिङ्गः 'उदक' शब्दः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | उदकम् | उदके | उदकानि |
| द्वि० | ,, | ,, | उदानि, उदकानि |
| तृ० | उन्दा, उदकेन | उदभ्याम् उदकाभ्याम्; | उदभिः, उदकैः |
| च० | उन्दे, उदकाय; | ,, ,, | उदभ्यः, उदकेभ्यः |
| प० | उन्दः, उदकात्-द्; | ,, ,, | ,, ,, |
| ष० | ,, उदकस्य; | उन्दोः, उदकयोः, | उन्दाम्, उदकानाम् |
| स० | उन्दि, उदनि, उदके; | ,, ,, | उदसु, उदकेषु |
| सं० | हे उदक | हे उदके | हे उदकानि |

अत्रापि शसादौ "दन्तपाद०" [२, १, १०१] इति विकल्पेन 'उदन्' इत्यादेशः ॥

शसि "दन्तपाद०" [२, १, १०१] इति 'उदन्' इत्यादेशे "नपुंसकस्य शिः" [१, ४, ८५] इति शसः स्थाने शिर्जायते, तदनु "निदीर्घः" [१, ४, ८५] इति दकारोत्तराकारस्य दीर्घत्वे सति 'उदानि' पक्षे 'उदकानि' ॥

टाप्रत्यये परे उदनादेशे सति " अनोऽस्य " [ २, १, १०८ ] इत्यनोऽकारस्य लुकि 'उद्ना', पक्षे 'उदकेन' ॥ एवम् 'उद्ने, उद्नः २, उद्नोः २, उद्नाम् ' इत्यत्राप्यनेनैव सूत्रेण अनोऽस्य लुग्भवतीति ॥

भ्यामि उदनादेशे " नाम सिदय्व्यञ्जने " [ १, १, २१ ] इति पदसंज्ञायां " नाम्नो नोऽनह्नः " [ २, १, ९१ ] इति पदान्ते वर्त्तमानस्य नाम्नो नस्य लुकि 'उदभ्याम्' ३ इति । एवम्—'उदभिः, उदभ्यः २, उदसु इत्यत्रापि बोध्यम् ॥

ङौ उदनादेशे सति " ईङौ वा " [ २, १, १०९ ] इति अनोऽस्य लुग् वा भवति; लुकि 'उद्नि' लुगभावे तु 'उदनि' पक्षे 'उदके' । अत्र विकल्पद्वयेन रूपत्रयम् ॥

'उदभ्याम् ३, उदभिः, उदभ्यः, २, उदसु' इत्यादिप्रयोगेषु "नाम्नो नोऽनह्नः " [ २, १, ९१ ] इति (स्यादिविधौ) नलुकोऽसत्त्वे दीर्घादयो न भवन्तीति भावनीयम् ॥

## ( १६० ) अकारान्तो नपुंसकलिङ्ग 'आसन' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आसनम् | आसने | आसनानि |
| द्वि० | ,, | ,, | आसानि, आसनानि |
| तृ० | आस्ना, आसनेन; | आसभ्याम्, आसनाभ्याम् ; | आसभिः, आसनैः |

---

१ कविराजश्रीअमरचन्द्रसूरिविरचिते सावचूरिके स्यादिशब्दसमुच्चये तु–लुक्पक्षे " स्वरस्य परे प्राग्विधौ " [ ७, ४, ११० ] इत्यकारस्य स्थानित्वात् नलोपाभावे 'आसन्भ्याम्' इति रूपं प्रदर्शितम् ।

अत्र स्थानिवद्भावादिगोचरा चर्चा 'मास' (८१) शब्दरूपोपदर्शनस्थले दर्शितरीत्यावसेया ॥

| | | | |
|---|---|---|---|
| च० | आस्ने, आसनाय; | आसभ्याम्, आसनाभ्याम्; | आसभ्यः, आसनेभ्यः |
| प० | आस्नः, आसनात्-द् | ,, ,, | ,, ,, |
| ष० | आस्नः, आसनस्य; | आस्नोः, आसनयोः; | आस्नाम्, आसनानाम् |
| स० | आस्नि,आसनि,आसने; | ,, ,, | आससु, आसनेषु |
| सं० | हे आसन | हे आसने | हे आसनानि |

पाणिनीयादयस्तु–आसनशब्दस्य 'आसन्' इति लुगन्ताऽऽदेशं नेच्छन्ति, अत एव तेषां मते लुगघटितान्येव रूपाणि बोध्यानि । अर्थात् पाणिनीयादि-मतानुसारेण 'दर्शन' ( १५६ ) शब्दवद्रूपाणि भवन्ति ॥

अत्र " मासनिशासनस्य शसादौ लुग्वा " [ २, १, १०० ] इति आसनस्यान्तलुकि द्वितीयाबहुवचनादारभ्य सप्तमीबहुवचनपर्यन्तं 'आसन्' इति पाक्षिकी प्रकृतिस्तिष्ठति । साधनिका च 'उदक' ( १५९ ) शब्दवज्ज्ञेया ॥

ननु 'आसानि' इत्यत्राऽकारस्य लुकि 'आसन्+इ' इति स्थितेऽकारलुकः स्थानिवत्त्वेन दीर्घो न स्यादिति चेन्न " न सन्धि० " [ ७, ४, १११ ] इति सूत्रेण दीर्घविधौ तन्निषेधात् ॥ 'उदानि' इत्यादिष्वपि एवमेवावसेयम् ॥

## (१६१) अकान्तो नपुंसकलिङ्ग 'आस्य' शब्दः ।

स्वमते 'आस्य' शब्दस्य सर्वाण्यपि रूपाणि 'दर्शन' (१५६) शब्दवद्भवन्ति । किन्तु—पाणिनीयमतानुसारीणीमानि रूपाणि वाच्यानि—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आस्यम् | आस्ये | आस्यानि |
| द्वि० | ,, | ,, | आसानि, आस्यानि |
| तृ० | आस्ना, आस्येन; | आसभ्याम्, आस्याभ्याम्; | आसभिः, आस्यैः |
| च० | आस्ने, आस्याय; | ,, ,, | आसभ्यः, आस्येभ्यः |
| प० | आस्नः, आस्या-त्,द्; | ,, ,, | ,, ,, |

| | | | |
|---|---|---|---|
| ष० | आस्नः, आस्यस्य; | आस्नोः, आस्ययोः; | आस्नाम् , आस्यानाम् |
| स० | आस्नि, आसनि, आस्ये; | ,, ,, | आससु, आस्येषु |
| सं० | हे आस्य | हे आस्ये | हे आस्यानि |

पाणिनीयास्तु-आस्यशब्दस्य द्वितीयाबहुवचनादारभ्य सर्वासु विभक्तिषु परासु सतीषु 'आसन्' इत्यादेशं विकल्पेन मन्यन्ते, ततः शसादौ स्यादौ रूपद्वयम् ॥

## ( १६२ ) अकारान्तो नपुंसकलिङ्गः 'मांस' शब्दः ।

स्वमते मांसशब्दस्य सर्वाणि रूपाणि 'दर्शन' (१५६) शब्दवज्ज्ञेयानि ॥

### पाणिनीयादिमते तु—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | मांसम् | मांसे | मांसानि |
| द्वि० | ,, | ,, | मांसि, मांसानि |
| तृ० | मांसा, मांसेन; | मान्भ्याम्, मांसाभ्याम्; | मान्भिः, मांसैः |
| च० | मांसे, मांसाय; | ,, ,, | मान्भ्यः, मांसेभ्यः |
| प० | मांसः, मांसात्-द् | ,, ,, | ,, ,, |
| ष० | मांसः, मांसस्य; | मांसोः, मांसयोः; | मांसाम्, मांसानाम् |
| स० | मांसि, मांसे; | ,, ,, | मान्सु, मांसेषु |
| सं० | हे मांस | हे मांसे | हे मांसानि |

साधनिका-पाणीनीयादयस्तु शसादौ विकल्पेन 'मांस्' इत्यादेशमिच्छन्ति ॥

## इति केवलनपुंसकलिङ्गका अकारान्ताः सप्त शब्दाः ॥

इति श्रीमत्तपोगणाम्बराम्बरमणि-शासनसम्राट्-स्वपरसमयपारावारपारीणाऽऽ-
चार्यचक्रचूडामणि-कलिकालकल्पतरुकल्प-तीर्थरक्षैकदक्ष-सुगृहीतनामधेय-
जगद्गुरु-परमपूज्य पूज्यपाद-परमोपकारि-भट्टारकाचार्यवर्य-श्रीमद्विज-
यनेमिसूरीश्वर-पट्टालङ्कार-व्याकरणवाचस्पति-कविरत्न-शास्त्र-
विशारद-विबुधशिरोमणि-परमपूज्य-परमोपकारि-श्रीमद्गुरुरा-
जभट्टारकगणाचार्य-श्रीमद्विजयलावण्यसूरीश्वर-चरणार-
विन्दमिलिन्दायमान-विनेयमुनि-दक्षविजय-विरचिते-

## श्री स्याद्यन्तरत्नाकरे स्वरान्तप्रकरणस्थम्-
## अकारान्तप्रकरणम् ॥

प्रतिज्ञातमकारान्तं, यत् प्राक्प्रकरणं मया।
तन्नानारचनाभेदैः, समुदा समुदाहृतम् ॥१॥



॥ श्रीभटेवापार्श्वनाथाय नमो नमः ॥

# अथ आकारान्तं प्रकरणम्

## (१६३) आकारान्तः पुँल्लिङ्गो ×विशेषणवाचकः 'विश्वपा' शब्दः ।

( विश्वं पाति रक्षतीति विचि विश्वपाः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | विश्वपाः | विश्वपौ | विश्वपाः |
| द्वि० | विश्वपाम् | ,, | विश्वपः卐 |
| तृ० | विश्वपा | विश्वपाभ्याम् | विश्वपाभिः |
| च० | विश्वपे | ,, | विश्वपाभ्यः |
| प० | विश्वपः | ,, | ,, |
| ष० | ,, | विश्वपोः | विश्वपाम् |
| स० | विश्वपि | ,, | विश्वपासु |
| सं० | हे विश्वपाः | हे विश्वपौ | हे विश्वपाः |

एवम्–तीर्थपा, धर्मपा, सोमपा, क्षीरपा, कीलालपा, धूम्रपा, शङ्खध्मा, लोहध्मा, धर्मत्रा, शुभंया–प्रमुखाः ।

× विशेषणवाचकशब्दानां विशेष्यवाचकशब्दवल्लिङ्गादिव्यवस्था, यदाह–

"यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य ।
तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्यापि ॥१॥"

卐 विश्वपा+शस् (अस्)="लुगातोऽनापः" [२, १, १०] इति आकारस्य लुकि 'विश्वपः' । एवमग्रे स्वरादौ आकारलुग् बोध्यः ॥

## स्त्रीलिङ्गे तु—

विश्वपाशब्दः स्त्रियां द्विविधः सम्भवति, आकारान्त आबन्तश्चेति; तत्र विश्वं पातीति "मनूवनूक्वनिपूविचूक्वचित्" [ ५, १, १४७ ] इति विच्प्रत्यये आकारान्तः, "आतो डोऽह्वावामः" [ ५, १, ७६ ] इति डे "डित्यन्त्यस्वरादेः" [ २, १, ११४ ] इति धातोराकारस्य लुकि "आत्" [२, ४, १८] इत्यापि च आबन्तः। तत्र आकारान्तस्य पुंवद्रूपाणि, आबन्तस्य तु वक्ष्यमाण 'दया' ( १६५ ) शब्दवद्रूपाणि ज्ञेयानि। एवं तीर्थपादिष्वपि बोध्यम्।

## नपुंसकलिङ्गे तु —

विच्प्रत्ययान्तस्य विश्वपाशब्दस्य दीर्घान्तत्वात् "क्लीबे" [२, ४, ९७] इति ह्रस्वत्वं विधेयम्; डप्रत्ययान्तस्य विश्वपशब्दस्य तु न, ह्रस्वान्तत्वात्। द्विविधस्यापि विश्वपशब्दस्य रूपाणि 'दर्शन' (१५६) शब्दवज्ज्ञेयानि। एवं तीर्थपप्रभृतिष्वपि।

एवं पुनः-उदधिका, अग्रेगा, विकषा, गोषा, अब्जजा, गोपा, पा, वा, क्त्वा, टा, श्वा-प्रभृतयः। तत्र उदधिकादयः पञ्च संज्ञायामपि प्रवर्तन्ते। यदुक्तम्—

"अग्रेगा उदधिकाश्च विकषाश्च तथा गोषाः।
श्रियं ददातु राजेन्द्र! अब्जजासहिता इमे ॥१॥"

अग्रेगाः=इन्द्रः। उदधिकाः=विष्णुः। विकषाः=शम्भुः। गोषाः=रविः। अब्जजाः=ब्रह्मा ॥

केचन वैयाकरणाः 'क्त्वा-टा' प्रत्ययावाबन्तस्त्रीलिङ्गौ मन्यन्ते, तन्मते च वक्ष्यमाण 'दया' (१६५) शब्दवदनयो रूपाणि वाच्यानि ॥

## (१६४) आकारान्तः पुँल्लिङ्गः 'हाहा' शब्दः । (स्वमते)

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | हाहाः | हाहौ | हाहाः |
| द्वि० | हाहाम् | ,, | हाहः |
| तृ० | हाहा | हाहाभ्याम् | हाहाभिः |
| च० | हाहे | ,, | हाहाभ्यः |
| प० | हाहः | ,, | ,, |
| ष० | ,, | हाहोः | हाहाम् |
| स० | हाहि | ,, | हाहासु |
| सं० | हे हाहाः | हे हाहौ | हे हाहाः |

"ओहांङ्क्'गतौ । हाशब्दं जिहीते गीतकाले कर्त्तव्यतया आप्नोतीति विच्"—इति लघुन्यासकारवचनम् ॥ अत्र अघुट्स्वरे "लुगातोऽनापः" [ २, १, १० ] इत्यन्त्याकारस्य लुग्भवतीति ॥

## मतान्तरे तु—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | हाहाः | हाहौ | हाहाः |
| द्वि० | हाहाम् | ,, | हाहान् |
| तृ० | हाहा | हाहाभ्याम् | हाहाभिः |
| च० | हाहै | ,, | हाहाभ्यः |
| प० | हाहाः | ,, | ,, |
| ष० | ,, | हाहौः | हाहाम् |
| स० | हाहे | ,, | हाहासु |
| सं० | हे हाहाः | हे हाहौ | हे हाहाः |

इमानि रूपाणि पाणिनीयादिमतानुसारीणि ।

अत्र 'हाहाहूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम्' इत्यमरवचनाद् गन्धर्व-वाचकत्वेन धातुत्वाभावात् हाहा शब्दस्याकारस्य लोपो न भवति। 'हा' इति शोकव्यञ्जकशब्दं जहातीति विग्रहे च विच्प्रत्यये आकारस्य लोपो भवतीति विभावनीयम् ॥ लोपे तु स्वमतानुसारीणि रूपाणि भवन्तीति विशेषः ॥

## ( १६५ ) आबन्तः स्त्रीलिङ्गः 'दया' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | दया | दये | दयाः |
| द्वि० | दयाम् | ,, | ,, |
| तृ० | दयया | दयाभ्याम् | दयाभिः |
| च० | दयायै | ,, | दयाभ्यः |
| प० | दयायाः | ,, | ,, |
| ष० | ,, | दययोः | दयानाम् |
| स० | दयायाम् | ,, | दयासु |
| सं० | हे दये | हे दये | हे दयाः |

एवम्-माला, शाला, पद्मा, ×वाचा, श्रद्धा, कृपा, करुणा, गङ्गा, रमा, त्रिशला, विद्या-प्रमुखाः ॥

साधनिका-दय+आप् (आ)=दया ॥ दया+सि="दीर्घङ्याब्व्यञ्जनात्सेः" [ १, ४, ४५ ] इति सेर्लुकि 'दया' ॥ दया+औ="औता" [१, ४, २०] इत्याकारौकारस्थाने एत्वे 'दये' २ ॥ दया+जस् ( अस् )=" समानानां तेन दीर्घः " [ १, २, १ ] इति दीर्घत्वे, सस्य रुत्वे विसर्गे च 'दयाः' ॥ दया+अम्=" समानादमोऽतः " [ १, ४, ४६ ] इत्यमोऽकारस्य लुकि 'दयाम्' ॥ दया+शस् (अस्)=" शसोऽता सश्च नः पुंसि " [१, ४, ४९]

× 'वष्टि भागुरि रल्लोपमवाप्योरुपसर्गयोः । आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥१॥' इति भागुरिमतेन व्यञ्जनान्तादपि आप् भवतीति ॥

इत्याकाराऽकारयोः स्थाने आत्वे, * सस्य रुत्वे विसर्गे च 'दयाः' ॥ दया+टा (आ)="टौस्येत्" [१, ४, १९] इति पूर्वाकारस्थाने एत्वे, तस्य "एदैतोऽयाय्" [ १, २, २३ ] इति अयादेशे च 'दयया' ॥ दया+ङे-ङसि-ङस्-ङि= "आपो ङितां यै-यास्-यास्-याम्" [ १, ४, १७ ] इति क्रमेण यै-यास्-यास्-याम् 卐 इत्यादेशेषु 'दयायै, दयायाः २, दयायाम्' इति ॥ दया+ओस्="टौस्येत्" [ १, ४, १९ ] इति आकारस्य एत्वे, तस्य "एदैतोऽयाय्" [१, २, २३] इति अयादेशे, सस्य रुत्वे विसर्गे च दययोः २ ॥ दया+आम्="ह्रस्वापश्च" [१, ४, ३२] इति आमो नामादेशे, (×'पर्जन्यवल्लक्षणप्रवृत्ति' रिति न्यायबलात्) "दीर्घो नाम्य०" [ १, ४, ४७ ] इति दीर्घत्वे 'दयानाम्' ॥ सम्बोधने 'दया+सि'="एदापः" [ १, ४, ४२ ] इति आकारस्य सिना सह एत्वे 'हे दये,' सम्बोधनद्विवचनेऽपि "औता" [१,४,२०] इति आकारौकारस्थाने एत्वे 'हे दये' इति ॥ शेषा सुगमैव ॥

एवं पुनः—अजा, एडका, अश्वा, चटका, मूषिका, कोकिला इत्येभ्यः षड्भ्यः शब्देभ्यः "जातेरयान्तनित्यस्त्रीशूद्रात्" [ २, ४, ५४ ] इति सूत्रेण प्राप्तस्य जातिलक्षणङीप्रत्ययस्यापवादरुपः "अजादेः" [२, ४, १६] इति सूत्रेणाऽऽप् प्रत्ययो भवति । बाला, होडा, पाका, वत्सा, मन्दा, विलाता, कन्या, मध्या, मुग्धा, इत्येतेषां वयोवाचकानां नवानां शब्दानामजादिपाठात् "वयस्यनन्त्ये" [ २, ४, २१ ] इत्यनेन वयसि विधीयमानङीप्रत्यस्यापवादरूप आप् प्रत्ययो जायते । विलाताशब्दमन्ये अजादौ न पठन्ति, तेन विलातीत्यपि बोध्यं-तद्रूपाणि वक्ष्यमाण 'नदी' (२२५) वद्विज्ञेयानि । ज्येष्ठा, कनिष्ठा, मध्यमा-इति शब्दत्रयेषु "धवाद्योगादपालकान्तात्"

---

* शस्सम्बन्धिनः सस्य नत्वं न भवति, नत्वस्य पुंसि विधानात्, तथा चात्र स्त्रीत्वात् सस्य रुत्वं विसर्गश्च भवतीति ॥

卐 'ङेङसिङस्ङि' इति चतस्रो विभक्तयो 'ङित्' पदेन उच्यन्ते ॥

× पर्जन्योः मेघः । लक्षणं सूत्रम् ॥

[ २, ४, ५९ ] इत्यनेन धवयोगे ( पतियोगे ) विधीयमानङीप्रत्ययो न भवति, अपि तु तेषामजादिपाठादाबेव भवति। पूर्वापहाणा, अपरापहाणा, सम्प्रहाणा, ( परप्रहाणेत्यप्यन्ये ) इति शब्दत्रयेष्वपि टिल्लक्षणस्य ङीप्रत्ययस्यापवाद आप् स्यादजादित्वात्। त्रीणि फलानि समाहृतानि-त्रयाणां फलानां समाहारो वा-त्रिफला[२]-इत्यत्र "द्विगोः समाहारात्" [ २, ४, २२ ] इति द्विगुलक्षणङीप्रत्ययस्य प्राप्तावप्यजादिपाठादाबेव भवतीति-द्वाविंशतेः शब्दानां रूपाणि (साधनिका च) दयाशब्दवदेवावसेयानि ॥

क्रुञ्चा-उष्णिहा-देवविशा-इति [३]शब्दत्रये व्यञ्जनान्तत्वेनाऽनकारान्तत्वेऽप्यजादित्वादाप्भवतीति। रूपाणि दयावत्।

## (१६६) आबन्तः स्त्रीलिङ्गः 'निशा' शब्दः। (स्वमते)

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | निशा | निशे | निशाः |
| द्वि० | निशाम् | ,, | निशः, निशाः |
| तृ० | निशा, निशया; | निज्भ्याम्, निशाभ्याम्; | निज्भिः, निशाभिः |
| च० | निशे, निशायै; | ,, ,, | निज्भ्यः, निशाभ्यः |
| प० | निशः, निशायाः | ,, ,, | ,, ,, |
| ष० | ,, ,, | निशोः, निशयोः; | निशाम्, निशानाम् |
| स० | निशि, निशायाम्; | ,, ,,; | निच्छु, निच्शु, निशासु |
| सं० | हे निशे | हे निशे | हे निशाः |

[२] अत्र "पात्रादिवर्जितादन्तोत्तरपदसमाहारे।
द्विगुरस्त्र्याबन्तान्तो वाऽन्यस्तु सर्वो नपुंसकः ॥ ५ ॥"
इति लिङ्गानुशासनवचनात्-पात्रादिवर्जितमकारान्तमुत्तरपदं यस्य स द्विगुः, समाहारे स्त्रीलिङ्गत्वमवाप्नोति ॥

[३] अन्ये तु क्रुञ्चानालभेत-उष्णिहककुभौ-देवविशश्च मनुष्य-इति प्रयोगदर्शनात्-अकारान्ता एवैत इति मन्यन्ते ॥

साधनिका—" मासनिशा० " [ २, १, १०० ] इति शसादौ स्यादौ 'निश्' इति लुगन्तादेशो विकल्पेन भवति ॥ भ्यामि " धुटस्तृतीयः " [२, १, ७६] इति सूत्रेण शस्थाने तृतीयप्राप्तौ "आसन्नः" [७. ४, १२० इति ( परिभाषासूत्रबलेन ) जत्वे '× निज्भ्याम् ३ ' इति, एवं निज्भिः, निज्भ्यः २ ॥

सुपि–'निश्' इत्यादेशे " सस्य शषौ " [ १, ३, ६१ ] इति सुप्सम्बन्धिसकारस्य शत्वे, " धुटस्तृतीयः " [ २, १, ७६ ] इति 'निश्' घटकशस्य ( आसन्नपरिभाषया) जत्वे, " अघोषे प्रथमोऽशिटः " [१, ३, ५०] इति जस्य ( चत्वे ) प्रथमे–'निच्शु' इति जाते " प्रथमादधुटि शश्छः " [१, ३, ४] इति शस्य छत्वे निच्छु, छत्वविकल्पपक्षे निच्शु, पक्षे निशासु॥ ननु जत्वे सति 'निज्+सु' इत्यवस्थायाम् " चजः कगम् " [ २, १, ८६ ] इति गत्वेन भवितव्यम् ? एवं च सति सुपि गत्वे, तस्य कत्वे सस्य षत्वे च 'निक्षु' इति रूपेण भाव्यमिति चेन्न, गत्वं प्रति "धुटस्तृतीयः" इति सूत्रविहितजत्वस्याऽसिद्धत्वादिति । नच चत्वेऽपि असिद्धत्वमिति वाच्यम् ? असदधिकारस्य परत्वस्याद्यधिकारविहितत्वप्रतिबद्धत्वेन चत्वविधायकस्योभयाभावात् ॥

---

× " अत्र—( " मासनिशा० " [ २, १, १०० ] इत्यस्मिन्सूत्रे ) निश्शब्दे सत्यपि निशाशब्दग्रहणं 'निज्भ्याम्' इत्यस्य सिद्ध्यर्थम्, निश्शब्दस्य हि भ्यामि 'निड्भ्याम्' इत्येव भवति । क्विबन्तत्वाद्धातुत्वे 'यजसृज'–इत्यादिना षत्वप्राप्तेः " इति लघुन्यासकाराः ॥ इदमत्र हृदयम्–निशापर्यायस्य आचारक्विबन्तनिश्शब्दस्य धातुत्वात् " यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राजः शः षः" [ २, १, ८७ ] " इति सूत्रेण यजादिधातुसाहचर्यात् शकारस्यापि धातोः सम्बन्धिन एव ग्रहणेन शस्य षत्वम्, ततो " धुटस्तृतीयः " इति डत्वे " निड्भ्याम् " इतिरूपसिद्धिः; प्रकृतस्य तु निशाशब्दस्य 'निश्' इत्यादेशरूपत्वेन धातुत्वाभाभात् षत्वप्राप्तिरेव नास्तीति ' निज्भ्याम् ' इति रूपं भवतीति विशेषः ॥

## मतान्तरे तु—

### ( पाणिनीयमतानुसारीणि रूपाणि )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | निशा | निशे | निशाः |
| द्वि० | निशाम् | ,, | निशः<br>निशाः |
| तृ० | निशा<br>निशया | निड्भ्याम्<br>निज्भ्याम्<br>निशाभ्याम् | निड्भिः<br>निज्भिः<br>निशाभिः |
| च० | निशे<br>निशायै | ,, | निड्भ्यः<br>निज्भ्यः<br>निशाभ्यः |
| प० | निशः<br>निशायाः | ,, | ,, |
| ष० | ,, | निशोः<br>निशयोः | निशाम्<br>निशानाम् |
| स० | निशि<br>निशायाम् | ,, | निट्त्सु,<br>निट्सु,<br>निच्छु,<br>निच्शु,<br>निशासु |
| सं० | हे निशे | हे निशे | हे निशाः |

पाणिनिमते तु—भ्यामि 'निश्' इत्यादेशे " व्रश्च० [ ८, २, ३६ पा० सू० ] त्यादिना षत्वे जश्त्वे च 'निड्भ्याम्' इति। धातोरेव शकारस्य षत्वपक्षे जश्त्वे च 'निज्भ्याम्' इति ॥

न चात्र कुत्वं स्यादिति वाच्यम्? जश्त्वं प्रति कुत्वस्यासिद्धत्वात्।

केचित्तु—भ्यामि 'निग्भ्याम् ३,' भिसि 'निग्भिः,' भ्यसि 'निग्भ्यः २' सुपि तु 'निक्षु' इतीच्छन्ति ॥

## ( १६७ ) आबन्तः स्त्रीलिङ्गः 'नासिका' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | नासिका | नासिके | नासिकाः |
| द्वि० | नासिकाम् | ,, | नसः, नासिकाः |
| तृ० | नसा, नासिकया; | नोभ्याम्, नासिकाभ्याम्; | नोभिः नासिकाभिः |
| च० | नसे, नासिकायै; | ,, ,, | नोभ्यः, नासिकाभ्यः |
| प० | नसः, नासिकायाः; | ,, ,, | ,, ,, |
| ष० | ,, ,, | नसोः, नासिकयोः; | नसाम्, नासिकानाम् |
| स० | नसि, नासिकायाम्; | ,, ,,; | नथ्सु, ×नत्सु, नासिकासु |
| सं | हे नासिके | हे नासिके | हे नासिकाः |

साधनिका-शसादौ स्यादौ " दन्तपादनासिका० " [ २, १, १०१ ] इति 'नस्' इत्यादेशो वा भवति । भ्यामि भिसि भ्यसि च परे नसादेशे सति, " नामसिदयव्यञ्जने " [ १, १, २१ ] इति पदसंज्ञायां सत्यां "सो रुः " [ २, १, ७२ ] इति सस्य रुत्वम्, तदनु " घोषवति " [ १, ३, २१ ] इति रुत्वस्य उत्वे, 'न+उ' इति जाते " अवर्णस्येवर्णादिनैदोदरल् " [ १, २, ६ ] इति नकारस्थाऽकारेण सह उकारस्य ओकारादेशे-नोभ्याम्, नोभिः, नोभ्यः-पक्षान्तररूपसाधनिका दयावत् ॥

सुपि—नसादेशे सति " धुटस्तृतीयः " [ २, १, ७६ ] इति सूत्रेण (आसन्नपरिभाषया) सस्य दत्वे " अघोषे प्रथमोऽशिटः " [ १, ३, ५० ] इति दस्य तकारादेशे 'नत्सु' इति जाते " शिट्याद्यस्य द्वितीयो वा " [१, ३, ५९] इति तस्य विकल्पेन थत्वे 'नथ्सु' नत्सु पक्षे नासिकासु ॥ अवशिष्टा साधनिका 'दया' (१६५) वदवसेया स्वधिया ॥

× अपरे तु—'नासिकासु, नस्सु' इतीच्छन्ति ॥

## (१६८) आबन्तः स्त्रीलिङ्गः 'पृतना' शब्दः । मतान्तरे—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | पृतना | पृतने | पृतनाः |
| द्वि० | पृतनाम् | " | पृतः, पृतनाः |
| तृ० | पृता, पृतनया; | पृद्भ्याम्, पृतनाभ्याम्; | पृद्भिः, पृतनाभिः |
| च० | पृते, पृतनायै; | " " | पृद्भ्यः, पृतनाभ्यः |
| पं० | पृतः, पृतनायाः; | " " | " " |
| ष० | " " | पृतोः, पृतनयोः; | पृताम्, पृतनानाम् |
| स० | पृति, पृतनायाम्; | " " | पृत्सु, पृतनासु |
| सं० | हे पृतने | हे पृतने | हे पृतनाः |

इमानि रूपाणि पाणिनीयाद्यवलम्बीनि । यतस्ते शसादौ पृतनायाः 'पृत्' इत्यादेशमिच्छन्ति ॥

स्वमते तु सर्वाणि रूपाणि 'दया' ( १६५ ) शब्दवज्ज्ञेयानि, पृदादेशाभावात् ॥

## ( १६९ ) आबन्तः स्त्रीलिङ्गः 'जरा' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | जरा | जरसौ, जरे; | जरसः, जराः |
| द्वि० | जराम् | " " | " " |
| तृ० | जरसा, जरया; | जराभ्याम्; | जराभिः |
| च० | जरसे, जरायै | " | जराभ्यः |
| पं० | जरसः, जरायाः; | " | " |
| ष० | " " | जरसोः, जरयोः; | जरसाम्, जराणाम् |
| स० | जरसि, जरायाम्; | " " | जरासु |
| सं० | हे जरे | हे जरसौ, हे जरे; | हे जरसः, हे जराः |

एवम्—सुजरा, परमजरा, प्रजरा-प्रभृतयः कर्मधारये; बहुव्रीहौ तु-विभक्तेरापाव्यवधानान्न जरसादेशस्तेन 'दया' ( १६५ ) शब्दवद्रूपाणि बोध्यानि ॥

एवं पुनः निर्जरा, अतिजरा, अजरा-प्रमुखानां बहुव्रीहिसमासे 'दया' वज्ज्ञेयम् ॥

साधनिका—" जराया जरस् वा " [ २, १, ३, ] इति स्वरादौ स्यादौ 'जरस्' इत्यादेशो वा बोध्यः । पक्षे व्यञ्जनादौ च 'दया' ( १६५ ) शब्दवत् । नवरं आमि जरसाभावपक्षे " रषृव० " [ २, ३, ६३ ] इति णत्वविशेषस्तेन 'जराणाम्' इति ॥

## ( १७० ) आबन्तः स्त्रीलिङ्गः 'अम्बा' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अम्बा | अम्बे | अम्बाः |
| द्वि० | अम्बाम् | " | " |
| तृ० | अम्बया | अम्बाभ्याम् | अम्बाभिः |
| च० | अम्बायै | " | अम्बाभ्यः |
| प० | अम्बायाः | " | " |
| ष० | " | अम्बयोः | अम्बानाम् |
| स० | अम्बायाम् | " | अम्बासु |
| सं० | हे ≡अम्ब | हे अम्बे | हे अम्बाः |

एवम्—अक्का, अल्ला, अत्ता, *प्रियाम्बा, परमाम्बा, अनम्बा प्रमुखाः ॥

≡ अत्र " नित्यदिद्द्विस्वराम्बार्थस्य ह्रस्वः " [ १, ४, ४३ ] इति आमन्त्र्यवृत्तिसिना सह ह्रस्वः ॥

* प्रियाम्बादिशब्दानां बहुस्वरत्वेऽपि तद्घटकाम्बाशब्दस्य द्विस्वरत्वम-व्याहतमेवेति तद्रूपाण्यपि अम्बावज्ज्ञेयानि ॥

## ( १७१ ) आबन्तः स्त्रीलिङ्गः 'अम्बाडा'[२] शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अम्बाडा | अम्बाडे | अम्बाडाः |
| द्वि० | अम्बाडाम् | ,, | ,, |
| तृ० | अम्बाडया | अम्बाडाभ्याम् | अम्बाडाभिः |
| च० | अम्बाडायै | ,, | अम्बाडाभ्यः |
| प० | अम्बाडायाः | ,, | ,, |
| ष० | ,, | अम्बाडयोः | अम्बाडानाम् |
| स० | आम्बाडायाम् | ,, | अम्बाडासु |
| सं० | हे अम्बाडे | हे अम्बाडे | हे अम्बाडाः |

२ अस्य शब्दस्य यद्यपि सर्वाणि रूपाणि दयावद् भवन्ति, तथापि "नित्य-दिद्द्विस्वराम्बार्थस्य ह्रस्वः" [ १, ४, ४३ ] इति सूत्रेण 'अम्बाडा' शब्दस्याम्बार्थत्वात ह्रस्वत्वप्राप्तिः, तथापि तस्मिन्नेव सूत्रे द्विस्वरग्रहणादस्य च त्रिस्वरत्वेन ह्रस्वत्वाभावो-भवतीति प्रदर्शनार्थं पृथग् ग्रहणम् ॥

## नित्यबहुवचनान्ता आबन्तास्त्रयः शब्दाः ।

| | (१७२)'वर्षा'शब्दः । | (१७३)'मघा'शब्दः। | (१७४)'कृत्तिका'शब्दः। |
|---|---|---|---|
| प्र० | वर्षाः | मघा | कृत्तिकाः |
| द्वि० | ,, | ,, | ,, |
| तृ० | वर्षाभिः | मघाभिः | कृत्तिकाभिः |
| च० | वर्षाभ्यः | मघाभ्यः | कृत्तिकाभ्यः |
| प० | ,, | ,, | ,, |
| ष० | वर्षाणाम् | मघानाम् | कृत्तिकानाम् |
| स० | वर्षासु | मघासु | कृत्तिकासु |
| सं | हे वर्षाः | हे मघाः | हे कृत्तिकाः |


साधनिका 'दया' (१६५) शब्दस्य बहुवचनवत् ॥

"अहंपूर्विकादिर्वर्षा, मघा अप्कृत्तिका बहौ ।
वा तु जलौकाप्सरसः सिकतासुमनःसमाः ॥९॥"

इति लिङ्गानुशासनवचनात्-वर्षा-मघा-×अप्-कृत्तिकाशब्दाः स्त्रीलिङ्गा बहुवचनान्ताः । यथा-इमा वर्षाः=प्रावृट् । एवं मघाः=नक्षत्रविशेषः । अप् आपः=जलम् । कृत्तिकाः=कृत्तिकानक्षत्रविशेषः ॥

इति श्रीमत्तपोगणाम्बराम्बरमणि-शासनसम्राट्-स्वपरसमयपारावारपारीणाऽऽ-चार्यचक्रचूडामणि-कलिकालकल्पतरुकल्प-तीर्थरक्षैकदक्ष-सुगृहीतनामधेय-जगद्गुरु-परमपूज्य पूज्यपाद-परमोपकारि-भट्टारकाचार्यवर्य-श्रीमद्विजयनेमिसूरीश्वर-पट्टालङ्कार-व्याकरणवाचस्पति-कविरत्न-शास्त्रविशारद-विबुधशिरोमणि-परमपूज्य-परमोपकारि-श्रीमद्गुरुराजभट्टारकगणाचार्य-श्रीमद्विजयलावण्यसूरीश्वर-चरणारविन्दमिलिन्दायमान-विनेयमुनि-दक्षविजय-विरचिते-

## श्रीस्याद्यन्तरत्नाकरे-स्वरान्तप्रकरणस्थम्-
## आकारान्त-प्रकरणम्



× अप् शब्दो व्यञ्जनान्तत्वादत्र नोपदर्शितः, अपि तु पकारान्तशब्दरूपोपदर्शनावसरे प्रदर्शयिष्यते

॥ ॐ ह्रीँ नमो नाणस्स ॥

# ॥ अथ इकारान्तप्रकरणम् ॥

(१७५) इकारान्तः पुँल्लिङ्गः 'मुनि'* शब्दः।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | मुनिः | मुनी | मुनयः |
| द्वि० | मुनिम् | ,, | मुनीन् |
| तृ० | मुनिना | मुनिभ्याम् | मुनिभिः |
| च० | मुनये | ,, | मुनिभ्यः |
| पं० | मुनेः | ,, | ,, |
| ष० | ,, | मुन्योः | मुनीनाम् |
| स० | मुनौ | ,, | मुनिषु |
| सं० | हे मुने | हे मुनी | हे मुनयः |

एवम्--सुमति, सुविधि, शान्ति, नमि, नेमि, कवि, नृपति, कपि, अग्नि, यति, अतिथि, निधि, मणि-प्रमुखाः।

स्त्रियां तु—

*ऊर्मीशम्यौ रत्न्यरत्नी अवीचि-र्लव्यण्याणिश्रेणयः श्रोण्यरण्यौ।
पार्ष्णीशल्यौ शाल्मलिर्यष्टिमुष्टी, योनिमुन्यौ स्वातिगव्यूतिबस्त्यः॥१०

इति लिङ्गानुशासनवचनाद् मुनिशब्दः स्त्रीलिङ्गेऽपि। यथाऽयं मुनिः, इयं मुनिः-तपस्वीत्यर्थः।

किञ्च " इतोऽक्त्यर्थात् " [२, ४, ३२] इति स्त्रियां ङीर्वा स्यात्, तेन मुनिशब्दस्य स्त्रियां द्वे प्रकृती, यथा–'**मुनि,मुनी**' इति। आद्याया वक्ष्यमाण 'मति' (१७७) शब्दवदपरायाश्च वक्ष्यमाण 'नदी' (२२५) शब्दवद्रूपाणि बोध्यानि ॥

**साधनिका**—मुनि+सि (स् ="सो रुः" [ २, १, ७२ ] इति सकारस्य रुः (रः), "रः पदान्ते विसर्गस्तयोः" [ १, ३, ५३ ] इति रस्य विसर्गे च '**मुनिः**' ॥ मुनि+औ="इदुतोऽस्त्रेरीदूत्" [ १, ४, २१ ] इति इकारौकारस्थाने ईकारे '**मुनी**' २ ॥ मुनि+जस् (अस्)="जस्येदोत्" [ १, ४, २२ ] इति इकारस्य एकारः, तस्य "एदैतोऽयाय्" [ १, २, २३ ] इति अयादेशे, सकारस्य रुत्वे विसर्गे च '**मुनयः**' ॥ मुनि+अम्="समानादमोऽतः" [ १. ४, ४६ ] इति अकारस्य लुकि '**मुनिम्**' ॥ मुनि+शस् (अस्)="शसोऽता सश्च नः पुंसि" [१, ४, ४९] इति इकाराऽकारस्थाने ईत्वे सस्य नत्वे च '**मुनीन्**' ॥ मुनि+टा (आ)=" टः पुंसि ना " [ १, ४, २४ ] इति टास्थाने 'ना' इत्यादेशे '**मुनिना**' ॥ मुनि+ङे (ए)="ङित्यदिति" [१ , ४, २३ ] इति इकारस्य एकारः, तस्य च 'अय्' इत्यादेशे '**मुनये**' ॥ मुनि+ङसि ( अस् ), ङस् (अस्)="ङित्यदिति" [ १, ४, २३ ] इति इस्थाने एकारादेशे, "एदोद्भ्यां ङसिङसो रः " [ १, ४, ३५ ] इति ङसिङसस्थाने रेफादेशे, तस्य च विसर्गे जाते '**मुनेः**' २ ॥ मुनि+ओस्=" इवर्णादेरस्वे स्वरे यवरलम् " [१, २, २१] इति इकारस्य यकारे, सस्य रुत्वे विसर्गे च सति '**मुन्योः**' २ ॥ मुनि+आम्=" ह्रस्वापश्च " [ १, ४, ३२ ] इति आम्स्थाने 'नाम्' इत्यादेशे "दीर्घो नाम्यतिसृ०" [ १, ४, ४७ ] इति इकारस्य दीर्घत्वे च '**मुनीनाम्**'॥ मुनि+ङि (इ)="ङिडौं" [ १, ४, २५ ] इति ङिस्थाने डौ (औ) भवति, तदनु 'व्यपदेशिवदेकस्मिन्' इति न्यायबलात् " डित्यन्त्यस्वरादेः " [ २, १, ११४ ] इति इकारस्य लुकि '**मुनौ**' ॥ मुनि+सुप् (सु)="नाम्यन्तस्था०" [ २, ३, १५ ] इति सस्य षत्वे '**मुनिषु**' ॥ सम्बोधनैकवचने 'मुनि+सि'= " ह्रस्वस्य गुणः " [ १, ४, ४१ ] इति सिना सह इकारस्य गुणे जाते '**हे मुने**' ॥ अत्र आसन्नपरिभाषया इस्थाने एकाररूपो गुणो भवति ॥ सम्बोधनद्विवचनबहुवचनन्तु प्रथमावत् साध्यम् ॥

## (१७६) इकारान्तः पुँल्लिङ्गः 'ऋषि' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | ऋषिः | ऋषी | ऋषयः |
| द्वि० | ऋषिम् | ,, | ऋषीन् |
| तृ० | ऋषिणा | ऋषिभ्याम् | ऋषिभिः |
| च० | ऋषये | ,, | ऋषिभ्यः |
| प० | ऋषेः | ,, | ,, |
| ष० | ,, | ऋष्योः | ऋषीणाम् |
| स० | ऋषौ | ,, | ऋषिषु |
| सं० | हे ऋषे | हे ऋषी | हे ऋषयः |

एवम्—महर्षि, रवि, गिरि, सूरि, हरि, अद्रि, सौरि, अरि, दानवारि-प्रमुखाः ।

साधनिका तु 'मुनि' (१७५) शब्दवदेवावसेया; अपि तु तृतीयैकवचने षष्ठीबहुवचने च "रषृवर्णा०" [ २, ३, ६३ ] इति णत्वविशेषो बोध्यः ॥

## (१७७) इकारान्तः स्त्रीलिङ्गः 'मति' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | मतिः | मती | मतयः |
| द्वि० | मतिम् | ,, | मतीः |
| तृ० | मत्या | मतिभ्याम् | मतिभिः |
| च० | मत्यै, मतये | ,, | मतिभ्यः |
| प० | मत्याः, मतेः | ,, | ,, |
| ष० | ,, ,, | मत्योः | मतीनाम् |
| स० | मत्याम्, मतौ | मत्योः | मतिषु |
| सं० | हे मते, | हे मती | हे मतयः |

एवम्—बुद्धि, वृद्धि, कीर्ति, कान्ति, कृति, तुष्टि, पुष्टि, ऋद्धि, रुचि, श्रेणि, पङ्क्ति, श्रुति, स्मृति-प्रभृतयः ।

एवं पुनः—भूमि, अङ्गुलि, धूलि, आलि, धमनि, दार्वि, श्रोणि, राजि, यावलि, यष्टि, शारि, सरणि, अशनि, अरणि, शकृत्करि, आत्मंभरि, कपि, अहि, तारि, मुनि, अञ्चति, अङ्कति अंहति, शकटि, शस्त्रि, रजनि, धरणि, रात्रि- इति क्त्यर्थभिन्नेभ्योऽष्टाविंशतेः शब्देभ्यः “ ×इतोऽक्त्यर्थात् ” [ २, ४, ३२] इति सूत्रेण ङीर्विकल्पेन भवति; तेन भूमी, भूमिः- इत्येवं रीत्याऽष्टाविंशतेः शब्दानां प्रकृतिद्वयम् । यदा ङीस्तदा वक्ष्यमाण 'नदी' (२२५) शब्दवद्रूपाणि तत् साधनिका च स्यात् । ङ्यभावे तु 'मति' वद्रूपाणि बोध्यानि ॥

**साधनिकेयम्**—शसि “ शसोऽता सश्च नः पुंसि ” [१, ४, ४९] इति इकारस्य दीर्घत्वेऽपि स्त्रीत्वात् शसः सस्य नो न स्यादिति **'मतीः'** ॥ टापरे तु “इवर्णादे०” [१, २, २१] इति इस्थाने यत्वे **'मत्या'** । ङेङसिङस्ङिपरे तु “ स्त्रिया ङितां वा दैदास्दास्दाम् [ १, ४, २८ ] इति (ङेङसिङस्ङिप्रत्ययाः 'ङित्' वचनेन व्यपदिश्यन्ते इति) ङिद्वचनानामनुक्रमेण दै-दास्-दास्-दाम्- इत्येवंरूपा आदेशा भवन्ति तत्राऽपि दकारः सर्वत्र इत् । तथा च ङिताम् दितः ऐ-आस्-आस्-आम् स्युः, तदनु “इवर्णा०” [ १, २, २१ ] इति इस्थाने यत्वे सति **'मत्यै'**, (सस्य रुत्वे विसर्गे च) **'मत्याः'** २, **'मत्याम्'** ॥ पक्षान्तररूपसाधनिकाऽवशिष्टा च साधनिका 'मुनि' (१७५) वज्ज्ञेया ॥

---

× नन्वत्र क्त्यर्थप्रत्ययान्तस्य वर्जनात् क्तिप्रत्ययान्ताभ्यां पद्धतिशक्तिशब्दाभ्यां कथं ङीरवविकल्प इति चेदुच्यते-पद्धतिशब्दात् “पद्धतेः” [२, ४, ३३] इति सूत्रेण, शक्तिशब्दाच्च “ शक्तेः शस्त्रे ” [ २, ४, ३४ ] इति सूत्रेण च ङीविकल्पः, तेन 'पद्धती पद्धतिः शक्ती शक्तिः'॥ [शस्त्रादन्यस्मिन्नर्थे ङी न भवति, तेन तत्र 'शक्ति' इत्येकैव प्रकृतिः ]

अन्ये तु-अञ्चति-अङ्कति-अंहति-शकटि-शस्त्रि-शारि-तारि-अहि-कपि-

## (१७८) इकारान्तो नपुंसकलिङ्गः 'वारि' शब्दः ॥

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | वारि | वारिणी | वारीणि |
| द्वि० | ,, | ,, | ,, |
| तृ० | वारिणा | वारिभ्याम् | वारिभिः |
| च० | वारिणे | ,, | वारिभ्यः |
| प० | वारिणः | ,, | ,, |
| ष० | ,, | वारिणोः | वारीणाम् |
| स० | वारिणि | ,, | वारिषु |
| सं० | हे वारे, हे वारि; | हे वारिणी | हे वारीणि |

साधनिका—वारि+सि, अम्="अनतो लुप्" [ १, ४, ५९ ] इति स्यमोर्लुपि 'वारि' २ ॥ वारि+औ="औरी" [ १, ४, ५६ ] इति औकारस्य ईकारे "अनामस्वरे नोऽन्तः" [ १, ४, ६४ ] इति नेऽन्ते सति "रषृवर्णा०" [ २, ३, ६३ ] इति नस्य णत्वे च 'वारिणी' २ ॥ वारि+जस्, शस् (अस्)="नपुंसकस्य शिः" [ १, ४, ५५ ] इति जस्-शसोः 'शि' इत्यादेशे "स्वराच्छौ" [ १, ४, ६५ ] इति नेऽन्ते सति 'वारिन्+इ' इति जाते "इन्हन्पूषा०" [ १, ४, ८७ ] इति सूत्रेण दीर्घत्वप्राप्तावपि 'लाक्षणिकप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति न्याये-

---

मुनि-रात्रि-यष्टिभ्यः, कटि-श्रोणिप्रभृतिप्राण्यङ्गवाचिभ्यः, क्तिवर्जितकृदन्तेभ्यश्चेकारन्तेभ्य इच्छन्ति नान्येभ्यः। तन्मते शोभनो गन्धो यस्याः सा सुगन्धिः सुरभिगन्धिः, निर्गता कौशाम्ब्या निष्कौशाम्बिः अग्निः, शाणिः—इत्यादिषु न भवति। क्तिमात्रवर्जनाच्च—अकरणि, अजननि, ज्यानि, ग्लानि प्रभृतिषु न प्रतिषेधः, अत एव तेषां मते अकरणिप्रभृतिष्वपि ङी वा भवतीति ॥ स्वमते तु क्तिप्रत्ययान्तस्य क्त्यर्थप्रत्ययान्तस्य च वर्जनात् क्तिप्रत्ययान्तेभ्यो मति-बुद्धिप्रभृतिभ्यः, क्त्यर्थप्रत्ययान्तेभ्योऽकरणिप्रभृतिभ्यश्च ङीप्रत्ययो विकल्पेन न भवतीति भावः ॥

नात्र इनो लाक्षणिकत्वात्तन्न भवति किन्तु " नि दीर्घः " [ १, ४, ८५ ] इत्यनेनैव दीर्घत्वे जाते " रषृवर्णा० " [ २, ३, ६३ ] इति नस्य णत्वे च सति 'वारीणि' २ इति । लाक्षणिकस्य अनित्यत्वात् केचित् "इनूहन्पूषा०" [१, ४, ८७] इति सूत्रेण दीर्घमपि कुर्वन्ति ॥ वारि+टा–ङसि–ङस्–ओस्–ङि=" अनामूस्वरे नोऽन्तः " [ १, ४, ६४ ] इति नोऽन्तो भवति, तदनु नस्य णत्वे 'वारिणा, वारिणे, वारिणः २, वारिणोः २, वारिणि' इति ॥ वारि+आम्=अत्र नागमाभावात् " ह्रस्वापश्च " [१, ४, ३२] इत्यग्मो नामि सति " दीर्घो नाम्य० " [ १, ४, ४७ ] इति दीर्घत्वे 'वारीणाम्' इति ॥ सुपि " नाम्यन्त० " [ २, ३, १५ ] इति सस्य षत्वे 'वारिषु' ॥ सम्बोधने सौ " नामिनो लुग् वा " [ १, ४, ६१ ] इति सेर्लुकि तस्य "स्थानीवाऽवर्णविधौ" [ ७, ४, १०९ ] इति आसन्नपरिभाषया "ह्रस्वस्य गुणः" [ १, ४, ४१ ] इति *स्थानिवद्भावे सति एकारे (गुणे) जाते 'हे वारे' पक्षे " अनतो लुप् " [ १, ४, ५९ ] इति सेर्लुपि 'हे वारि' नन्वत्र सेर्लुपः स्थानिवद्भावेन भाव्यमिति चेत् ? न, "लुप्यय्वृल्लेनत्" [७, ४, ११२] इति लुप्तस्य सेः स्थानिवद्भावप्रतिषेधात् ॥

## (१७९) इकारान्तो विशेषणवाचकः 'शुचि' शब्दः । तत्र पुंसि–

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | शुचिः | शुची | शुचयः |
| द्वि० | शुचिम् | " | शुचीन् |

एवं पुँल्लिङ्गे 'मुनि' ( १७७ ) शब्दवत् सर्वाणि रूपाणि तत्साधनिका च ज्ञेया ॥

---

* स्थानिनि सति यत् कार्यं स्यात्, तत् कार्यं तदादेशेऽपि स्यादिति स्थानिवद्भावभावार्थः ॥

## स्त्रीलिङ्गे तु—

'मति' (१७७) शब्दवत् सर्वं बोध्यम् । किञ्च यदा "इतोऽक्त्यर्थात्" [ २, ४, ३२ ] इति ङीः स्यात्तदा स्त्रियां 'शुचि' इति प्रकृतिः, तद्रूपाणि वक्ष्यमाण 'नदी' ( २२५ ) शब्दवदवसेयानि ॥

## नपुंसकलिङ्गे तु—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | शुचि | शुचिनी | शुचीनि |
| द्वि० | " | " | " |
| तृ० | शुचिना | शुचिभ्याम् | शुचिभिः |
| च० | शुचये, शुचिने | " | शुचिभ्यः |
| प० | शुचेः, शुचिनः | " | " |
| ष० | " " | शुच्योः, शुचिनोः | शुचीनाम् |
| स० | शुचौ, शुचिनि; | " " | शुचिषु |
| सं० | हे शुचे, शुचि; | हे शुचिनी | शुचीनि |

एवम्–सुगन्धि, दीर्घाङ्गुलि–प्रमुखा इकारान्ता विशेषणरूपाः शब्दा बोध्याः॥

**साधनिका**—" वान्यतः पुमांष्टादौ स्वरे " [ १, ४, ६२ ] इति सूत्रेण (यो नाम्यन्तः शब्दो विशेष्यवशान्नपुंसकः स) स्वरादौ टादौ परे पुंवद् विकल्पेन भवति । तेन पुंवद्भावपक्षे नागमाभावात् स्वरादौ टादौ परे 'मुनि' ( १७५ ) शब्दवत्; शेषं सर्वं 'वारि' ( १७९ ) शब्दवज्ज्ञेयम्, अपि तु णत्वाभावोऽत्र सर्वत्र वाच्यः ॥

## (१८०) इकारान्तस्त्रिलिङ्गकः 'सखि' शब्दः । तत्र पुँल्लिङ्गे—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | सखा | सखायौ | सखायः |
| द्वि० | सखायम् | " | सखीन् |

| | | | |
|---|---|---|---|
| तृ० | सख्या | सखिभ्याम् | सखिभिः |
| च० | सख्ये | ,, | सखिभ्यः |
| प० | सख्युः | ,, | ,, |
| ष० | ,, | सख्योः | सखीनाम् |
| स० | सख्यौ | ,, | सखिषु |
| सं० | हे सखे | हे सखायौ | हे सखायः |

साधनिका—सखि+सि=" ऋदुशनस्पुरुदंशोऽनेहसश्च सेर्डाः " [१, ४, ८४] इति सिस्थाने डा इत्यादेशे सति ( डा इत्यत्र डकार इत्-अत एव ) 'सखि+आ' इति जाते " डित्यन्त्यस्वरादेः" [२, १, ११४] इति 'व्यपदेशिवदेकस्मिन्' इति न्यायबलाद् इकारस्य लुकि 'सखा' इति ॥ सखि+औ, जस्, अम्="सख्युरितोऽशावैत्" [१, ४, ८३] इति सखिशब्दस्य इकारस्य ऐकारादेशे " एदैतोऽयाय् " [१, २, २३] इति ऐकारस्य 'आय्' इत्यादेशे सति 'सखायौ' २, सखायः, सखायम् ॥ सखि+शस्(अस्)=" शसोऽता सश्च नः पुंसि " [१, ४, ४९] इति दीर्घत्वे सस्य नत्वे च 'सखीन्' ॥ सखि+टा,ङे (आ,ए)="न नाङिदेत् " [१, ४, २७] इति सूत्रेण टावचनस्य नादेशो, ङिति परे एकारश्च न स्यात् । तथा च " टः पुंसि ना " [१, ४, २४] " ङित्यदिति " [१, ४ २३] इति सूत्रद्वयं बाधितमनेन; अत एव "इवर्णादे० " [१, २, २१] इति यत्वे सति-'सख्या, सख्ये' इति ॥ सखि+ङसि(अस्),ङस्(अस्)=" इवर्णादे० " [१, २, २१] इति ( खि-इत्यस्य इकारस्य यत्वे " खितिखीतीय उर् " [१, ४, ३६] इति परयोर्ङसिङसोः स्थाने 'उर्' इत्यादेशे रेफस्य विसर्गे च सति 'सख्युः' २ ॥ सखि+ङि(इ)= " केवलसखिपतेरौः " [१, ४, २६] इति ङेः औः स्यात्, तदनु इस्वस्य यत्वे 'सख्यौ' ॥ सम्बोधने सौ " ऋदुशनस्० " [१, ४, ८४] इति सेर्डा न स्यात्, सम्बोधनसेस्तत्राग्रहणात्; किन्तु " ह्रस्वस्य गुणः " [१, ४, ४१] इति गुणे सति 'हे सखे' ॥ शेषा साधनिका सुगमा स्वधियावसेया

## स्त्रीलिङ्गे तु—

" नारी सखी पङ्गू श्वश्रू " [ २, ४, ७६ ] इति सूत्रेण सखि शब्दात् सखशब्दाच्च बहुव्रीहेर्ङी निपात्यते; तेन 'सखी' इति दीर्घ-ईकारान्तः प्रकृतिः ॥ सह खेन वर्तते या साऽपि 'सखी'। निपातनसामर्थ्यात् भवयोगेऽपि। 'सखी' इत्यस्य रूपाणि तत्साधनिका च वक्ष्यमाण 'नदी' (२२५) शब्दवद्बोध्या ॥

## नपुंसकलिङ्गे तु—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | सखि | सखिनी | सखीनि |
| द्वि० | " | " | " |
| तृ० | सख्या, सखिना | सखिभ्याम् | सखिभिः |
| च० | सख्ये, सखिने | " | सखिभ्यः |
| प० | सख्युः, सखिनः | " | " |
| ष० | " " | सख्योः, सखिनोः | सखीनाम् |
| स० | सख्यौ, सखिनि | " " | सखिषु |
| सं० | हे सखे, हे सखि; | हे सखिनी | हे सखीनि |

साधनिका—" वान्यतः पुमांष्टादौ स्वरे " [ १, ४, ६२ ] इति स्वरादौ टादौ पुंवद्भावोऽत्र वा बोध्यः। पुंवद्भावपक्षे पुँल्लिङ्गवत्-अन्यत्र णत्वं विना 'वारि' (१७८) वत्साध्यम् ॥

## (१८१) इकारान्तो विशेषणवाचकः 'प्रियसखि' शब्दः।

### तत्र पुँल्लिङ्गे—

( प्रियः सखा यस्यसः प्रियसखा )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | प्रियसखा | प्रियसखायौ | प्रियसखायः |
| द्वि० | प्रियसखायम् | " | प्रियसखीन् |

| | | | |
|---|---|---|---|
| तृ० | प्रियसखिना | प्रियसखिभ्याम् | प्रियसखिभिः |
| च० | प्रियसखये | ,, | प्रियसखिभ्यः |
| प० | प्रियसखेः | ,, | ,, |
| ष० | ,, | प्रियसख्योः | प्रियसखीनाम् |
| स० | प्रियसखौ | ,, | प्रियसखिषु |
| सं० | हे प्रियसखे | हे प्रियसखायौ | हे प्रियसखायः |

एवम्—परमसखि-प्रमुखाः ॥

**साधनिका**—अत्र " ऋदुशन० " [ १, ४, ८४ ] इत्यत्र " सख्युरितो० " [ १, ४, ८३ ] इत्यत्र चाऽन्यसम्बन्धिनोऽपि विज्ञानात् सेर्डाः-ऐकारान्तादेशश्च भवत्येव, तेन प्रथमरूपपञ्चक-चरमरूपद्वयसाधनिका केवलसखिशब्दवद्बोध्या ॥ टाङेङसिङस्ङिपरे तु 'मुनि' (१७५) वत्साध्यं केवलत्वाभावात् ॥ शेषमपि 'मुनि' वत् ॥

ननु ङसिङस्परे " खितिखीतीय उर् " [ १, ४, ३६ ] इत्यत्र केवलग्रहणाभावात्तेन सूत्रेण 'उर्' इत्यादेशेन भाव्यमिति चेत् ?, मैवम्, तस्मिन्नेव सूत्रे-यत्र यत्वादेशस्तत्रैव 'उर्' विधानात्, ङसिङसोः ङिद्वचनत्वेऽपि " न नाङिदेत् " [१, ४, २७] इत्यस्मिन् सूत्रे केवलस्यैव ग्रहणात् " ङित्यदिति" [ १, ४, २३ ] इति विधीयमान-एत्वनिषेधाभावस्तेन पूर्वमेत्वादेशभवनाद् यत्वादेशाभावादुरादेशाभावो भाव्यः ॥

## स्त्रीलिङ्गे तु—

( प्रियः सखा यस्याः सा प्रियसखा— )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | प्रियसखा | प्रियसखायौ | प्रियसखायः |
| द्वि० | प्रियसखायम् | ,, | प्रियसखीः |
| तृ० | प्रियसख्या | प्रियसखिभ्याम् | प्रियसखिभिः |

| | | | |
|---|---|---|---|
| च० | प्रियसख्यै, प्रियसखये; | प्रियसखिभ्याम्, | प्रियसखिभ्यः |
| प० | प्रियसख्याः, प्रियसखेः; | ,, | ,, |
| ष० | ,, ,, | प्रियसख्योः | प्रियसखीनाम् |
| स० | प्रियसख्याम्, प्रियसखौ; | ,, | प्रियसखिषु |
| सं० | हे प्रियसखे | हे प्रियसखायौ | हे प्रियसखायः |

प्रियसखिशब्दस्य स्त्र्यर्थभिन्नत्वेन यदा तु " इतोऽक्त्यर्थात् " [ २, ४, ३२ ] इति ङीस्तदा ' प्रियसखी ' इति दीर्घेकारान्तप्रकृतिः, तद्रूपाणि सर्वाणि वक्ष्यमाण ' नदी ' ( २२५ ) वज्ज्ञेयानि ॥ अत्र ङीपक्षे " खिति-खीतीय उर् " [ १, ४, ३६ ] इति सूत्रे ' अदिति ' इत्यनुवृत्तेर्दिद्भिन्नस्थले ङसिङसोः 'उर्' विधानादत्र " स्त्रीदूतः " [ १, ४, २९ ] इति ङसिङसो-र्दित्वादुरादेशाभावः ॥

साधनिका–'सि-औ-जस्-अम्-औ' परेऽन्यसम्बन्धिनोऽपि ग्रहणात् केवलसखिवत्साध्यम् ॥ शसादौ तु 'मति' ( १७७ ) वत्साध्यम् ॥ ङेङसिङस-ङिपरे तु " स्त्रिया ङितां वा दैदास्दास्दाम् " [ १, ४, २८ ] इति ङिद्व-चनानामनुक्रमेण 'ऐ–आस्–आस्–आमो दितः वा स्युः । यदा दिदादेशास्तदा दित्वादेव ङसिङसोः उरभावः । ङेपरे ङिपरे च केवलत्वाभावात् केवल-सखिकार्यं न स्यात् । दिदादेशाभावपक्षेऽपि तथैव; किन्तु " ननाङिदेत् " [ १, ४, २७ ] इति सूत्रेण " ङित्यदिति " [ १, ४, २३ ] इति विहि-तस्य एत्वस्य निषेधो न भवितुमर्हति, तत्र केवलग्रहणात् । अत्र तु केवलाभा-वात्पूर्वमेव एत्वे सति यत्वाभावः । यत्वाभावाच्च उरादेशाभावो बोध्यः, उरा-देशस्य यत्वादेशस्थले विधानात् ॥

## नपुंसकलिङ्गे तु–-

( प्रियः सखा यस्य कुलस्य तत् प्रियसखि )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | प्रियसखि | प्रियसखिनी | प्रियसखीनि |

| | | | |
|---|---|---|---|
| द्वि० | प्रियसखि | प्रियसखिनी | प्रियसखीनि |
| तृ० | प्रियसखिना | प्रियसखिभ्याम् | प्रियसखिभिः |
| च० | प्रियसखये, प्रियसखिने | „ | प्रियसखिभ्यः |
| प० | प्रियसखेः, प्रियसखिनः | „ | „ |
| ष० | „ „ | प्रियसख्योः, प्रियसखिनोः; | प्रियसखीनाम् |
| सं० | हे प्रियसखे, हे प्रियसखि; | हे प्रियसखिनी; | हे प्रियसखीनि |

साधनिका—सर्वमत्र नपुंसकलिङ्गक 'शुचि' (१७९) वद्बोध्यम् ॥ ननु कथमत्र सखिकार्यं नेति चेदुच्यते-सौ " अनतो लुप्" [ ३, २, ६ ] इति सेर्लुप्, तस्य स्थानिवद्भावनिषेधात् " ऋदुशन० " [ १, ४, ८४ ] इति सूत्रं न प्रवर्तते, सेरभावात् ॥ औपरे अम्परे च " सख्युरितो० " [१, ४, ८३] इति सूत्रं न प्रवर्तते, नपुंसकस्य औप्रत्ययस्य अम्प्रत्ययस्य च घुट्संज्ञाया अभात् ॥ जस्शस्परे यद्यपि " नपुंसकस्य शिः " [ १, ४, ५५ ] इति जस्शसोः शिर्भवति, तस्य च " शिर्घुट् " [ १, १, २८ ] इति घुट्संज्ञायां सत्यामपि " सख्युरितोऽशावैत् " [ १, ४, ८३ ] इति सूत्राप्रवृत्तिः, ' अशौ ' इति वचनात् ॥ स्वरादौ टादौ तु " वान्यतः पुमांष्टादौ स्वरे " [ १, ४, ६२ ] इति पुंवद्भावपक्षे पुँल्लिङ्गवत्, तदभावे च " अनामृस्वरे नोऽन्तः " [ १, ४, ६४ ] इति नोऽन्तागमो बोध्यः ॥

प्रियश्चासौ सखा च 'प्रियसखः' । अत्र "राजन्सखेः" [७, ३, १०६] इति तत्पुरुषात् समासान्तोऽट् भवति, तेन अकारान्तप्रियसखशब्दो भवति; तस्य रूपाणि पुंसि 'जिन' ( ७४ ) वत्, स्त्रीयां प्रिया चासौ सखी 'प्रिय-सखी' इत्यस्य रूपाणि वक्ष्यमाण ' नदी ' ( २२५ ) वत्, क्लीबे तु-प्रियं च तत् सखि च 'प्रियसखम्' इति विग्रहे 'दर्शन' (१५१) वद्रूपाणि बोध्यानि ॥ एवम्-परमाश्चासौ सखा च 'परमसखः' अत्र सर्वं त्रिषु लिङ्गेषु प्रियसखशब्दवज्ज्ञेयम् ॥

## (१८२) इकारान्तो विशेषणवाचकः 'अतिसखि' शब्दः पुँल्लिङ्गे—

( सखीमतिक्रान्तोऽतिसखिः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अतिसखिः | अतिसखी | अतिसखयः |
| द्वि० | अतिसखिम् | ,, | अतिसखीन् |
| तृ० | अतिसखिना | अतिसखिभ्याम् | अतिसखिभिः |
| च० | अतिसखये | ,, | अतिसखिभ्यः |
| प० | अतिसखेः | ,, | ,, |
| ष० | ,, | अतिसख्योः | अतिसखीनाम् |
| स० | अतिसखौ | ,, | अतिसखिषु |
| सं० | हे अतिसखे | हे अतिसखी | हे अतिसखयः |

सखीमतिक्रान्तोऽतिसखिरित्यत्र "राजन्सखेः" [ ७, ३, १०६ ] इति सूत्रेण नाऽट् समासान्तः, 'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषाया अनित्यत्वात् । "गोश्चान्ते ह्रस्वो०" [ २, ४, ९६ ] इति ह्रस्वत्वे 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति न्यायादत्र सखिशब्दस्य लाक्षणिकत्वेन ऐत्वादिकार्याभावात् सर्वं 'मुनि' (१७५) वदवसेयम् ॥

### स्त्रीलिङ्गे तु—

( सखीमतिक्रान्ता या सा अतिसखिः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अतिसखिः | अतिसखी | अतिसखयः |
| द्वि० | अतिसखिम् | ,, | अतिसखीः |
| तृ० | अतिसख्या | अतिसखिभ्याम् | अतिसखिभिः |
| च० | अतिसख्यै, अतिसखये; | ,, | अतिसखिभ्यः |
| प० | अतिसख्याः, अतिसखेः; | ,, | ,, |
| ष० | ,, ,, | अतिसख्योः | अतिसखीनाम् |

| | | | |
|---|---|---|---|
| स० | अतिसख्याम्, अतिसखौ; | अतिसख्योः | अतिसखीषु |
| सं० | हे अतिसखे | हे अतिसखी | हे अतिसखयः |

सर्वमत्र 'मति' (१७५) वद्बोध्यं लाक्षणिकत्वात् ॥ यदातु "इतोऽक्त्यर्थात्" [ २, ४, ३२ ] इति ङीस्तदा 'अतिसखी' इति दीर्घेकारान्तप्रकृतिः, तद्रूपाणि वक्ष्यमाण 'नदी' (२२५) वद्वाच्यानि ॥

## नपुंसकलिङ्गे तु—

सखीमतिक्रान्तं यत्कुलादिकं तद् 'अतिसखि' इत्यस्य रूपाणि तत्साधनिका च नपुंसकलिङ्ग 'शुचि' (१७९) शब्दवदवसेया ॥

अतिशयितः सखा अतिसखा इति विग्रहे 'अतिसखि' शब्दः ।

## पुँल्लिङ्गे—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अतिसखा | अतिसखायौ | अतिसखायः |
| द्वि० | अतिसखायम् | ,, | अतिसखीन् |
| तृ० | अतिसखिना | अतिसखिभ्याम् | अतिसखिभिः |

इत्थं सर्वं पुँल्लिङ्ग 'प्रियसखि' (१८१) वज्ज्ञेयम् ॥ नन्वत्र "राजन्सखेः" [७, ३, १०६] इति समासान्तेन अट्प्रत्ययेन भाव्यमितिचेन्न-"पूजास्वतेः प्राक् टात्" [ ७, ३, ७२ ] इत्यनेन पूजायां तन्निषेधात् ॥

## स्त्रीलिङ्गे तु—

( अतिशयिता या सखी सा अतिसखी )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अतिसखी | अतिसख्यौ | अतिसख्यः |

एवमग्रे सर्वं वक्ष्यमाण 'नदी' (२२५) वज्ज्ञेयम् ॥

## नपुंसकलिङ्गे तु—

अतिशयितं यत् सखि तद् 'अतिसखि' इत्यस्य रूपाणि तत्साधनिका च नपुंसकलिङ्गप्रियसखिवज्ज्ञेया ॥

सखायमतिक्रान्तः-इति विग्रहे "राजन्सखेः" [७, ३, १०६] इति समासान्तोऽट् भवति, तदनु "अवर्णेवर्णस्य" [७, ४, ६८] इति इकारस्य लुकि 'अतिसख' इति अकारान्तो भवति ॥

## पुँल्लिङ्गे—

सखायमतिक्रान्तः='अतिसखः' 'जिन' (७४) वत् ॥

## स्त्रीलिङ्गे—

सखायमतिक्रान्ता=अतिसखी 'वक्ष्यमाण' 'नदी' (२२५) वत् । अट्प्रत्ययान्तत्वेन टित्त्वादत्र "अणञेयेकण्नञ्स्नञ्टिताम्" [ २, ४, २० ] इति ङीर्भवतीति ॥

## नपुंसकलिङ्गे तु—

सखायमतिक्रान्तं यत् कुलादिकं तद्'अतिसखम्' दर्शन (१५६) वत् ॥

## (१८३) इकारान्तो विशेषणवाचकः 'सुसखि' शब्दः । पुँल्लिङ्गे—

( शोभनश्चासौ सखा च सुसखा, अथवा पूजितः सखा सुसखा )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | सुसखा | सुसखायौ | सुसखायः |
| द्वि० | सुसखायम् | ,, | सुसखीन् |
| तृ० | सुसखिना | सुसखिभ्याम् | सुसखिभिः |

इत्थं सर्वमग्रे पुँल्लिङ्ग 'प्रियसखि' ( १८१ ) वद्विभावनीयम्; किञ्चात्र यद्यपि "राजन्सखेः" [ ७, ३, १०६ ] इति समासान्ताऽट्प्रत्ययस्य प्राप्तिस्तथापि "पूजास्वतेः प्राक् टात्" [ ७, ३, ७२ ] इत्यनेन तन्निषेधादटोऽभावो भाव्यः ॥

## स्त्रीलिङ्गे तु––

शोभना चासौ सखी च 'सुसखी' इति विग्रहे रूपाणि तत्साधनिका च वक्ष्यमाण 'नदी' (२२५) वदवसेया ॥

## नपुंसकलिङ्गे तु––

शोभनं च तत् सखि च 'सुसखि' इत्यस्य रूपाणि तत्साधनिका च नपुंसकलिङ्ग 'शुचि' (१७९) वदवसेया । केवलाभावात् सखिकार्यं न ॥

शोभनः सुन्दरो वा सखा यस्य इति विग्रहेऽपि 'प्रियसखि' वत् त्रिष्वपि लिङ्गेषु सर्वं ज्ञेयम् ॥

## (१८४) इकारान्तो विशेषणवाचकः ×'पति' शब्दः । तत्र पुँल्लिङ्गे–

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | पतिः | पती | पतयः |
| द्वि० | पतिम् | ,, | पतीन् |
| तृ० | पत्या | पतिभ्याम् | पतिभिः |
| च० | पत्ये | ,, | पतिभ्यः |
| प० | पत्युः | ,, | ,, |
| ष० | ,, | पत्योः | पतीनाम् |
| स० | पत्यौ+ | ,, | पतिषु |
| सं० | हे पते | हे पती | हे पतयः |

साधनिका–'पति+टा(आ),ङे(ए)'=" न नाङिदेत् " [ १, ४, २७ ]

× भूपति-नृपति-क्षितिपति-गृहपति-ग्रामपति-प्रमुखास्तु 'मुनि' (१७५) वत्, केवलत्वाभावात् ॥ पाति रक्षतीति पतिः ॥ भर्तरि अर्थे पुँल्लिङ्गः । अधिपतौ (ईशेऽर्थे) तु त्रिष्वपि लिङ्गेषु ज्ञेयः ॥

+ 'पतौ' इति कश्चित् (दुर्गसिंहश्रुतपालादिः) ॥

इत्यनेन टावचनस्य नादेशो, ङिति परे एकारश्च न भवति । अत एव "इवर्णादे०" [१, २, २१] इति यत्वे 'पत्या, पत्ये' इति ॥ ङसिङस्परे पूर्वं यत्वे सति "खितिखीतीय उर्" [ १, ४, ३६ ] इति ङसिङसोः 'उर्' इत्यादेशे, रेफस्य विसर्गे च सति 'पत्युः' २ ॥ ङिपरे 'केवलसखिपतेरौः' [१, ४, २६] इति ङेः 'औ' सति 'पत्यौ' ॥ शेषं 'मुनि' (१७५) वत्साध्यम् ॥

## स्त्रीलिङ्गे तु—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | पतिः | पती | पतयः |
| द्वि० | पतिम् | ,, | पतीः |
| तृ० | पत्या | पतिभ्याम् | पतिभिः |
| च० | पत्यै, पत्ये | ,, | पतिभ्यः |
| पं० | पत्याः, पत्युः | ,, | ,, |
| ष० | ,, ,, | पत्योः | पतीनाम् |
| स० | पत्याम्, पत्यौ | ,, | पतिषु |
| सं० | हे पते | हे पती | हे पतयः |

साधनिका-शसि "शसोऽता सश्च नः पुंसि" [ १, ४, ४९ ] इति दीर्घत्वं भवति, अपि तु पुंस्त्वाभावात् सस्य नत्वं न भवति किन्तु सस्य रुत्वे तस्य विसर्गे च सति 'पतीः' ॥ ङेङसिङस्ङिपरे "स्त्रिया ङितां वा दैदास्दास्दाम्" [ १, ४, २८ ] इत्यनेन दिदादेश पक्षे 'मति' (१७७) वत्, तदभावपक्षे च पुंवत्साध्यम् ॥

यदा "इतोऽक्त्यर्थात्" [२, ४, ३२] इति ङीस्तदा 'पती' इति । यदा तु 'परिणीता स्त्री' इत्यर्थो विवक्ष्यते, तदा तु "ऊढायाम्" [२, ४, ५१] इति ङीर्नश्चान्तस्य स्यात्तेन 'पत्नी' इति । 'पती, पत्नी' उभयो रूपाणि तत्साधनिका च वक्ष्यमाण 'नदी' (२२५) शब्दवदवसेया ॥

## नपुंसकलिङ्गे तु—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | पति | पतिनी | पतीनि |
| द्वि० | ,, | ,, | ,, |
| तृ० | पत्या, पतिना | पतिभ्याम् | पतिभिः |
| च० | पत्ये, पतिने | ,, | पतिभ्यः |
| प० | पत्युः, पतिनः | ,, | ,, |
| ष० | ,, ,, | पत्योः, पतिनोः | पतीनाम् |
| स० | पत्यौ, पतिनि | ,, ,, | पतीषु |
| सं० | हे पते, हे पति | हे पतिनी | हे पतीनि |

साधनिका—स्वरादिटादिपरे "वान्यतः पुमांष्टादौ स्वरे" (१, ४, ६२) इति विकल्पेन पुंवद्भावः । पुंवद्भावपक्षे पुंल्लिङ्गवत् साध्यम्, तदभावे च सर्वं (णत्वाभावान्वितं) 'वारि' (१७८) वद्बोध्यम् ॥

## (१८५) इकारान्तो विशेषणरूपः 'कन्यापति' शब्दः । तत्र पुँल्लिङ्गे-

( कन्या पतिः अधिपा यस्य स कन्यापतिः-इति विग्रहे )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | कन्यापतिः | कन्यापती | कन्यापतयः |
| द्वि० | कन्यापतिम् | ,, | कन्यापतीन् |
| तृ० | *कन्यापतिना | कन्यापतिभ्याम् | कन्यापतिभिः |
| च० | कन्यापत्यै, कन्यापतये; | ,, | कन्यापतिभ्यः |
| प० | कन्यापत्याः, कन्यापतेः; | ,, | ,, |
| ष० | ,, ,, | कन्यापत्योः | कन्यापतीनाम् |
| स० | कन्यापत्याम्, कन्यापतौ; | ,, | कन्यापतिषु |
| सं० | हे कन्यापते | हे कन्यापती | हे कन्यापतयः |

* अत्र केवलादिकार्यं न केवलशब्दाभावात् । एवं ङिद्वचनेष्वपि ॥

साधनिका-अत्र समासार्थस्य ×पुरुषत्वेऽपि पतिशब्दस्य स्त्रीत्वमस्त्येव, तेन ङेङसिङस्ङिपरे "स्त्रिया ङितां वा दैदासूदासूदाम्" [१, ४, २८] इति दिदादेशा वा बोध्याः, दिदादेशपक्षे 'मति' (१७७) वत्, तदभावपक्षे शेषे च 'मुनि' (१७५) वत्साध्यम् ॥

## स्त्रीलिङ्गे तु—

( कन्या पतिः अधिपा अस्याः-इति विग्रहे )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | कन्यापतिः | कन्यापती | कन्यापतयः |
| द्वि० | कन्यापतिम् | ,, | कन्यापतीः |
| तृ० | कन्यापत्या | कन्यापतिभ्याम् | कन्यापतिभिः |

एवं ( ङ्यभावपक्षे ) सर्वं 'मति' ( १७७ ) वज्ज्ञेयम् । बहुव्रीहित्वात् यदा तु "पत्युर्नः" [ २, ४, ४८ ] इत्यनेन ङीर्नान्तश्च तदा 'कन्यापत्नी' इति प्रकृतिः, क्त्यर्थभिन्नत्वेन च यदा "इतोऽक्त्यर्थात्" [२, ४, ३२] इति ङीस्तदा 'कन्यापती' इति प्रकृतिः, उभयोर्दीर्घेकारान्तयो रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवदवसेयानि ॥

---

× अन्ये तु ( चन्द्रेन्दुगोमिप्रभृतयो वैयाकरणाः ) पुरुषस्य समासार्थत्वे सति दैदाप्दासूदामादेशाच्छन्ति, अपि तु 'कन्यापतये' पुरुषाय इत्येवाहुः, अत एव तेषां मते सर्वं 'मुनि' (१७५) वद्बोध्यम् ॥

अन्यस्तु ( क्षीरस्वामी तु ) पुरुषस्यैव समासार्थत्वे सति दिदादेशान् इच्छति, न स्त्रियाः । अर्थात् पुरुषविशेषणे 'कन्यापत्यै' पुरुषायेत्येव स्यादित्याह । तन्मते 'कन्यापतये स्त्रियै' इत्येव स्यात्, न पुनर्विकल्पः । तथा च ङेङसिङस्ङिपरे पुंसि नित्यदिदादेशाः, शेषं मुनि ( १७५ ) वत्; स्त्रियां सर्वं मुनिवदपि तु शसि स्त्रीलिङ्गात् शसः सस्य नत्वं न स्यादिति विशेषः । क्लीबे तु-'शुचि' वद्बोध्यमपि तु एतन्मते ङिद्वचनेषु पुंवद्भावपक्षे 'कन्यापत्यै' इत्यादीनि पुंलिङ्गवद्रूपाणि ज्ञेयानि ॥

## नपुंसकलिङ्गे तु—

( कन्या पतिः अधिपा यस्य कुलादेस्तत् कन्यापति )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | कन्यापति | कन्यापतिनी | कन्यापतीनि |
| द्वि० | ” | ” | ” |
| तृ० | कन्यापतिना | कन्यापतिभ्याम् | कन्यापतिभिः |
| च० | कन्यापत्यै<br>कन्यापतये<br>कन्यापतिने | ” | कन्यापतिभ्यः |
| प० | कन्यापत्याः<br>कन्यापतेः<br>कन्यापतिनः | ” | ” |
| ष० | ” | कन्यापत्योः<br>कन्यापतिनोः | कन्यापतीनाम् |
| स० | कन्यापत्याम्<br>कन्यापतौ<br>कन्यापतिनि | ” | कन्यापतिषु |
| सं० | हेकन्यापते<br>हेकन्यापति | हे कन्यापतिनी; | हे कन्यापतीनि |

साधनिका—“ वान्यतः पुमाँष्टादौ स्वरे ” [ १, ४, ६२ ] इति स्वरादौ टादौ पुंवद्भावो वा भवति । पुंवद्भावपक्षे ‘कन्यापतयै, कन्यातये’ इति पुंवद्रूपद्वयं साध्यं तदभावपक्षे च “अनामस्वरेनोऽन्तः ” [१, ४, ६४] इति नागमे ‘कन्यापतिने’ इति रूपं भवतीति । इत्थं ङेङसिङसङिपरे रूपत्रयं बोध्यम् । शेषं सर्वं णत्वेन विना ‘वारि’ वत्साध्यम् । किन्तु ओसि पुंवद्भावपक्षे पुंवत्साध्यमिति विशेषः ॥

कन्यायाः पतिः भर्ता अधिपो वा पुरुषः-इति विग्रहे कन्यापति-शब्दस्य रूपाणि तत्साधनिका च पुँल्लिङ्ग 'मुनि' (१७५) शब्दवदवसेया ॥

कन्यायाः पतिः अधिपा स्त्री 'कन्यापतिः, कन्यापत्नी, कन्यापती' इति । 'कन्यापतिः' इत्यस्य रूपाणि 'मति' (१७७) वत्; यदा तु "सादेः" [ २, ४, ४९ ] इति ङीर्नकारान्तादेशश्च तदा 'कन्यापत्नी' यदा च "इतोऽक्त्यर्थात् [ २, ४, ३२ ] इति ङीस्तदा 'कन्यापती' इत्युभयो रूपाणि वक्ष्यमाण 'नदी' (२२५) शब्दवद् बोध्यानि ॥

कन्यायाः पतिः अधिपं कुलं 'कन्यापति' इत्यस्य रूपाणि वारिवत्, टादौ स्वरादौ विकल्पेन मुनिवच्च, यथा—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | कन्यापति | कन्यापतिनी | कन्यापतीनि |
| द्वि० | " | " | " |
| तृ० | कन्यापतिना | कन्यापतिभ्याम् | कन्यापतिभिः |
| च० | कन्यापतये / कन्यापतिने | " | कन्यापतिभ्यः |
| प० | कन्यापतेः / कन्यापतिनः | " | " |
| ष० | " | कन्यापत्योः / कन्यापतिनोः | कन्यापतीनाम् |
| स० | कन्यापतौ / कन्यापतिनि | " | कन्यापतिषु |
| सं० | हे कन्यापते / हे कन्यापति | हे कन्यापतिनी | हे कन्यापतीनि |

साधनिकाऽपि-'वारि' ( १७८ ) वत्, किन्तु स्वरादौ टादौ पुंवद्भाव-पक्षे मुनि (१७५) वज्ज्ञेया ॥

कन्या चासौ पतिः अधिपा च-इति विग्रहे कन्यापतिशब्दस्य स्त्रीलिङ्गे एव रूपाणि, तत्र ( उपर्युक्तवत् ) तिस्रः प्रकृतयः, यथा-'कन्यापति, कन्यापत्नी, कन्यापती' इति, आद्यायाः रूपसाधनिका 'मति' ( १७७ ) वदपरयोर्वक्ष्यमाण 'नदी' ( २२५ ) वदवसेया ॥

## (१८६) इकारान्तो नित्यबहुवचनान्तः ×'कति' शब्दः।

प्र० द्वि० कति । तृ० कतिभिः ।

च० प० कतिभ्यः । ष० कतीनाम् । स० कतिषु ।

" नन्ता सङ्ख्याडतिर्युष्मदस्मच्च स्युरलिङ्गकाः " इति लिङ्गानुशासनवचनाद् अलिङ्गकोऽयं शब्दः, लिङ्गत्रयेषु सम इत्यर्थः ॥

साधनिका—जस्शस्परे " डत्यतु सङ्ख्यावत् " [ १, १, ३९ ] इति डत्यन्तस्य कतिशब्दस्य सङ्ख्यावत्त्वे सति " डतिष्णः सङ्ख्याया लुप् " [ १, ४, ५४ ] इति जस्शसोर्लुपि 'कति' २ इति ॥ नन्वत्र लुप्तजसः स्थानिवद्भावेन " जस्येदोत् " [१, ४, २२ ] इति एत्वं कथं नेति चेत् ? न, " लुप्यय्वृल्लेनत् " [ ७, ४, ११२ ] इति लुप्तजसः स्थानिवद्भावप्रतिषेधात्, अर्थात् लुब्भूतजस्निमित्तकं पूर्वस्य इकारस्य एत्वरूपं कार्यं न स्यादित्यर्थः ॥

अग्रे 'मुनि' (१७५) वत्साध्यम् ॥

एवं परमाश्च ते कति 'परमकति' प्रभृतयः ॥

---

× किम्शब्दात् डतिप्रत्यये सति " डित्यन्त्यस्वरादेः " [२, १, ११४] इत्यन्त्यस्वरादेरिमो लुकि कतिशब्दनिष्पत्तिः ॥

## (१८७) इकारान्तो विशेषणवाचकः 'प्रियकति' शब्दः ।

### तत्र पुँल्लिङ्गे—

( प्रियाः कति यस्य स प्रियकतिः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | प्रियकतिः | प्रियकती | प्रियकतयः |
| द्वि० | प्रियकतिम् | ,, | प्रियकतीन् |

इत्थमग्रे सर्वं 'मुनि' (१७५) वद्बोध्यम् ।

साधनिका—अत्र " डतिष्णः० " [ १, ४, ५४ ] इति सूत्रं न प्रवर्तते तत्सम्बन्धिविज्ञानात् ॥

प्रियाः कति यस्याः सा 'प्रियकतिः' मति ( १७७ ) वत्

प्रियाः कति यस्य कुलस्य तत् 'प्रियकति' 'शुचि' (१७९) वत् ॥

'प्रियाश्च ते कति' इति विग्रहे तु प्रियकति' शब्दस्त्रिषु लिङ्गेषु समो नित्यबहुवचनान्तश्च, तद्रूपसाधनिकादिसर्वं 'कति' (१८६) वत्कार्यम् ॥

## (१८८) इकारान्तो विशेषणवाचकः 'अतिस्त्रि' शब्दः ।

### तत्र पुँल्लिङ्गे—

( स्त्रियामतिक्रान्तोऽतिस्त्रिः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अतिस्त्रिः | अतिस्त्रियौ | अतिस्त्रयः |
| द्वि० | अतिस्त्रियम्, अतिस्त्रिम्; | ,, | अतिस्त्रियः, अतिस्त्रीन् |
| तृ० | अतिस्त्रिणा | अतिस्त्रिभ्याम् | अतिस्त्रिभिः |
| च० | अतिस्त्रये | ,, | अतिस्त्रिभ्यः |

| | | | |
|---|---|---|---|
| प० | अतिस्त्रेः | अतिस्त्रिभ्याम् | अतिस्त्रिभ्यः |
| ष० | ,, | अतिस्त्रियोः | अतिस्त्रीणाम् |
| स० | अतिस्त्रौ | ,, | अतिस्त्रिषु |
| सं० | हे अतिस्त्रे | हे अतिस्त्रियौ | हे अतिस्त्रयः |

साधनिका—अतिस्त्रि+औ=एकदेशविकृतमनन्यवदिति न्यायात् "स्त्रियाः" [२, १, ५४] इति इयादेशे 'अतिस्त्रियौ' २ ॥ अतिस्त्रि+अम्=अत्र "वाम्-शसि' [२, १, ५५] इति विकल्पेन इयादेशो भवति, इयादेशपक्षे 'अति-स्त्रियम्' तदभावपक्षे तु "समानादमोऽतः" [१, ४, ४६] इत्यमोऽका-रस्य लुकि 'अतिस्त्रिम्' ॥ अतिस्त्रि+शस् (अस्)="वाम्शसि" [२, १, ५५] इति वैकल्पिके इयादेशे, सस्य रुत्वे विसर्गे च 'अतिस्त्रियः' इयादेशाभावे "शसोऽता०" [१, ४, ४९] इति इकाराऽकारयोः स्थाने दीर्घत्वे सस्य नत्वे च 'अतिस्त्रीन्' ॥ अतिस्त्रि+ओस्="स्त्रियाः" [२, १, ५४] इति इकारस्य इयादेशे, सस्य रुत्वे विसर्गे च 'अतिस्त्रियोः'२॥ सम्बोधनद्विवचन-साधनिका प्रथमाद्विवचनवत्, शेषा साधनिका च 'मुनि' (१७५) वज्ज्ञेया॥

ननु 'अतिस्त्रि+औ' (अतिस्त्रियौ) इत्यत्र "इदुतोऽस्त्रेरीदूत्" [१, ४, २१] इति सूत्रेण मुनिशब्दवद्दीर्घः कथं न कृत इति चेदुच्यते-"इदुतोऽ-स्त्रेरीदूत्" इत्यत्र स्त्रिशब्दवर्जनान्न दीर्घः । इदमेव स्त्रिशब्दवर्जनं ज्ञापकम्-यत् 'परेणाऽपि इयादेशेन इत् कार्यं न बाध्यते,' तेन "जस्येदोत्" [१, ४, २२], "टः पुंसि ना" [१, ४, २४] "ङित्यदिति" [१, ४, २३], "ङिडौं" [१, ४, २५] इत्येतेषु विधिषु अतिस्त्रिशब्दो मुनिश-

---

⊛ स्त्रियमतिक्रान्त इति विग्रहे-"प्रात्यवपरिनिरादयो०" [३, ४, ४७] इति तत्पुरुषसमासे "ऐकार्थ्ये" [३, २, ८] इति विभक्तिलोपे "प्रथ-मोक्तं प्राक्" [३, १, १४८] इति अतिशब्दस्य प्रागनिपाते "गोश्चान्ते ह्रस्वो०" [२, ४, ] इति ह्रस्वे 'अतिस्त्रि' शब्दो भवति ॥

ब्दवद्विज्ञायते; यदुक्तं कौमुद्याम्-" × ओस्यौकारे च नित्यं स्याद्-अम्शसोस्तु विभाषया । इयादेशोऽचि नान्यत्र, स्त्रियाः पुंस्युपसर्जने ॥ १ ॥ " इति ॥

न च 'अतिस्त्रये' इत्यादौ 'कन्यापत्यै कन्यापतये नराय' इत्यादि वत् " स्त्रिया ङितां वा दैदास्दास्दाम् " [ १, ४, २८ ] इति वैकल्पिकाः दाया-द्यादेशाः कथं न कृता इति वाच्यम्; समासे वाक्यावस्थायां वा यस्य शब्दस्य ह्रस्वेकारान्तत्वे सति प्राधान्येन स्त्रीवाचकत्वं तस्माच्छब्दात् परेषामेव ङिद्वच-नानां दायाद्यादेशविकल्पदर्शनादिति ॥

## स्त्रीलिङ्गे तु—

[ स्त्रियमतिक्रान्ता अतिस्त्रिः ]

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अतिस्त्रिः | अतिस्त्रियौ | अतिस्त्रयः |
| द्वि० | अतिस्त्रियम्<br>अतिस्त्रिम् | ,, | अतिस्त्रियः<br>अतिस्त्रीः |
| तृ० | अतिस्त्रिया | अतिस्त्रिभ्याम् | अतिस्त्रिभिः |
| च० | अतिस्त्रियै<br>अतिस्त्रये | ,, | अतिस्त्रिभ्यः |
| प० | अतिस्त्रियाः<br>अतिस्त्रेः | ,, | ,, |
| ष० | ,, | अतिस्त्रियोः | अतिस्त्रीणाम् |
| स० | अतिस्त्रियाम्<br>अतिस्त्रौ | ,, | अतिस्त्रिषु |
| सं० | हे अतिस्त्रे | हे अतिस्त्रियौ | हे अतिस्त्रयः |

× ओस्यौकारे चेति--ओसि=षष्ठीसप्तमीद्विवचनयोः, औकारे च=प्रथमा-द्वितीयाद्विवचनयोः, एषु चतुर्षु नित्यम्; अम्शसोस्तु -विभाषयेति विकल्पेन, अन्यत्र अचि=स्वरादौ जस्टाङेङसिङस्ङिषु इयादेशो न भवतीति भावः । स्त्रियाः इति=स्त्रीशब्दस्य, पुंस्युपसर्जने इति=गौणस्येत्यर्थः ॥ इति श्लोकार्थः ॥

**साधनिका**—द्वितीयापर्यन्तरूपसाधनिका पुंवद्बोध्या, किन्तु **'अतिस्त्रीः'** इत्यत्र स्त्रीलिङ्गत्वेन शसः सस्य नत्वं न स्यादपि तु तस्य रुत्वे विसर्ग एवेति विशेषः ॥ अतिस्त्रि+टा(आ)="स्त्रियाः" [ २, १, ५४ ] इति इकारस्य इया-देशे **'अतिस्त्रिया'** ॥ अतिस्त्रि+ङे(ए)=" स्त्रिया ङितां वा दैदास्दास्दाम् " [ १, ४, २८ ] इति ङेस्थाने 'दै(ऐ)' इति वैकल्पिकादेशे " स्त्रियाः " [ २, १, ५४ ] इति इस्थाने इयादेशे च **'अतिस्त्रियै'** इति, पक्षे **'अतिस्त्रये'** इति ॥

एवम् 'अतिस्त्रियाः २, अतिस्त्रियाम्' इत्यत्राप्यनुक्रमेण दास्दास्दाम्--इया-देशश्च विधेयः । अत्रास्य 'अतिस्त्रि' इति समासस्य इकारान्तत्वे सति प्राधा-न्येन स्त्रीवाचकत्वाद् दिदादेशा वा बोध्याः ॥

ननु **'अतिस्त्रये, अतिस्त्रेः २, अतिस्त्रौ'** इत्यत्र "स्त्रियाः" [ २, १, ५४] इति इयादेशः कथं न कृत इति चेदुच्यते--'परेणाऽपि इयादेशेन इत्कार्यं न बाध्यते' इति न्यायेन तन्निरासात् ॥ शेषं 'मति' (१७७) वत्साध्यम् ॥

यदा तु " इतोऽक्त्यर्थात् " [ २, ४, ३२ ] इति ङीस्तदा अतिस्त्रि+ ङी=**'अतिस्त्री'** इति प्रकृतिः, तद्रूपाणि सर्वाणि वक्ष्यमाण 'स्त्री' ( २२६ ) शब्दवद्बोध्यानि ॥

नन्वत्र ङीप्रत्ययेन व्यवधानात् स्याद्यव्यवहितपूर्वत्वविशिष्टस्य स्त्रीशब्दसम्ब-न्धिन इवर्णस्याभावात् कथम् स्त्रीशब्दवत् इयादेशादिरिति चेद् ? उच्यते- 'द्वयोः स्थाने निष्पन्न आदेशोऽन्यतरव्यपदेशभाक्' इति न्यायेन स्त्रिशब्दसम्ब-न्धिन इकारस्य स्थाने, ङीप्रत्ययस्य च ईकारस्य स्थाने यः 'ई' इत्येकादेशः, स स्त्रीशब्दसम्बन्धीवर्णत्वेनापि व्यवह्रियते, इति नोक्तदोषावकाशः ॥

'अतिशयिता स्त्री' इति विग्रहे तु **'अतिस्त्री'** इति दीर्घेकारान्ता प्रकृतिः, तद्रूपाण्यपि वक्ष्यमाण 'स्त्री' ( २२६ ) शब्दवद्बोध्यानि ॥

## नपुंसकलिङ्गे तु—

( स्त्रियमतिक्रान्तं यत् कुलं तत् 'अतिस्त्रि' ॥ )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अतिस्त्रि | अतिस्त्रिणी | अतिस्त्रीणि |
| द्वि० | " | " | " |
| तृ० | अतिस्त्रिणा | अतिस्त्रिभ्याम् | अतिस्त्रिभिः |
| च० | अतिस्त्रये<br>अतिस्त्रिणे | " | अतिस्त्रिभ्यः |
| पं० | अतिस्त्रेः<br>अतिस्त्रिणः | " | " |
| ष० | " | अतिस्त्रियोः<br>अतिस्त्रिणोः | अतिस्त्रीणाम् |
| स० | अतिस्त्रौ<br>अतिस्त्रिणि | " | अतिस्त्रिषु |
| सं० | हे अतिस्त्रे<br>हे अतिस्त्रि | हे अतिस्त्रिणी | हे अतिस्त्रीणि |

साधनिका—'वारि' (१७८) वदपि तु स्वरादौ टादौ "वाऽन्यतः०" [ १, ४, ६२ ] इति पुंवद्भावपक्षे पुंवज्ज्ञेया ॥

ननु पुंवद्भावाभावपक्षे स्वरादिषु प्रत्ययेषु "स्त्रियाः" [२, १, ५४] इति इयादेशेन भाव्यमितिचेन्न; 'अतिस्त्रीणि' इत्यत्र "स्वराच्छौ" [२, ४, ५४] इति नागमेन व्यवधानात्, 'अतिस्त्रीणाम्' इत्यत्र "ह्रस्वापश्च" [१, ४, ३२] इति आमो नामादेशविधानेन स्वरादित्वाभावात्, शेषेषु च स्वरादिप्रत्ययेषु "अनाम्स्वरे नोऽन्तः" [ १, ४, ६४ ] इति नागमेन व्यवधानाच्च ॥

## (१८९) इकारान्तो विशेषणरूपो 'निष्कौशाम्बि' शब्दः। तत्र पुंल्लिङ्गे

( कौशाम्ब्याः निर्गतः=निष्कौशाम्बिः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | निष्कौशाम्बिः | निष्कौशाम्बी | निष्कौशाम्बयः |
| द्वि० | निष्कौशाम्बिम् | ,, | निष्कौशाम्बीन् |
| तृ० | निष्कौशाम्बिना | निष्कौशाम्बिभ्याम् | निष्कौशाम्बिभिः |

एवमग्रे सर्वं 'मुनि' (१७५) वद्बोध्यम् ॥ साधनिकापि मुनिवदेव ॥

अथ 'निष्कौशाम्बि+सि' इत्यत्र "दीर्घङ्याब्व्यञ्जनात्सेः" [१, ४, ४५] इति सेर्लुगवाप्तिः। न च कथमिति वाच्यम्? 'भूतपूर्वकस्तद्वदुपचार' इति न्यायात्। यद्यप्युपर्युक्तयुक्त्युक्त्या सेर्लुक्प्राप्तिस्तथाऽपि तस्मिन्नेव सूत्रे दीर्घग्रहणसामर्थ्यात्तन्न भवतीति ॥

ननु ङेङसिङस्ङिविभक्तिषु " स्त्रिया ङितां वा० " [ १, ४, २८ ] इतिवैकल्पिकान् दायाद्यादेशानकृत्वा कथं मुनिवदुक्तमिति चेन्न, इकारान्तत्वे सति प्राधान्येन स्त्रीवाचकत्वस्थले एव तेषां दर्शनात्। अत्र कौशाम्बीशब्दस्य वाक्यावस्थायां प्राधान्येन स्त्रीवाचकत्वमस्ति, किन्तु ह्रस्वेकारान्तत्वं नास्ति, समासे ह्रस्वेकारान्तत्वमस्ति, अपि प्राधान्येन स्त्रीवाचकत्वं नास्ति; 'निष्कौशाम्बिः' इति समासस्य यद्यपि ह्रस्वेकारान्तत्वमस्ति, अपि तु प्राधान्येन स्त्रीवाचकत्वं नास्तीति न विकल्पेन दिदादेशाः, एवमन्यत्राप्यूह्यम् ॥

## स्त्रीलिङ्गे तु—

कौशाम्ब्याः निर्गता 'निष्कौशाम्बिः' इति, तद्रूपाणि साधनिका च 'मति' (१७७) वदवसेया ॥ अत्र स्त्रीविशेषणीभूतस्य 'निष्कौशाम्बिः' इति समासस्य इकारान्तत्वे सति प्रधान्येन स्त्रीवाचकत्वाद्भवन्ति विकल्पेन दिदादेशाः, एवमन्यत्राप्यवसेयम् ॥ यदा " इतोऽक्त्यर्थात् " [ २, ४, ३२ ] इति ङीस्तदा 'निष्कौशाम्बी' इति दीर्घेकारान्ता प्रकृतिस्तद्रूपाणि साधनिका

च वक्ष्यमाण 'नदी' (२२५) वद्बोध्या ॥ अत्र दीर्घेकारान्तस्त्रीत्वात् "स्त्रीदूतः" [ १, ४, २९ ] इति नित्या दायाद्यादेशाः, न तु वैकल्पिकाः ॥

## नपुंसकलिङ्गे तु--

कौशाम्ब्याः निर्गतं यत् (कुलादिकं) तत् 'निष्कौशाम्बि' इति, तद्रूपाणि साधनिका च 'शुचि' (१७९) वदवसेया ॥

## (१९०) इकारान्तो विशषणरूपः 'प्रियबुद्धि' शब्दः ॥ पुँल्लिङ्गे—

[ प्रिया बुद्धिर्यस्य स प्रियबुद्धिः ]

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | प्रियबुद्धिः | प्रियबुद्धी | प्रियबुद्धयः |
| द्वि० | प्रियबुद्धिम् | ,, | प्रियबुद्धीन् |
| तृ० | प्रियबुद्धिना | प्रियबुद्धिभ्याम् | प्रियबुद्धिभिः |
| च० | प्रियबुध्द्यै, प्रियबुद्धये; | ,, | प्रियबुद्धिभ्यः |
| पं० | प्रियबुध्द्याः, प्रियबुद्धेः | ,, | ,, |
| ष० | ,, ,, | प्रियबुध्द्योः | प्रियबुद्धीनाम् |
| स० | प्रियबुध्द्याम्, प्रियबुद्धौ ; | ,, | प्रियबुद्धिषु |
| सं० | हे प्रियबुद्धे | हे प्रियबुद्धी | हे प्रियबुद्धयः |

साधनिका—'मुनि' ( १७५ ) वदपि तु ( समासे गौणत्वेऽपि बुद्धि· शब्दस्य समासपूर्वावस्थायामिकारान्तत्वे सति प्रधान्येन स्त्रीत्वमस्ति-तेन ) ङिद्वचनेषु " स्त्रिया ङितां वा० " [ १, ४, २८ ] इति वैकल्पिका दायाद्या· देशाः विधेयाः ॥

## स्त्रियां तु—

प्रिया बुद्धिर्यस्याः सा 'प्रियबुद्धिः' इत्यस्य रूपाणि साधनिका च 'मति' ( १७७ ) वज्ज्ञेया ॥ प्रिया चासौ बुद्धि चेति विग्रहेऽपि 'मति' वत् ॥

ननु प्रियबुद्धिशब्दात् स्त्रियां 'इतोऽक्त्यर्थात्' [ २, ४, ३२ ] इति ङीःस्यादिति चेन्न, बुद्धिशब्दस्य क्तिप्रत्ययान्तत्वात् ॥

## नपुंसकलिङ्गे तु—

### [ प्रिया बुद्धिर्यस्य कुलादेस्तत् 'प्रियबुद्धि' ]

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र०द्वि० | प्रियबुद्धि | प्रियबुद्धिनी | प्रियबुद्धीनि |
| तृ० | प्रियबुद्धिना | प्रियबुद्धिभ्याम् | प्रियबुद्धिभिः |
| च० | प्रियबुद्ध्यै<br>प्रियबुद्धये<br>प्रियबुद्धिने | ,, | प्रियबुद्धिभ्यः |
| प० | प्रियबुद्ध्याः<br>प्रियबुद्धेः<br>प्रियबुद्धिनः | ,, | ,, |
| ष० | ,, | प्रियबुद्ध्योः<br>प्रियबुद्धिनोः | प्रियबुद्धीनाम् |
| स० | प्रियबुद्ध्याम्<br>प्रियबुद्धौ<br>प्रियबुद्धिनि | ,, | प्रियबुद्धिषु |
| सं० | हेप्रियबुद्धे<br>हेप्रियबुद्धि | हे प्रियबुद्धिनी | हे प्रियबुद्धीनि |

साधनिका—'वारि' (१७८) वदपि तु " वाम्यतः० " [१, ४, ६२] इति स्वरादौ टादौ पुंवद्भावो वा भवति, पुंवद्भावपक्षे पुंवत्तदभावपक्षे च वारिवत्साध्यम् । तथा च गौणत्वेऽपि ङिद्वचनेषु पुंवद्भावे रूपद्वयं, एकं तद-भावसत्कम्, एवं रूपत्रयम् बोध्यम् ॥

(१९१) इकारान्तो विशेषणरूपः 'अतिकुमारि' शब्दः। तत्र पुँल्लिङ्गे—

( कुमारीमतिक्रान्तः 'अतिकुमारिः' )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अतिकुमारिः | अतिकुमारी | अतिकुमारयः |
| द्वि० | अतिकुमारिम् | ,, | अतिकुमारीन् |
| तृ० | अतिकुमारिणा | अतिकुमारिभ्याम् | अतिकुमारिभिः |

एवमग्रे 'ऋषि' (१७६) वद्रूपाणि वाच्यानि ।

स्त्रियां तु—

( कुमारीमतिक्रान्ता 'अतिकुमारिः' )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अतिकुमारिः | अतिकुमारी | अतिकुमारयः |
| द्वि० | अतिकुमारिम् | ,, | अतिकुमारीः |
| तृ० | अतिकुमार्या | अतिकुमारिभ्याम् | अतिकुमारिभिः |
| च० | ×अतिकुमार्यै<br>अतिकुमारये | ,, | अतिकुमारिभ्यः |
| प० | अतिकुमार्याः<br>अतिकुमारेः | ,, | ,, |
| ष० | ,, | अतिकुमार्योः | अतिकुमारीणाम् |
| स० | अतिकुमार्याम्<br>अतिकुमारौ | ,, | अतिकुमारिषु |
| सं० | हे अतिकुमारे | हे अतिकुमारी | हे अतिकुमारयः |

नपुंसकलिङ्गे तु—'शुचि' (१७९) वद्बोध्यम् ॥

× 'अतिकुमारये' इत्यादौ "स्त्रीदूतः" इति वर्णविधित्वेन स्थानिवद्भावाभावान्न दिदादेशाः । एवमन्यत्राप्यूह्यम् ॥

## (१९२) इकारान्तो विशेषणरूपः 'अतिनदि' शब्दः । तत्र पुँल्लिङ्गे–

( नदीमतिक्रान्तोऽतिनदिः पुरुषः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अतिनदिः | अतिनदी | अतिनदयः |
| द्वि० | अतिनदिम् | ,, | अतिनदीन् |
| तृ० | अतिनदिना | अतिनदिभ्याम् | अतिनदिभिः |

एवमग्रे सर्वं 'मुनि' (१७५) वद्बोध्यम् ॥ ननु 'अतिनदये' इत्यादिषु (ङित्सु) "स्त्रिया ङितां वा०" [ १, ४, २८ ] इति वैकल्पिका दायाद्यादेशाः कथं न कृता इति चेन्न, ह्रस्वेकारान्तत्वे सति प्राधान्येन स्त्रीत्वाभावात् ॥

स्त्रीलिङ्गे—नदीमतिक्रान्ता 'अतिनदिः' इति, तद्रूपाणि साधनिका च 'मति' (१७७) वत् ॥

न च स्त्रियां 'अतिनदये, अतिनद्यै' इत्यादौ ईकारस्य स्थानिवद्भावात् "स्त्रीदूतः" [ १, ४, २९ ] इति नित्या दिदादेशा वाच्याः; ईदूत इति वर्णविधित्वेन स्थानिवद्भावाभावात् ॥

क्त्यर्थभिन्नत्वेन यदा "इतोऽक्त्यर्थात्" [ २, ४, ३२ ] इति ङीस्तदा 'अतिनदी' इति दीर्घेकारान्तः शब्दो 'नदी' (२२५) वज्ज्ञेयः ॥

नपुंसकलिङ्गे तु—नदीमतिक्रान्तं यत्कुलं तद् 'अतिनदि', 'शुचि' (१७९) वद्बोध्यः ॥

अतिशयिता नदी='अतिनदी' इति दीर्घेकारान्तस्य स्त्रीलिङ्गे एव 'नदी' (२२५) वद्रूपाणि वाच्यानि ॥

अतिशयिता नदी यत्र स 'अतिनदीको देशः' अत्र "ऋन्नित्यदितः" [ ७, ३, १७१ ] इति समासान्तः कच् भवति ॥ न च "पूजास्वतेः प्राक्टात्" [ ७, ३, ७२ ] इत्यनेन कचो निषेध इति वाच्यम् , टप्रत्ययात् प्रागेवास्य प्रचारात् । कच्विधायकन्तु टविधेः परं सूत्रम् ॥ न च समासान्त-

विधेरनित्यत्वात् कच्प्रत्ययो भवेन्नवेति वक्तव्यम्? अनित्यत्वस्थले विनिगमनाविरहेण शिष्टप्रयोगान् लक्ष्यीकृत्यैव प्रवृत्त्यभावबोधनात् । अत्र तादृशः शिष्टप्रयोगो यदि उपलभ्येत तर्हि कचभावे नास्माकमाग्रहः, इतरथा कचावश्यं भाव्यम् । एवमन्यत्राऽपीति संक्षेपः ॥

## (१९३) इकान्तः स्त्रीलिङ्गः 'युवति' शब्दः ॥

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | युवतिः | युवती | युवतयः |
| द्वि० | युवतिम् | ,, | युवतीः |
| तृ० | युवत्या | युवतिभ्याम् | युवतिभिः |

एवमग्रे 'मति' (१७७) वद्रूपाणि साधनिका च ज्ञेया ॥

'युवन्' शब्दात् स्त्रियां नकारान्तलक्षणङीप्रत्यये प्राप्ते, तदपवादभूतः " यूनस्तिः " [ २, ४, ७७ ] इति तिप्रत्ययो भवति; तेन 'युवन्+ति' इति स्थिते " नामसिदय्व्यञ्जने " [१, १, २१] इति पदत्वे "नाम्नो नोऽनह्नः" [ २, १, ९१ ] इति नकारस्य लुकि च 'युवति'रिति शब्दनिष्पत्तिः ॥

ननु अस्माद् 'युवति' शब्दात् " इतोऽक्त्यर्थात् " [२, ४, ३२] इति कथं ङीप्रत्ययो न भवतीति चेदुच्यते–अत्र नान्तलक्षणङीबाधेऽपि ङीत्वजात्याश्रयणेन क्त्यन्तलक्षणङीप्रत्ययस्यापि बाधात् **'सकृद् गते स्पर्द्धे यद्बाधितं तद् बाधितमेव'** इति न्यायात्, पश्चादपि युवतिशब्दात् "इतोऽक्त्यर्थाद्" इति ङीर्न भवतीति ॥

ननु एवं तर्हि 'युवती' इति शिष्टप्रयोगे कथमुपलभ्यते इति चेदुच्यते-यौतेरौणादिककिदतिप्रत्ययान्तात् "इतोऽक्त्यर्थात्" इति ङीभवनात् ॥ यौतेः शत्रन्तादपि " अधातूदृदितः " [२, ४, २,] इति ङीप्रत्ययेऽपि ॥ 'युवती' इत्यस्य रूपाणि साधनिका च 'नदी' (२२५) वत् ॥

कश्चित्तु ङीप्रत्ययमपीच्छति, तन्मते 'युवन्+ङी' इति स्थिते " श्वन्युवन्मघोनो ङीस्याद्यघुट्स्वरे व उः " [ २, १, १०६ ] इति स्वरसहितवस्य उत्वे, द्वयोरुकारयोर्दीर्घत्वे च 'यूनी' इति प्रकृतिः, एतद्रूपाणि साधनिका च 'नदी' ( २२५ ) वत् । वस्तुतस्तु शिष्टाऽसम्मतत्वादिदं त्याज्यम् ॥

युवानमतिक्रान्ता इति 'अतियूनी', अत्र " यूनस्तिः " [ २, ४, ७७ ] इति मुख्यग्रहणेन तिप्रत्ययाभावे नान्तलक्षणो ङीर्भवति । 'अतियूनी' इत्यस्य रूपाणि साधनिका च 'नदी' (२२५) वत् ॥

## (१९४) इकारान्तो नपुँसकलिङ्गः 'दधि'× शब्दः ॥

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | दधि | दधिनी | दधीनि |
| द्वि० | " | " | " |
| तृ० | दध्ना | दधिभ्याम् | दधिभिः |
| च० | दध्ने | " | दधिभ्यः |
| प० | दध्नः | " | " |
| ष० | दध्नः | दध्नोः | दध्नाम् |
| स० | दध्नि, दधनि; | " | दधिषु |
| सं० | हे दधे, हे दधि; | हे दधिनी | हे दधीनि |

**एवम्—अस्थिसक्थिशब्दौ ॥**

**साधनिका**—'दधि+टा(आ)'="दध्यस्थिसक्थ्यक्ष्णोऽन्तस्यान्" [१,४,६३] इति इस्थाने 'अन्' इत्यादेशे ('दध्+अन्+आ' इति जाते) " अनोऽस्य "

× दधिशब्दस्य द्वेधा निष्पत्तिः, यथा-'दधि=धारणे' इत्यतः "पदिपठि०" [६०७] इति ( उणादिसूत्रे आदिग्रहणाद् ) 'इ' प्रत्यये दधि=क्षीरविकारः । 'डुधांग्क्=धारणे' इत्यतः " सस्निचक्रिदधिजज्ञिनेमि " [ ५, २, ३९ ] इति सूत्रेण शीलादौ सत्यर्थे कृतद्विर्वचनो किप्रत्ययान्तो निपात्यते, दधातीति दधिः ॥

[ २. १. १०८ ] इति अकारलुकि ( " लोकात् " [ १, १, ३ ] इति संयोजने सति ) *'दध्ना' इति । एवं 'दध्ने, दध्नः २, दध्नोः' इति रूपाणि साध्यानि। सप्तम्येकवचने तु रूपद्वयं, यथा-"ईङौ वा" [२, १, १०९] इति अकारस्य लुग् वा भवतीति विशेषः, तेन लुक्पक्षे 'दध्नि' लुगभावे च 'दधनि' इति ॥ शेषं (णत्वं विना) 'वारि' (१७८) वत्साध्यम् ॥

दधातीति दधिरिति व्युत्पत्तिकस्य दधिशब्दस्य लिङ्गत्रयेषु रूपाणि भवन्ति, यथा-दधाति इत्येवं शीलो 'दधिः' पुरुषः, तद्रूपाणि 'मुनि' (१७५) वत्, दधाति इत्येवं शीला स्त्री 'दधिः' इत्यस्य रूपाणि 'मति' (१७७) वत्, यदा "इतोऽक्त्यर्थात् " [ २, ४, ३२ ] इति ङीस्तदा 'दधी' इति दीर्घईकारान्त-स्त्रीप्रकृतेर्वक्ष्यमाण 'नदी' (२२५) वद्रूपाणि बोध्यानि ॥

क्लीबे तु—दधाति इत्येवं शीलं यत् तद् (कुलं) 'दधि' इति, तद्रूपाणि 'शुचि' (१७९) वद्बोध्यानि ॥

नन्वत्र लिङ्गत्रयेषु, क्वापि " दध्यस्थि० " [ १, ४, ६३ ] इति सूत्रं कथं न प्रवर्तितमिति चेदुच्यते—तस्य नपुंसकलिङ्गे एव प्रवर्त्तनात् पुंसि स्त्रियां प्राप्तिरेव नास्ति; क्लीबेऽपि 'सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्' इति न्यायेन अस्थ्यादिशब्दानामौणादित्वाद् दधिशब्दस्याप्यौणादिकस्यैव तत्र ग्रहणात् । अस्य चौणादिकत्वाभावात् ॥

## (१९५) इकारान्तो विशेषणरूपः 'अतिदधि' शब्दः ॥ पुँल्लिङ्ग—

( दध्यतिक्रान्तो यः स अतिदधिः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अतिदधिः | अतिदधी | अतिदधयः |
| द्वि० | अतिदधिम् | ,, | अतिदधीन् |

---

* अत्र विशेषविधानात् परोऽपि नागमोऽनादेशेन बाध्यते ॥ एवं 'दध्ने' इत्यादावपि ॥

| | | | |
|---|---|---|---|
| तृ० | अतिदध्ना | अतिदधिभ्याम् | अतिदधिभिः |
| च० | अतिदध्ने | ,, | अतिदधिभ्यः |
| प० | अतिदध्नः | ,, | ,, |
| ष० | ,, | अतिदध्नोः | अतिदध्नाम् |
| स० | अतिदध्नि, अतिदधनि; | ,, | अतिदधिषु |
| सं० | हे अतिदधे | हे अतिदधी | हे अतिदधयः |

**साधनिका**—स्वरादौ टादौ 'दधि' (१९४) शब्दवदन्यत्र च 'मुनि' (१७५) वद्बोध्या ॥

अथात्र " दध्युरःसर्पिर्मधूपानच्छालेः " [ ७, ३, १७२ ] इति कच् न स्यात्, तत्पुरुषसमासात्; बहुव्रीहावेव तस्य विधानात् ॥ किञ्च " दध्यस्थि० " [ १, ४, ६३ ] इत्यत्रान्यसम्बन्धिनोऽपि विज्ञानात् तत्प्रयुक्तं कार्यं भवत्येव ॥ एवं **परमेण दध्ना=परमदध्ना** इत्यादिष्वपि ॥

## स्त्रीलिङ्गे तु—

( दधि अतिक्रान्ता या सा 'अतिदधिः' )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अतिदधिः | अतिदधी | अतिदधयः |
| द्वि० | अतिदधिम् | ,, | अतिदधीः |
| तृ० | अतिदध्न्या× | अतिदधिभ्याम् | अतिदधिभिः |
| च० | अतिदध्न्यै | ,, | अतिदधिभ्यः |
| प० | अतिदध्न्याः | ,, | ,, |
| ष० | ,, | अतिदध्न्योः | अतिदध्नीनाम् |
| स० | अतिदध्न्याम् | ,, | अतिदधिषु |
| सं० | हे अतिदधे | हे अतिदधी | हे अतिदधयः |

× अत्र सन्निपातपरिभाषायाः जागरूकत्वात् स्त्रियामपि 'अतिदध्ना' इत्येव रूपमिति केचित् । एवमग्रेऽपि ॥

**साधनिका**—'अतिदधि+टा(आ)=पूर्वं " दध्यस्थि० " [१, ४, ६३] इति इकारस्य अनादेशे ( 'अतिदध्+अन्+आ' इति जाते ) सन्निपातपरिभाषाया अनित्यत्वात् " स्त्रियां नृतोऽस्वस्रादेर्डीः " [ २, ४, १ ] इति 'ङी (ई)' प्रत्यये ('अतिदध्+अन्+ई+आ' इति स्थिते) "अनोऽस्य" [२, १, १०८] इत्यनोऽकारस्य लुकि, " इवर्णादे० " [ १, २, २१ ] इति ईकारस्य यकारादेशे ( 'अतिदध् + न्+य् + आ' इति जाते, " लोकात् " [ १, १, ३ ] इति संयोजने च सति ) **'अतिदध्न्या'** इति ॥ तथा चात्र स्वरादौ टादौ अनादेशे सति नान्तत्वात् ङीभवनेन **'अतिदध्नी'** इति प्रकृतिर्जायते, तेन स्वरादिटादिषु प्रत्ययेषु वक्ष्यमाण 'नदी' (२२५) शब्दवद्रूपसाधनिका ज्ञेया । शेषा च, मति' (१७७) वदवसेया ॥

यदा तु "इतोऽक्त्यर्थात्" [२, ४, ३२] इति ङीस्तदा 'अतिदधी' इति प्रकृतिः, तद्रूपाणि यथा—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अतिदधी | अतिदध्यौ | अतिदध्यः |
| द्वि० | अतिधीम् | " | अतिदधीः |
| तृ० | अतिदध्या | अतिदधिभ्याम् | अतिदधिभिः |

इत्थं सर्वाणि रूपाणि, तत्साधनिका च वक्ष्यमाण 'नदी' ( २२५ ) वद्बोध्या ॥ ननु 'अतिदध्या' इत्यादौ " दध्यस्थि० " [ १, ४, ६३ ] इत्यनेन 'अन्' प्रत्ययेन भाव्यमिति चेन्न, ङीप्रत्ययस्य व्यवधानेन तदप्रवृत्तेः ॥

## नपुंसकलिङ्गे तु—

(दधि अतिक्रान्तं यत्कुलं) तद् अतिदधि ॥

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र०द्वि० | अतिदधि | अतिदधिनी | अतिदधीनि |

| | | | |
|---|---|---|---|
| तृ० | अतिदध्ना× | अतिदधिभ्याम् | अतिदधिभिः |
| च० | अतिदध्ने | ,, | अतिदधिभ्यः |
| प० | अतिदध्नः | ,, | ,, |
| ष० | ,, | अतिदध्नोः | अतिदध्नाम् |
| स० | अतिदध्नि, अतिदधनि; | ,, | अतिदधिषु |
| सं० | हे अतिदधे, हे अतिदधि; हे अतिदधिनी, हे अतिदधीनि | | |

एवम्—प्रियं दधि यस्य कुलादेस्तद् 'प्रियदधि' इत्यपि ॥

साधनिका—सर्वा 'दधि' (१९४) वत्, स्वरादौ टादौ पुंवद्भावेऽपि विशेषाभावात् ॥

दधि अतिक्रान्तं येन सः 'अतिदधिः' इत्यस्य रूपाणि तत्साधनिका च स्वरादौ टादौ दधि (१९४) वदन्यत्र च 'मुनि' (१७५) वत् ॥

एवं प्रियं दधि यस्य स 'प्रियदधिः' शब्दो बोध्यः ॥ न चात्र बहुव्रीहित्वात् "दध्युरःसर्पिर्मधूपानच्छालेः" [ ७, ३, १७२ ] इत्यनेन समासान्तः कच् कथं न कृत इति वाच्यम्? समासान्तविधेरनित्यत्वात् ॥ यदुक्तं बृहद्वृत्तौ-'प्रियदध्ना' । समासान्तविधेरनित्यत्वात् कच् न भवति इति ॥

---

× अत्र श्रीमन्तो विनयविजयमहोपाध्यायप्रवराः-'प्रियदध्ना, प्रियदधिना' इति रूपद्वयं दर्शयन्ति, तेषामयमभिप्रायः-नपुंसकत्वपक्षे दधिवत् 'प्रियदध्ना', "वान्यतः०" [ १, ४, ६२ ] इति वैकल्पिके पुंवद्भावे "टः पुंसि ना" [ १, ४, २४ ] इति नादेशे 'प्रियदधिना' इति ॥ अपरे तु 'प्रियदध्ना' इत्येकमेव रूपमित्याहुः; तदभिप्रायोऽयम्-पुंवद्भावपक्षेऽपि अति-दधि-शब्दघटकदधिशब्दस्य नपुंसकत्वतादवस्थ्यात्, "दध्यस्थि०" [१,४,६३] इत्यत्र स्वाऽन्यसम्बन्धिविज्ञानाद् अनादेशे सति 'अतिदध्ना' इत्येव भवतीति॥ एवमनादेशप्रसङ्गे सर्वत्राप्यूह्यम् ॥

दधि अतिक्रान्तं यया सा 'अतदधिका' इति ॥ अत्र " दध्युरःसर्पिर्मधूपानच्छाले: " [ ७, ३, १७२ ] इत्यनेन 'कच्' भवति, बहुव्रीहित्वात् । यदुक्तं लघुन्यासकारैः-" यदा तु दध्यतिक्रान्तं ययेति बहुव्रीहिस्तदा 'दध्युरःसर्पिः०'-इत्यनेन कचा भाव्यम् ॥" कचि सति "आत्" [२, ४, १८] इत्यापि 'अतिदधिका' इति, तद्रूपाणि तत्साधनिका च 'दया' ( १६५ ) शब्दवदवसेया ॥

दध्यतिक्रान्तं येन कुलादिना इति 'अतिदधि' ॥ रूपाण्यस्य साधनिका च 'दधि' (१९४) वत्, पुंवद्भावेऽपि विशेषाभावात् । समासान्तविधेरनित्यत्वाश्रयणादत्र कच् न ॥

'अतिदध्ना' कुलेन-इत्यादौ विशेषविधानात् परमपि नागममनादेशो बाधते इति ॥

अतिशयितं दधि='अतिदधि' इत्यस्यापि दधि ( १९४ ) वद्रूपादिकं सर्वं बोध्यम् ॥

ननु एकस्मिन्नेव बहुव्रीहिसमासस्थे 'अतिदधि' शब्दे, पुंसि क्लीबे च समासान्तविधेरनित्यत्वमाश्रितं, स्त्रियां तु न; किं तत्र कारणमिति चेदुच्यते-" अतिदध्न्या स्त्रियेति । यदात्र " इतोऽक्त्यर्थात् " [ २, ४, ३२ ] इत्यनेन ङीस्तदा तद्व्यवधानादनेनादेशाभावे 'अतिदध्या' इत्येव भवति । यदातु दध्यतिक्रान्तं ययेति बहुव्रीहिस्तदा "दध्युरःसर्पि:०" [७, ३, १७२] इत्यनेन कचा भाव्यम् । तस्माद्दध्यतिक्रान्तयेति तत्पुरुष एव न्याय्यः । " इति लघुन्यासकारवचनेन स्त्रियामनित्यत्वं नाश्रितम् ॥ " "प्रियदध्ना । सामासान्तविधेरनित्यत्वात् कच् न भवति " इति कलिकालसर्वज्ञश्रीमद्धेमचन्द्रसूरिभगवद्वचनात्, पुंसि क्लीबे चाऽनित्यत्वमाश्रितमिति संक्षेपः ॥

## (१९६) इकारान्तो विशेषणरूपो 'दृढसक्थि' शब्दः । पुँल्लिङ्गे-

(दृढं सक्थि यस्य शकटस्य स 'दृढसक्थिः ×शकटः)

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | दृढसक्थिः | दृढसक्थी | दृढसक्थयः |
| द्वि० | दृढसक्थिम् | ,, | दृढसक्थीन् |
| तृ० | दृढसक्थ्ना | दृढसक्थिभ्याम् | दृढसक्थिभिः |
| च० | दृढसक्थ्ने | ,, | दृढसक्थिभ्यः |
| प० | दृढसक्थ्नः | ,, | ,, |
| ष० | ,, | दृढसक्थ्नोः | दृढसक्थ्नाम् |
| स० | दृढसक्थ्नि, दृढसक्थनि; | ,, | दृढसक्थिषु |
| सं० | हे दृढसक्थे | हे दृढसक्थी | हे दृढसक्थयः |

**साधनिका**—'अतिदधि' ( १९५ ) शब्दवदवसेया ॥

ननु "सक्थ्यक्ष्णः स्वाङ्गे" [ ७. ३. १२६ ] इति समासान्तः टप्रत्ययः कथं न कृत इति चेदुच्यते-" अविकारोऽद्रवंमूर्तं, प्राणिस्थं स्वाङ्गमुच्यते । च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु ॥१॥ " इति स्वाङ्गलक्षणम् । अत्र सक्थिशब्दवाच्ये शकटावयवविशेषे उक्तस्वाङ्गलक्षणस्याऽभावात् समासान्तटप्रत्ययो न कृत इति ॥

## स्त्रीलिङ्गे तु—

दृढं सक्थि यस्याः शकट्याः सा 'दृढसक्थिः' शकटी इत्यस्य रूपसाधनिकादिचर्चा, तत्पुरुषसमासीयस्त्रीलिङ्गक 'अतिदधि' (१९५) शब्दवद्बोध्या ।

---

× अयं शब्दः यानभेदेऽर्थे पुंसि क्लीबे च वर्तते । स्त्रियां स्वल्पार्थे ङीप्रत्यये 'शकटी' इति । क्षुद्रशकट इत्यर्थः ॥

यदातु–" इतोऽक्त्यर्थात् " [ २, ४, ३२ ] इति ङीस्तदा 'दृढसक्थी' इति दीर्घेकारान्तो भवति, तद्रूपाणि वक्ष्यमाण 'नदी' (२२५) वज्ज्ञेयानि ॥ तत्र ङीव्यवधानात् स्वरादौ टादौ 'दध्यस्थिसक्थ्यक्ष्णोऽन्तस्याऽन् " [१,४,६३] इत्यनेन 'अन्' न स्यादिति ॥

## क्लीबे तु—

दृढं सक्थि यस्य शकटस्य तत् 'दृढसक्थि' **शकटम्**–इत्यस्य रूपाणि साधनिका च 'दधि' (१९४) शब्दवत् ॥

'दृढौ सक्थिनी ऊरू यस्य स 'दृढसक्थः' पुरुषः । अत्र स्वाङ्गत्वात् " सक्थ्यक्ष्णः स्वाङ्गे " [ ७, ३, १२६ ] इति समासान्तटप्रत्ययो भवति, तेन अकारान्तत्वात् पुंसि 'दृढसक्थ' शब्दस्य 'जिन' (७४) शब्दवद्रूपाणि वाच्यानि । **स्त्रियाम्**–दृढौ सक्थिनी ऊरू यस्याः सा 'दृढसक्थी' स्त्री; तद्रूपाणि वक्ष्यमाण 'नदी' (२२५) वद्वसेयानि । अत्र "अणजे०" [२, ४, २०] इति टिल्लक्षणो ङीः ॥ **क्लीबे तु**—दृढौ सक्थिनी ऊरू यस्य कुलस्य तत् 'दृढसक्थम्' कुलम्; तद्रूपाणि 'दर्शन' ( १५६ ) शब्दवज्ज्ञेयानि ॥ अत्र सर्वत्र समासान्तेन टप्रत्ययेन व्यवधानाद् " दध्यस्थि० " [ १, ४, ६३ ] इति सूत्राप्रवृत्तिरिति ॥ दृढं च तत् सक्थि च 'दृढसक्थि' इत्यस्यापि 'दधि' (१९४) वदेव रूपाणि बोध्यानि ॥

## (१९७) इकारान्तो नपुंसकलिङ्गः 'अक्षि' शब्दः ।

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अक्षि | अक्षिणी | अक्षीणि |
| द्वि० | ,, | ,, | ,, |
| तृ० | अक्ष्णा | अक्षिभ्याम् | अक्षिभिः |
| च० | अक्ष्णे | ,, | अक्षिभ्यः |
| प० | अक्ष्णः | ,, | ,, |

| | | | |
|---|---|---|---|
| ष० | अक्ष्णः | अक्ष्णोः | अक्ष्णाम् |
| स० | अक्ष्णि, अक्षणि; | ,, | अक्षिषु |
| सं० | हे अक्षे, हे अक्षि; | हे अक्षिणी | अक्षीणि |

साधनिका–'अक्षि+टा (आ)=' "दध्यस्थिसक्थ्यक्ष्णोऽन्तस्यान्" [१,४,६३] इति इकारस्य 'अन्' इत्यादेशे, "अनोऽस्य" [ २, १, १०८ ] इत्यनोऽकारस्य लुकि, "रषृवर्णान्नोण०" [ २, ३, ६३ ] इति नस्य णत्वे च 'अक्ष्णा' इति। अत्र विशेषविधानात् परोऽपि नागमोऽनादेशेन बाध्यते।

एवम्—अक्ष्णे, अक्ष्णः २, अक्ष्णोः २, 'अक्ष्णाम्' इति रूपाणि साध्यानि। सप्तम्येकवचने तु "ईङौ वा" [२, १, १०९] इत्यनोऽकारस्य लुग्वा भवतीति विशेषस्तेन तत्र रूपद्वयमिति। शेषं 'वारि' (१७८) वत्साध्यम् ॥

## (१९८) इकारान्तो विशेषणरूपः 'परमाक्षि' शब्दः। तत्र पुँल्लिङ्गे

( परमम् अक्षि यस्य इक्षोः स 'परमाक्षिः'—इक्षुः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | परमाक्षिः | परमाक्षी | परमाक्षयः |
| द्वि० | परमाक्षिम् | ,, | परमाक्षीन् |
| तृ० | परमाक्ष्णा | परमाक्षिभ्याम् | परमाक्षिभिः |
| च० | परमाक्ष्णे | ,, | परमाक्षिभ्यः |
| प० | परमाक्ष्णः | ,, | ,, |
| ष० | ,, | परमाक्ष्णोः | परमाक्ष्णाम् |
| स० | परमाक्ष्णि, परमाक्षणि, | ,, | परमाक्षिषु |
| सं० | हे परमाक्षे | हे परमाक्षी | हे परमाक्षयः |

साधनिका—स्वरादौ टादौ 'अक्षि' (१९७) वदन्यत्र च 'मुनि' (१७५) वत् ॥ अत्र "सक्थ्यक्ष्णः स्वाङ्गे" [ ७, ३, १२६ ] इति समासान्तः टप्रत्ययो न स्यादस्वाङ्गत्वात् ॥

परममक्षि चक्षुर्यस्येति 'परमाक्षः' पुरुषः। अत्र बहुव्रीहिसमासान्ताक्षिशब्दस्य स्वाङ्गत्वाद्भवति समासान्तस्तेनाऽकारान्तो भवतीति, तद्रूपाणि 'मोक्ष' ( ७६ ) वदवसेयानि ॥

## स्त्रियां तु—

परममक्षि यस्याः इक्षुयष्ट्याः सा 'परमाक्षिः' इक्षुयष्टिः ॥ तद्रूपसाधनिकादिचर्चा तत्पुरुषीयस्त्रीलिङ्गक 'अतिदधि' (१९५) वज्ज्ञेया; अपि त्वत्राऽस्वाङ्गत्वात् समासान्तो न भवतीति विशेषः ॥

यदातु—"इतोऽक्त्यर्थात्" [ २, ४, ३२ ] इति ङीस्तदा 'परमाक्षी' इक्षुयष्टिः। तद्रूपाणि वक्ष्यमाण 'नदी' ( २२५ ) वत् ॥ अत्र ङीव्यवधानादेव " दध्यस्थि० " [ १, ४, ६३ ] इत्यनादेशाभावो भाव्य इति।

परममक्षि चक्षुर्यस्याः स्त्रियाः साऽपि 'परमाक्षी' इति। अत्र स्वाङ्गत्वात् समासान्तटप्रत्ययो भवति, तदनु " अणञेयेकण्० " [ २, ४, २० ] इति टिल्लक्षणङीर्भवतीति। अस्यापि रूपाणि वक्ष्यमाण 'नदी' ( २२५ ) वदेव। अत्रापि ङीव्यवधानादनोऽभावः ॥

## नपुंसकलिङ्गे तु—

परममक्षि चक्षुर्यस्य कुलस्येति 'परमाक्षम्' कुलम्। अत्राऽपि स्वाङ्गत्वात्समासान्ते टे'परमाक्ष' इत्यस्य 'चारित्र' ( १५७ ) वद्रूपाणि वाच्यानि ॥

परमं च तदक्षि ( मानवस्य ) इति (तत्पुरुषे) 'परमाक्ष' इति प्रकृतिर्भवति स्वाङ्गत्वात्। परमं च तदक्षि ( इक्षोः ) इति 'परमाक्षि' इति प्रकृतिः, अस्वाङ्गत्वात्। आद्यायाः प्रकृतेः 'चारित्र' (१५७) वद्रूपणि, अपरायाश्च 'अक्षि' ( १९७ ) वदवसेयानि रूपाणि ॥

## ( १९९ ) इकारान्तो विशेषणरूपः 'अतिशालि' शब्दः। पुँल्लिङ्गे—

( शालीनतिक्रान्तः, अतिशयितः शालिर्वा 'अतिशालिः' )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | अतिशालिः | अतिशाली | अतिशालयः |
| द्वि० | अतिशालिम् | ,, | अतिशालीन् |
| तृ० | अतिशालिना | अतिशालिभ्याम् | अतिशालिभिः |

इत्थमग्रे 'मुनि' ( १७५ ) शब्दवद्रूपाणि साधनिका च ॥

स्त्रियां तु—शालीनतिक्रान्ता या सा 'अतिशालिः, स्त्री । तद्रूपाणि साधनिका च 'मति' ( १७७ ) वत् ॥ यदा तु "इतोऽक्त्यर्थात्" [२, ४, ३२] इति ङीस्तदा, 'अतिशाली' इत्येतद्रूपाणि साधनिका च वक्ष्यमाण 'नदी' ( २२५ ) शब्दवदवसेया ॥

क्लीबे च-शालीनतिक्रान्तं यत् (कुलं) तद् 'अतिशालि' इत्यस्य रूपाणि तत्साधनिका च 'शुचि' ( १७९ ) वज्ज्ञेया ॥

अत्र लिङ्गत्रये "दध्युरःसर्पिर्मधूपानच्छालेः" [ ७, ३, १७२ ] इत्यनेन कुत्राऽपि समासान्तो न स्यात्तत्पुरुषसमासत्वात् ॥

शालयोऽतिक्रान्ता येन पुरुषेण, सः 'अतिशालिकः' पुरुषः । अथवा अतिशयिता शालयो यस्मिन् देशे सोऽपि 'अतिशालिकः' देशः । अत्र बहुव्रीहित्वात् " दध्युरःसर्पिर्मधूपानच्छालेः " [ ७, ३, १७२ ] इति समासान्तः कच् भवतीति । एतद्रूपाणि साधनिका च 'जिन' (७४) वज्ज्ञेया ॥

स्त्रियां च-शालयोऽतिक्रान्ता यया सा, अथवा अतिशयिता शालयो यस्यां भूमौ सा='अतिशालिका' इति । अत्र बहुव्रीहित्वात् कचि "आत्" [ २, ४, १८ ] इत्यापि 'अतिशालिका' इति प्रकृतिस्तद्रूपाणि साधनिका च 'दया' (१६५) वद्बोध्या ।

क्लीबे तु—शालयोऽतिक्रान्ता येन (कुलेन) तद्, अथवाऽतिशयिता शालयो यत्र गृहे तद्='अतिशालिकम्' कुलं गृहं वा । अस्य रूपाणि साधनिका च 'दर्शन' (१५६) वद्बोध्या । अत्राऽपि बहुव्रीहित्वात् कच् भवतीति ॥

## (२००) इकारान्तो विशेषणरूपः प्रियवारि शब्दः ॥

( प्रियं वारि यस्य सः 'प्रियवारिः' ॥ )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | प्रियवारिः | प्रियवारी | प्रियवारयः |
| द्वि० | प्रियवारिम् | ,, | प्रियवारीन् |
| तृ० | प्रियवारिणा | प्रियवारिभ्याम् | प्रियवारिभिः |

इत्थमग्रे 'ऋषि' ( १७६ ) वज्ज्ञेयम्

स्त्रीलिङ्गे—प्रियं वारि यस्याः सा 'प्रियवारिः' मति (१७७) वत् । यदातु " इतोऽक्त्यर्थात् " [ २, ४, ३२ ] इति ङीस्तदा 'प्रियवारी' इति, वक्ष्यमाण 'नदी' (२२५) वत् ॥

नपुंसकलिङ्गे तु—प्रियं वारि यस्य कुलादेस्तत् 'प्रियवारि' इति, 'शुचि' (१७९) वत् ॥ प्रियं च तद् वारि 'प्रियवारि' इति 'वारि' (१७८) वत् ॥

एवं—सुवारि-अतिवारि-परमवारि-अवारिप्रभृतयः ॥

## (२०१) इकारान्तः स्त्रीलिङ्गः 'यष्टि' शब्दः ॥

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | यष्टिः | यष्टी | यष्टयः |
| द्वि० | यष्टिम् | ,, | यष्टीः |
| तृ० | यष्ट्या | यष्टिभ्याम् | यष्टिभिः |
| च० | यष्ट्यै, यष्टये | यष्टिभ्याम् | यष्टिभ्यः |
| पं० | यष्ट्याः, यष्टेः | ,, | ,, |
| ष० | ,, ,, | यष्ट्योः | यष्टीनाम् |
| स० | यष्ट्याम्, यष्टौ | ,, | यष्टिषु |
| सं० | हे यष्टे | हे यष्टी | हे यष्टयः |

साधनिका—'मति' (१७७) वदेव ॥

अस्य × उपचाराद् यष्टिधरपुरुषबोधकत्वेऽपि इदृशान्येव रूपाणि, यष्टि-

× उपचारोऽध्यारोपः ॥ उपचारश्च साहचर्य-स्थान-तादर्थ्य-वृत्त-मान-धरण-सामिप्य-योग-साधनाऽधिपत्यैः । यथा साहचर्यात् 'कुन्ताः प्रविशन्ति, छत्रिणो गच्छन्ति' ( छत्रिसहचरिताः पुरुषा यान्तीत्यर्थः ) । स्थानात् 'मञ्चाः क्रोशन्ति, । गिरिर्दह्यते' । तादर्थ्यात् 'इन्द्रः स्थूणा, प्रदीपो मल्लिका' । वृत्तात् 'यमोऽयं राजा, कुबेरोऽयं राजा' । मानात् 'प्रस्थो व्रीहिः, खारी मुद्गाः' । धरणात् 'तुला चन्दनम्' । सामीप्यात् 'गङ्गातटे गङ्गा' । योगात् 'रक्तः कम्बलः' । साधनात् 'अन्नं प्राणाः', आयुर्घृतम्' । आधिपत्यात् 'ग्रामाधिपतिर्ग्रामः' ॥

शब्दवाच्यार्थस्य पुरुषत्वेऽपि यष्टिशब्दस्य स्त्रीलिङ्गत्वानपायात्; अत एव विकल्पेन दायाद्यादेशेषु, शसि नत्वाभावे च, न किमपि बाधकम्। एतत् समर्थकानि कलिकालसर्वज्ञश्रीहेमचन्द्रप्रभूणामिमानि वचनानि—"चञ्चाः, खरकुटीः, यष्टीः पुरुषान् पश्य—इत्यत्र चञ्चादयः शब्दाः पुरुषे वर्त्तमाना अपि स्त्रीलिङ्गत्वं नोज्झन्तीति नकारो न भवति॥ यदा तु शब्दस्य पुंलिङ्गत्वं तदा वस्तुनः स्त्रीत्वे नपुंसकत्वे वा नकारो भवत्येव, दारान् भ्रुकुंसान् स्त्रीः पश्य, षण्ढान् पण्डकान् पश्य" [ शसोऽतासश्च नः पुंसि ( १, ४, ४९ ) इति सूत्रवृत्तौ ]। अत एव लिङ्गानुशासने 'अस्त्यारोपाभावे गुणवृत्तेराश्रयाद्वचनलिङ्गे' इति आरोपाभावे आश्रयाद्वचनलिङ्गे' कथिते॥

## (२०२) इकारान्तो विशेषणरूपः '* सुगन्धि' शब्दः॥ पुँल्लिङ्गे—

( शोभनो गन्धो गन्धगुणो यस्य स 'सुगन्धिः' कर्पूरः॥ )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | सुगन्धिः | सुगन्धी | सुगन्धयः |
| द्वि० | सुगन्धिम् | ,, | सुगन्धीन् |
| तृ० | सुगन्धिना | सुगन्धिभ्याम् | सुगन्धिभिः |

एवम्—अग्रे सर्वं 'मुनि' (१७५) वत्॥

स्त्रीलिङ्गे—सुन्दरो गन्धो गन्धगुणो यस्याः सा 'सुगन्धिः' मालती, 'मति' (१७७) वत्॥

नपुंसकलिङ्गे तु—सुष्ठु गन्धो यस्य तत् 'सुगन्धि' उत्पलम्, 'शुचि' ( १७९ ) वत्।

आगन्तौ गुणे वर्त्तमाने गन्धशब्दे "वाऽऽगन्तौ" [ ७, ३, १४५ ] इति विकल्पेन 'इत्' प्रत्ययो भवति। यथा पुंसि सुगन्धिः-सुगन्धो वा कायः, स्त्रियां सुगन्धिः-सुगन्धा वा तनुः, क्लीबे सुगन्धि-सुगन्धं वा शरीरम्। तथा च

* अत्र सुपूर्वकगन्धशब्दात् "सुपूत्युत्सुरभेर्गन्धाद् इद् गुणे" [ ७, ३, १४४ ] इति गुणार्थकगन्धशब्दान्ताद्बहुव्रीहेरिद्भवतीति॥

इत्प्रत्यये उपर्युक्तवद्रूपाणि, इदभावे च पुंसि 'जिन' (७४) वत्, स्त्रियां 'दया' (१६५) वत, क्लीबे च 'दर्शन' (१५६) वत् ॥

एवम्—पूतिगन्धि-उद्गन्धि-सुरभिगन्धि-इति शब्दत्रयम् ॥

एवं पुनः, अल्पार्थकादुपमानाच्च गन्धशब्दान्ताद्बहुव्रीहेरपि विकल्पेन 'इद्' भवतीति । यथा सूपगन्धि-सूपगन्धं वा भोजनम्; अत्र "वाल्पे" [ ७, ३, १४६ ] इतीद्वा । उत्पलगन्धि-उत्पलगन्धं वा मुखम्; अत्र "वोपमानात्" [ ७, ३, १४७ ] इतीद्वा बोध्यः ॥ रूपादिव्यवस्था च निरुक्तवदेव ॥

## (२०३) इकारान्तो विशेषणरूपः 'रजनिजानि' शब्दः। पुँल्लिङ्गे—

(रजनि जाया यस्य स 'रजनिजानि' श्चन्द्रः)

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | रजनिजानिः | रजनिजानी | रजनिजानयः |
| द्वि० | रजनिजानिम् | ,, | रजनिजानीन् |
| तृ० | रजनिजानिना | रजनिजानिभ्याम् | रजनिजानिभिः |

एवमग्रे सर्वं 'मुनि' ( १७५ ) वद्बोध्यम् ॥

एवम्—(युवतिर्जाया अस्य=)युवजानिः, प्रियजानिः, शोभनजानिः, वधूजानिः, अनन्यजानिः प्रमुखाः शब्दा बोध्याः ॥

अत्र "जायाया जानिः" [ ७, ३, १६४ ] इति बहुव्रीहौ जायाशब्दस्य 'जानि' इत्यादेशो भवतीति ॥

## (२०४) इकारान्तो द्विवचनान्तः पुँल्लिङ्गः 'दम्पति' शब्दः ॥

(जाया च पतिश्च=दम्पती)

| | | | |
|---|---|---|---|
| प्र० द्वि० | दम्पती | ष० स० | हे दम्पत्योः |
| तृ० च० प० | दम्पतीभ्यम् | सं० | हे दम्पती! |

साधनिका—'मुनि' (१७५) शब्दस्य द्विवचनवत् ॥

अत्र जाया च पतिश्च जम्पती, दम्पती; ×राजदन्तादित्वाज्जायाशब्दस्य जम्-दम्-भावो वा निपात्यते, पक्षे जायापती इति ॥ तथा च **जम्पति, दम्पति, जायापति** इति त्रयोऽपि एकार्था द्विवचनान्ताश्च मुनिशब्दवद्बोध्याः ।

'परलिङ्गो द्वन्द्वोंशी' इति लिङ्गानुशासनवचनात् परस्य पतिशब्दस्य पुँल्लिङ्गत्वात् पुँल्लिङ्गे वृत्तिता ज्ञेया ॥

## ( २०५ ) इकारान्तो '÷भूरि' शब्दः । पुँल्लिङ्गे—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | भूरिः | भूरी | भूरयः |
| द्वि० | भूरिम् | ,, | भूरीन् |
| तृ० | भूरिणा | भूरिभ्याम् | भूरिभिः |

एवमग्रे 'ऋषि' (१७६) वत् ॥

**स्त्रीलिङ्गे**—'मति' ( १७७ ) वत् । षष्ठीबहुवचने 'भूरीणाम्' इत्यत्र णत्वविशेषश्च ॥

**नपुंसकलिङ्गे तु**—स्वर्णार्थकस्य भूरिशब्दस्य 'वारि' ( १७८ ) वद्रूपाणि; प्रचुरेऽर्थे तु ( विशेष्यवशान्नपुंसकभावात् ) 'शुचि' ( १७९ ) शब्दवद्रूपाणि वाच्यानि, किन्तु वारिशब्दवत् णत्वं भवतीति विशेषः ॥

× " राजदन्तादिषु " [ ३, १, १४९ ] इति गणपाठात् ॥

÷ भूरि-पुं० भू-क्रिन् । विष्णौ, शिवे, इन्द्रे च । स्वर्णे न० । प्रचुरे त्रि० ।' इति शब्दस्तोममहानिधिः ॥

# अथ इकारान्तास्तद्धितान्ताः

## सप्तदश शब्दाः

(२०६) इकारान्तस्तद्धितान्तः 'दाक्षि' शब्दः । पुँल्लिङ्गे—

[ दक्षस्याऽपत्यं वृद्धं ( पौत्रादि ) पुमान् दाक्षिः ]

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | दाक्षिः | दाक्षी | दाक्षयः |
| द्वि० | दाक्षिम् | ,, | दाक्षीन् |
| तृ० | दाक्षिणा | दाक्षिभ्याम् | दाक्षिभिः |

एवमग्रे 'ऋषि' (१७६) वद्रूपाणि वाच्यानि ॥ रूपसाधनिकाऽपि तथैव ॥

ऋषिवाचकदक्षशब्दाद् " अत इञ् " [ ६, १, ३१ ] इत्यपत्येऽर्थेऽणोऽपवादरूप 'इञ्' प्रत्ययो भवति; तदनु " अवर्णेवर्णस्य " [७, ४, ६८] इत्यन्त्याऽकारलुकि " वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते [ ७, ४, १ ] इत्याद्यस्वरवृद्धौ च सत्याम् 'दाक्षि' इति प्रकृतिस्त्रिष्वपि वचनेष्ववसेया ॥

स्त्रीलिङ्गे तु—दक्षस्याऽपत्यं वृद्धं स्त्री 'दाक्षी' इति, वक्ष्यमाण 'नदी' (२२५) वत् । अत्र " नुर्जातेः " [ २, ४, ७२ ] इति ङीर्भवतीति ॥

दाक्षेरपत्यं युवा 'दाक्षायणः' इति 'जिन' (७४) वत् । अत्र इञन्तदक्षशब्दाद्यून्यपत्येऽर्थे " यञिञः " [ ६, १, ५४ ] इत्यायनण् भवतीति ॥

एवं च सर्वत्र सूत्रविशेषाभावे वृद्धेऽपत्येऽर्थे विहितौ यौ यञिञौ तदन्ताद्यून्यपत्ये आयनण् प्रत्ययो विधेयः । यथा-गार्ग्यायणः, 'वात्स्यायनः' इत्याद्या यञन्ताः शब्दाः; प्लाक्षायणः, औदुम्बरायणः-इत्याद्या इञन्ताः शब्दाश्च बोध्याः ॥

## (२०७) इकारान्तस्तद्धितान्तः 'बाहवि' शब्दः । पुँल्लिङ्गे—

( बाहोरपत्यं 卐गोत्रं बाहविः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | बाहविः | बाहवी | बाहवयः |
| द्वि० | बाहविम् | ,, | बाहवीन् |
| तृ० | बाहविना | बाहविभ्याम् | बाहविभिः |

एवमग्रे 'मुनि' (१७५) वत् ॥

साधनिका—बाहुशब्दाद् " बाह्वादिभ्यो गोत्रे " [ ६, १, ३२ ] इति गोत्रापत्येऽर्थे 'इञ्' प्रत्ययो भवति । तदनु " अस्वयम्भुवोऽव् " [ ७, ४, ७० ] इत्युकारस्याऽवि " वृद्धिः स्वरेष्वादे० " [ ७, ४, १ ] इत्याद्यस्वरवृद्धौ च सत्याम् 'बाहवि' इति प्रकृतिः । रूपसाधनिका 'मुनि' (१७५) वदवसेया ॥

स्त्रीलिङ्गे तु—बाहोरपत्यं गोत्रं स्त्री 'बाहवी' इति । अत्र "नुर्जातेः" [ २, ४, ७२ ] इति ङीप्रत्यये सति 'बाहवी' इति प्रकृतिः, रूपाण्यस्य साधनिका च वक्ष्यमाण 'नदी' (२२५) वत् ॥

## (२०८) इकारान्तस्तद्धितान्तः 'साखि' शब्दः । पुँल्लिङ्गे—

( सख्युरपत्यं पुमान् 'साखिः' )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | साखिः | साखी | साखयः |
| द्वि० | साखिम् | ,, | साखीन् |
| तृ० | साखिना | साखिभ्याम् | साखिभिः |

एवमग्रे 'मुनि' (१७५) वत् ॥

---

卐 स्वापत्यसंतानस्य स्वव्यपदेशकारणम् ऋषिः अनृषिर्वा यः प्रथमः पुरुषस्तदपत्यं गोत्रम् ॥

**साधनिका**—सखिशब्दात् " *बाह्वादिभ्यो गोत्रे " [ ६, १, ३२ ] इति इञि " अवर्णेवर्णस्य " [ ७, ४, ६८ ] इत्यन्त्येकारलुकि " वृद्धिः स्वरे० " [ ७, ४, १ ] इति आद्याऽकारस्य वृद्धौ 'साखि' इति प्रकृतिः, तद्रूपसाधनिका 'मुनि' (१७५) वद्बोध्या ॥

**स्त्रीलिङ्गे तु**—सख्युरपत्यं स्त्री 'साखी' इति वक्ष्यमाण 'नदी' (२२५) वत् । अत्रापि " नुर्जातेः " [ २, ४, ७२ ] इति ङीर्विहित इति ॥

## (२०९) इकारान्तस्तद्धितान्तः 'औडुलोमि' शब्दः । पुँल्लिङ्गे—

( उडुलोम्नोऽपत्यं पुमान् औडुलोमिः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | औडुलोमिः | औडुलोमी | उडुलोमाः |
| द्वि० | औडुलोमिम् | ,, | उडुलोमान् |
| तृ० | औडुलोमिना | औडुलोमिभ्याम् | उडुलोमैः |
| च० | औडुलोमये | ,, | उडुलोमेभ्यः |
| प० | औडुलोमेः | ,, | ,, |
| ष० | ,, | औडुलोम्योः | उडुलोमानाम् |
| स० | औडुलोमौ | ,, | उडुलोमेषु |
| सं० | हे औडुलोमे | हे औडुलोमी | हे उडुलोमाः |

एवं—शरलोम्नोऽपत्यं पुमान्='शारलोमि' शब्दोऽपि ज्ञेयः ॥

**साधनिका**—'उडुलोमन्' शब्दात् "बाह्वादिभ्यो गोत्रे" [६, १, ३२] इति 'इञ्' (इ) प्रत्यये " नोऽपदस्य तद्धिते " [ ७, ४, ६१ ] इत्यनेन

---

* बहुवचनमाकृतिगणार्थम् । तेन सख्युरपत्यं साखिः । संवेशिनः सांवेशिः । उदङ्कस्य औदङ्किः । एवमौद्दालकिः, वाल्मीकिः, आरुणिः इत्यादि सिद्धं भवतीति ॥

(व्यपदेशिवदेकस्मिन्निति न्यायबलात्) नकारस्य लुकि, "वृद्धिः स्वरेष्वादे०" [ ७, ४, १ ] इत्याद्यस्वरवृद्धौ च सत्यामेकवचने द्विवचने च "औडुलोमि" इति प्रकृतिः। बहुवचने च " लोम्नोऽपत्येषु " [ ६, १, २३ ] इति 'अ' प्रत्यये "नोऽपदस्य०" इति नकारस्य लुकि 'उडुलोम' इत्यकारान्ता प्रकृतिः। तथा चैकवचनद्विवचनयो रूपाणि 'मुनि' (१७५) वद्, बहुवचने च 'जिन' (७४) वत्साध्यानीति ॥

ननु " लोम्नोऽपत्येषु " [ ६, १, २३ ] इति सूत्रे बहुवचननिर्देशे किं बीजमिति चेदुच्यते—"अपत्येष्विति बहुवचनादेकस्मिन्नपत्ये द्वयोश्च बाह्वादित्वादिञेव। औडुलोमिना, औडुलोमिभ्याम् ॥ " इति बृहद्वृत्तिवचनाद् 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षण'-मिति ॥ तथा च-उडुलोम्नोऽपत्यानि 'उडुलोमाः' इत्यादि ॥

## स्त्रीलिङ्गे तु—

( उडुलोम्नोऽपत्यं स्त्री 'औडुलोमी )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | औडुलोमी | औडुलोम्यौ | उडुलोमाः |
| द्वि० | औडुलोमीम् | ,, | ,, |
| तृ० | औडुलोम्या | औडुलोमीभ्याम् | उडुलोमाभिः |
| च० | औडुलोम्यै | ,, | उडुलोमाभ्यः |
| प० | औडुलोम्याः | ,, | ,, |
| ष० | ,, | औडुलोम्योः | उडुलोमानाम् |
| स० | औडुलोम्याम् | ,, | उडुलोमासु |
| सं० | हे औडुलोमि | हे औडुलोम्यौ | हे उडुलोमाः |

एवं शारलोम्नोऽपत्यं स्त्री 'शारलोमी' शब्दः ॥

**साधनिका**—इञन्त 'औडुलोमि' शब्दात् "नुर्जातेः" [ २, ४, ७२ ] इति ङी (ई) प्रत्यये 'औडुलोमी' इति (स्त्री) प्रकृतिः; सा चैकवचनद्विचनयोरेव। बहुवचने च-उडुलोम्नोऽपत्यानि स्त्रियः 'उडुलोमाः'। अत्र "लोम्नोऽपत्येषु" [६, १, २३] इति 'अ' प्रत्यये, "नोऽपदस्य०" [७, ४, ६१] इति नस्य लुकि, स्त्रियाम् "आत्" [ २, ४, १८ ] इत्यापि 'उडुलोमा' इति प्रकृतिः। तथाचैकवचनद्विवचनयोर्वक्ष्यमाण 'नदी' (२२५) वत्, बहुवचने च 'दया' (१६५) वद्रूपसाधनिका ज्ञेया ॥

## (२१०) इकारान्तस्तद्धितान्तः 'आसुरि' शब्दः। पुँल्लिङ्ग—

( असुरस्य ऋषेरपत्यं गोत्रं पुमान्=आसुरिः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आसुरिः | आसुरी | आसुरयः |
| द्वि० | आसुरिम् | ,, | आसुरीन् |
| तृ० | आसुरिणा | आसुरिभ्याम् | आसुरिभिः |

इत्थमग्रे 'ऋषि' (१७६) वद्बोध्यम् ॥

अत्र असुरशब्दाद् "बाह्वादिभ्यो गोत्रे" [ ६, १, ३२ ] इति इञि "अवर्णे०" [ ७, ४, ६८ ] इति अन्त्याऽकारस्य लुकि "वृद्धिः स्वरे०" [ ७, ४, १ ] इत्याद्याऽकारस्य आकारे च 'आसुरि' इति प्रकृतिः। सर्वासु विभक्तिषु तद्रूपसाधनिका 'ऋषि' (१७६) वज्ज्ञेया ॥

स्त्रीलिङ्गे तु—असुरस्य ऋषेरपत्यं स्त्री 'आसुरायणी' इति, वक्ष्यमाण 'नदी' ( २२५ ) वत् ॥

अत्रादौ ऋषिवाचकाऽसुरशब्दाद् "बाह्वादिभ्यो०" इति इञि 'आसुरि' इति, तदनु "कौरव्यमाण्डूकाऽऽसुरेः" [२, ४, ७०] इति स्त्रियां ङीस्तत्सन्नियोगे डायन् चान्तः। तदनु "डित्यन्त्यस्वरादेः" [ २, १, ११४ ] इति सूत्रेण ( 'व्यपदेशिवदेकस्मिन्' इति न्यायबलात् ) इकारस्य लुकि, "रषृवर्णा०" [ २, ३, ६३ ] इति नस्य णत्वे 'आसुरायणी' इति प्रकृतिर्जायते इति ॥

## (२११) इकारान्तस्तद्धितान्तः 'औदुम्बरि' शब्दः । पुँल्लिङ्गे—

(उदुम्बराणां राजा, उदुम्बरस्य राज्ञोऽपत्यं वा पुमान्-औदुम्बरिः)

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | औदुम्बरिः | औदुम्बरी | उदुम्बराः |
| द्वि० | औदुम्बरिम् | ,, | उदुम्बरान् |
| तृ० | औदुम्बरिणा | औदुम्बरिभ्याम् | उदुम्बरैः |
| च० | औदुम्बरये | ,, | उदुम्बरेभ्यः |
| प० | औदुम्बरेः | ,, | ,, |
| ष० | ,, | औदुम्बर्योः | उदुम्बराणाम् |
| स० | औदुम्बरौ | ,, | उदुम्बरेषु |
| सं० | हे औदुम्बरे | हे औदुम्बरी | हे उदुम्बराः |

**साधनिका**—अत्र "×साल्वांशप्रत्यग्रथकलकूटाश्मकादिञ्" [६, १, ११७] इति सूत्रेण ( साल्वा नाम जनपदस्तदंशाः उदुम्बरादयस्तेभ्यः राष्ट्रवाचिभ्यः क्षत्रियवाचिभ्यश्च सरूपेभ्योऽनुक्रमेण ) राजनि अपत्येऽर्थे च द्रिसंज्ञक 'इञ्' प्रत्ययो भवति । इञि च " अवर्णेवर्णस्य " [ ७, ४, ६८ ] इत्यन्त्याऽकारलुकि " वृद्धिः स्वरे० " [ ७, ४, १ ] इत्याद्योकारस्य वृद्धौ च सत्यामेकवचनद्विवचनयोः 'औदुम्बरि' इति प्रकृतिः, तद्रूपसाधनिका 'ऋषि' (१७६) वदवसेया । बहुवचने च " बहुष्वस्त्रियाम् " [ ६, १, १२४ ] इति द्रिसंज्ञकस्य इञो लुकि 'उदुम्बर' इति (मूल) प्रकृतिस्तिष्ठति । तस्माद् बहुवचनरूपसाधनिका 'वीर'(७५) शब्दवद्बोध्या एकवचनद्विवचनयोश्च 'ऋषि'(१७६)वत्॥

**स्त्रीलिङ्गे तु**—उदुम्बरस्य राज्ञोऽपत्यं स्त्री 'औदुम्बरी' इति, वक्ष्यमाण 'नदी' (२२५) वत् । अत्र "नुर्जातेः" [२, ४, ७२] इति ङीः कृत इति ॥

---

× " उदुम्बरा-स्तिलखला मद्रकरा युगन्धराः भुलिङ्गा शरदण्डाश्च, साल्वांशा इति कीर्तिताः ॥ १ ॥ "

उदुम्बरस्य राज्ञोऽपत्यं वृद्धमौदुम्बरिस्तस्यापत्यं युवा 'औदुम्बरिः औदुम्बरायणो वा'। अत्रादौ " साल्वांश० " [६, १, ११७] इति 'इञ्' तदनु यून्यपत्ये " यञिञः " [ ६, १, ५४ ] इति 'आयनण्' भवति, ततः " द्रीञोवा " [ ६, १, १३९ ] इत्यायनणो विकल्पेन लुब्भवतीति ॥

उदुम्बराणां राजा औदुम्बरिस्तस्यापत्यम् 'औदुम्बरः, औदुम्बरायणिर्वा। अत्र " अवृद्धाद्दोर्नवा " [ ६, १, ११० ] इति पक्षे आयनिञ् ॥

## (२१२) इकारान्तस्तद्धितान्तः 'प्रात्यग्रथि' शब्दः। पुँल्लिङ्ग--

( प्रत्यग्रथानां राजा, प्रत्यग्रथस्य राज्ञोऽपत्यं वा पुमान्-प्रात्यग्रथिः )

| वि० | एकव० | द्वि० | बहुव० |
|---|---|---|---|
| प्र० | प्रात्यग्रथिः | प्रात्यग्रथी | प्रत्यग्रथाः |
| द्वि० | प्रात्यग्रथिम् | ,, | प्रत्यग्रथान् |
| तृ० | प्रात्यग्रथिना | प्रात्यग्रथिभ्याम् | प्रत्यग्रथैः |

इत्थमग्रे एकवचनद्विवचनयोः 'मुनि' (१७५) वद्, बहुवचनने च 'जिन' (७४) वद्रूपाणि साधनिका च ज्ञेया ॥

अत्र " साल्वांशप्रत्यग्र० " [ ६, १, ११७ ] इति द्रिसंज्ञक 'इञ्' भवति, तदनु " अवर्णे० " [ ७, ६, ६८ ] इति अन्त्याकारलुकि " वृद्धिः स्वरे० " [ ७, ४, १ ] इति आद्याऽकारस्याऽऽकारे प्रात्यग्रथि' इति इकारान्ता प्रकृतिः। सा च एकवचनद्विवचनयोरेव। बहुवचने तु " बहुष्वस्त्रियाम् " [ ६, १, ११४ ] इति द्रेरिञो लुकि 'प्रत्यग्रथ' इति प्रकृतिः ॥

स्त्रीलिङ्गे तु—प्रत्यग्रथस्य राज्ञोऽपत्यं स्त्री 'प्रात्यग्रथी' इति वक्ष्यमाण 'नदी' (२२५) वत्। अत्र "नुर्जातेः" [ २, ४, ७२ ] इति ङीर्विहितः ॥

## (२१३) इकारान्तस्तद्धितान्तः 'कालकूटि' शब्दः। पुँल्लिङ्ग

( कलकूटानां राजा, कलकूटस्य राज्ञोऽपत्यं वा पुमान् कालकुटिः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | कालकूटिः | कालकूटी | कलकूटाः |
| द्वि० | कालकूटिम् | ,, | कलकूटान् |
| तृ० | कालकूटिना | कालकूटिभ्याम् | कलकूटैः |

इत्थमग्रे एकवचने द्विवचने च ' मुनि ' ( १७५ ) वद्, बहुवचने तु 'जिन' (७४) वत् ॥

अत्र "साल्वांशप्रत्य०" [ ६, १, ११७ ] इति इञि, " अवर्णे० " [७, ४, ६८] इत्यन्त्याकारलुकि "वृद्धिः स्वरे०" [ ७, ४, १ ] इत्याद्यस्वर-वृद्धावेकवचनद्विवचनयोः 'कालकूटि' इति प्रकृतिः, बहुवचने च "बहुष्व०" [६, १ १२४] इति इञो लुकि 'कलकूट' इति प्रकृतिस्तिष्ठति ॥

स्त्रीलिङ्गे तु—कलकूटस्य राज्ञोऽपत्यं स्त्री 'कालकूटी' इति वक्ष्यमाण 'नदी' (२२५) वत । अत्र इञि "नुर्जातेः" [२, ४, ७२] इति ङीर्भवतीति सर्वत्र ज्ञेयम् ॥

## (२१४) इकारान्तस्तद्धितान्तः 'आश्मकि' शब्दः । पुँल्लिङ्गे—

( अश्मकानां राजा, अश्मकस्य राज्ञोऽपत्यं वा पुमान्-आश्मकिः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आश्मकिः | आश्मकी | अश्मकाः |
| द्वि० | आश्मकिम् | ,, | अश्मकान् |
| तृ० | आश्मकिना | आश्मकिभ्याम् | अश्मकैः |

एवमग्रे एकवचने द्विवचने च 'मुनि' ( १७५ ) वत्, बहुवचने तु 'जिन' (७४) वत् ॥

अत्र अश्मकशब्दात् "साल्वांशप्र०" [ ६, १, ११७ ] इति द्रिसंज्ञके इञि "अवर्णे०" [७, ४, ६८] इत्यन्त्याकारलुकि "वृद्धि स्वरे०" [७, ४, १] इत्याद्याऽकारस्याऽऽकारे च सत्येकवचनद्विवचनयोः 'आश्मकि' इति प्रकृतिः, "बहुष्वस्त्रियाम्" [ ६, १, १२४ ] इति द्रेरिञो लुकि बहुवचने "अश्मक" इति प्रकृतिः ॥

स्त्रीलिङ्गे तु—अश्मकस्य राज्ञोऽपत्यं स्त्री 'आश्मकी' इति, वक्ष्यमाण 'नदी' ( २२५ ) वत् । अत्राऽपि " नुर्जातेः " [२, ४, ७२] इति ङीर्विहित इति ॥

## (२१५) इकारान्तस्तद्धितान्तः 'क्षैरकलम्भि' शब्दः । पुँल्लिङ्ग--

( क्षीरकलम्भस्याऽपत्यं पुमान् 'क्षैरकलम्भिः' )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | क्षैरकलम्भिः | क्षैरकलम्भी | क्षीरकलम्भाः |
| द्वि० | क्षैरकलम्भिम् | ,, | क्षीरकलम्भान् |
| तृ० | क्षैरकलम्भिना | क्षैरकलम्भिभ्याम् | क्षीरकलम्भैः |

एवमग्रे एकवचने द्विवचने च 'मुनि' ( १७५ ) वत्, बहुवचने तु 'जिन' (७४) वत् ॥

अत्र क्षीरकलम्भशब्दात् " अत इञ् " [ ६, १, ३१ ] इति इञि "अवर्णेवर्णस्य"[७, ४, ६८] इत्यन्त्यस्य इकारस्य लुकि "वृद्धिः स्वरे०" [७, ४, १] इत्याद्यस्य ईकारस्य ऐकारे चैकवचनद्विवचनयोः 'क्षैरकलम्भि' इति प्रकृतिः, बहुवचने तु " प्राग्भरते बहुस्वरादिञः " [ ६, १, १२९ ] इति इञो लुपि 'क्षीरकलम्भ' इति प्रकृतिः ॥

स्त्रीलिङ्गे तु—क्षीरकलम्भस्यापत्यं स्त्री 'क्षैरकलम्भी' इति वक्ष्यमाण 'नदी' (२२५) वत् । अत्र नुर्जातेः" [२, ४, ७२] इति ङीर्भवतीति ॥

## (२१६) इकारान्तस्तद्धितान्तः 'पान्नागारि' शब्दः । पुँल्लिङ्ग—

( पन्नागारस्याऽपत्यं पुमान् 'पान्नागारिः' )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | पान्नागारिः | पान्नागारी | पन्नागाराः |
| द्वि० | पान्नागारिम् | ,, | पन्नागारान् |
| तृ० | पान्नागारिणा | पान्नागारिभ्याम् | पन्नागारैः |

इत्थमग्रे एकवचनद्विवचनयोः 'ऋषि' (१७६) वत्, बहुवचने च 'वीर' (७५) शब्दवत् ॥

अत्र "अत इञ्" [६, १, ३१] इतीञि "अवर्णे०" [७, ४, ६८] इत्यन्त्याऽकारलुकि "वृद्धिः स्वरे०" [७, ४, १] इत्याद्याऽकारस्याऽऽकारे चैकवचनद्विवचनयोः 'पान्नागारि' इति प्रकृतिः । बहुवचने च "प्राग्भरते०" [६, १, १२९] इतीञो लुकि 'पन्नागार' इति प्रकृतिः ॥

स्त्रीलिङ्गे तु—पन्नागारस्याऽपत्यं स्त्री 'पान्नागारी' इति वक्ष्यमाण नदी (२२५) वदत्राऽपि "नुर्जातेः" [२, ४, ७२,] इति ङीर्विहित इति ॥

## (२१७) इकारान्तस्तद्धितान्तः 'मान्थरेषणि' शब्दः । पुँल्लिङ्गे—

( मन्थरेषणस्याऽपत्यं पुमान् मान्थरेषणिः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | मान्थरेषणिः | मान्थरेषणी | मन्थरेषणाः |
| द्वि० | मान्थरेषणिम् | ,, | मन्थरेषणान् |
| तृ० | मान्थरेषणिना | मान्थरेषणिभ्याम् | मन्थरेषणैः |

इत्थमग्रे एकवचनद्विवचनयोः 'मुनि' (१७५) वत्, बहुवचने च 'जिन' (७४) वत् ॥

अत्र मन्थरेषणशब्दात् "अत इञ्" [६, १, ३१] इति इञि, अवर्णेवर्णस्य" [७, ४, ६८] इत्यन्त्याकारलुकि "वृद्धिः स्वरे०" [७, ४, १] इत्याद्यस्वरवृद्धौ चैकवचनद्विवचनयोः 'मान्थरेषणि' इति प्रकृतिः । बहुवचने च "प्राग्भरते बहुस्वरादिञः" [६, १, १२९] इतीञो लुपि 'मन्थरेषण' इति (मूल) प्रकृतिरेवावतिष्ठते ॥

स्त्रीलिङ्गे तु—मन्थरेषणस्यापत्यं स्त्री 'मान्थरेषणी' इति, वक्ष्यमाण 'नदी' (२२५) वत् । अत्र "नुर्जातेः" [२, ४, ७२] इति ङीर्भवतीति ॥

## (२१८) इकारान्तस्तद्धितान्तः 'यौधिष्ठिरि' शब्दः । पुँल्लिङ्गे—

( युधिष्ठिरस्यापत्यं [गोत्रं] पुमान् यौधिष्ठिरिः)

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | यौधिष्ठिरिः | यौधिष्ठिरी | युधिष्ठिराः |
| द्वि० | यौधिष्ठिरिम् | ,, | युधिष्ठिरान् |
| तृ० | यौधिष्ठिरिणा | यौधिष्ठिरिभ्याम् | युधिष्ठिरैः |

एवमग्रे एकवचनद्विवचनयोः 'ऋषि' (१७६) वत्, बहुवचने च 'वीर' (७५) वत् ॥

अत्र युधिष्ठिरशब्दात् "बाह्वादिभ्यो गोत्रे" [ ६, १, ३२ ] इति इञि "अवर्णेवर्णस्य" [७, ४, ६८] इत्यन्त्याऽकारलुकि "वृद्धिः स्वरे०" [७, ४, १] इति आद्योकारस्यौकारे च एकवचनद्विवचनयोः 'यौधिष्ठिरि' इति प्रकृतिः । बहुवचने तु " प्राग्भरते० " [ ६, १, १२९ ] इति इञो लुपि 'युधिष्ठिर' इति प्रकृतिः ॥

स्त्रीलिङ्गे तु-युधिष्ठिरस्यापत्यं (गोत्रं) स्त्री 'यौधिष्ठिरी' इति वक्ष्यमाण नदी (२२५) वदपि तु षष्ठीबहुवचने 'यौधिष्ठिरीणाम्' इति णत्वविशेषोऽवसेयः । अत्रापि "नुर्जातेः" [२, ४, ७२] इति ङीर्विहित इति ।

## (२१९) इकारान्तस्तद्धितान्तः 'आर्जुनि' शब्दः । पुँल्लिङ्ग—

( अर्जुनस्यापत्यं [ गोत्रं ] पुमान्-आर्जुनिः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | आर्जुनिः | आर्जुनी | अर्जुनाः |
| द्वि० | आर्जुनिम् | ,, | अर्जुनान् |
| तृ० | आर्जुनिना | आर्जुनिभ्याम् | अर्जुनैः |

इत्थमग्रे एकवचनद्विवचनयोः 'मुनि' (१७५) वत्, बहुवचने तु 'जिन' (७४) वदवसेयम् ॥

अत्र 'अर्जुन' शब्दात् "बाह्वादिभ्यो गोत्रे" [ ६, १, ३२ ] इतीञि "अवर्णे०" [७, ४, ६८] इत्यन्त्याकारलुकि " वृद्धिः स्वरे० " [७, ४, १]

इत्याद्याऽकारस्याऽऽकारे चैकवचनद्विवचनयोः 'आर्जुनि' इति प्रकृतिः । बहुवचने च "प्राग्भरते०" [६, १, १२९] इतीञो लुपि 'अर्जुन' इति प्रकृतिः ॥

स्त्रीलिङ्गे तु—अर्जुनस्यापत्यं [ गोत्रं ] स्त्री आर्जुनी' इति वक्ष्यमाण नदी (२२५) वत् । अत्र "नुर्जातेः" [२, ४, ७२] इति ङी विहित इति ॥

## (२२०) इकारान्तस्तद्धितान्तः 'औद्दालकि' शब्दः । पुँल्लिङ्गे—

( उद्दालकस्याऽपत्यं [गोत्रं] पुमान् औद्दालकिः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | औद्दालकिः | औद्दालकी | उद्दालकाः |
| द्वि० | औद्दालकिम् | ,, | उद्दालकान् |
| तृ० | औद्दालकिना | औद्दालकिभ्याम् | उद्दालकैः |

एवमग्रे एकवचनद्विवचनयोः 'मुनि' (१७५) वत्, बहुवचने च 'जिन' (७४) वज्ज्ञेयम् ॥

अत्रापि उद्दालकशब्दाद् गोत्रापत्येऽर्थे "बाह्वादिभ्यो गोत्रे" [६, १, ३२] इति इञि "अवर्णे०" [ ७, ४, ६८ ] इति अन्तस्याऽकारस्य लुकि "वृद्धिः स्वरे०" [७, ४, १] इत्याद्योकारस्यौकारे चैकवचनद्विवचनयोः 'औद्दालकि' इति प्रकृतिः । बहुवचने तु "प्राग्भरते०" [ ६, १, १२९ ] इतीञो लुपि 'उद्दालक' इति प्रकृतिः ॥

स्त्रीलिङ्गे तु—उद्दालकस्य गोत्रापत्यं स्त्री 'औद्दालकी' इति वक्ष्यमाण 'नदी' (२२५) वत् । अत्रापि "नुर्जातेः" [२, ४, ७२] इति ङीः ॥

## (२२१) इकारान्तस्तद्धितान्तः 'कानकि' शब्दः । पुँल्लिङ्गे—

( कनकस्यापत्यं पुमान् कानकिः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | कानकिः | कानकी | कनकाः, कानकयः |
| द्वि० | कानकिम् | ,, | कनकान्, कानकीन् |

| | | | |
|---|---|---|---|
| तृ० | कानकिना | कानकिभ्याम् | कनकैः, कानकिभिः |
| च० | कानकये | ,, | कनकेभ्यः, कानकिभ्यः |
| प० | कानकेः | ,, | ,, ,, |
| ष० | ,, | कानक्योः | कनकानाम्, कानकीनाम् |
| स० | कानकौ | ,, | कनकेषु, कानकिषु |
| सं० | हे कानके | हे कानकी | हे कनकाः, हे कानकयः |

अत्र कनकशब्दात् "अत इञ्" [ ६, १, ३१ ] इतीञि "अवर्णे०" [७, ४, ६८] इत्यन्त्याकारलुकि "वृद्धिः स्वरे०" [७, ४ १] इत्याद्यस्वरवृद्धौ चैकवचनद्विवचनयोः 'कानकि' इति प्रकृतिः । बहुवचने तु—" वोपकादेः " [ ६, १, ११० ] इति इञो विकल्पेन लुब् भवति, लुप्पक्षे * 'निमित्तापाये नैमित्तिकस्याप्यपाय' इति न्यायाद् (इञ्) प्रत्ययरूपनिमित्तापाये आद्यस्वरवृद्धादिरूपनैमित्तिकस्याप्यपायात् 'कनक' इति मूलप्रकृतिः। लुबभावपक्षे 'कानकि' इति प्रकृतिः । तथा चैकवचनद्विवचनयोः 'मुनि' ( १७५ ) वत्, बहुवचने तु लुप्पक्षे 'जिन' (७४) वत्तदभावे च मुनिवद्रूपसाधनिका ज्ञेया ॥

स्त्रीलिङ्गे तु—कनकस्यापत्यं स्त्री 'कानकी' इति वक्ष्यमाण' 'नदी' (२२५) वत् । अत्र "नुर्जातेः" [२, ४, ७२] इति ङीः ॥

## (२२२) इकारान्तस्तद्धितान्तो नित्यबहुवचनान्तः 'अङ्गवङ्गदाक्षि' शब्दः । पुँल्लिङ्गे—

( आङ्गश्च वाङ्गश्च दाक्षिश्च=अङ्गवङ्गदाक्षयः )

| विभक्तिः | बहुवचनम् | |
|---|---|---|
| प्र० | अङ्गवङ्गदाक्षयः | आङ्गवाङ्गदाक्षयः |
| द्वि० | अङ्गवङ्गदाक्षीन् | आङ्गवाङ्गदाक्षीन् |

* अस्मिन् तद्धितान्तप्रकरणे यस्य शब्दस्य बहुवचने यत्र यत्र मूलप्रकृतिस्तत्रतत्राऽस्य न्यायस्य प्रवृत्तिः ॥

| | | |
|---|---|---|
| तृ० | अङ्गवङ्गदाक्षिभिः | आङ्गवाङ्गदाक्षिभिः |
| च० | अङ्गवङ्गदाक्षिभ्यः | आङ्गवाङ्गदाक्षिभ्यः |
| प० | ,, | ,, |
| ष० | अङ्गवङ्गदाक्षीणाम् | आङ्गवाङ्गदाक्षीणाम् |
| स० | अङ्गवङ्गदाक्षिषु | आङ्गवाङ्गदाक्षिषु |
| सं० | हे अङ्गवङ्गदाक्षय | हे आङ्गवाङ्गदाक्षयः |

अत्र शब्दत्रयस्य द्वन्द्वः, यथा—卐आङ्गश्च वाङ्गश्च दाक्षिश्चेति । तत्र अङ्गशब्दाद् वङ्गशब्दाच्च "पुरुमगधकलिङ्गशूरमसद्द्विस्वरादण्" [६, १, ११६] इति विहितस्य द्विस्वरलक्षणस्याऽणः "वान्येन" [६, १, १३३] इति विकल्पेन लुप् भवति; तेन लुपि 'अङ्गवङ्गदाक्षि' इति प्रकृतिः, अलुपि च 'आङ्गवाङ्ग-दाक्षि' इति प्रकृतिर्भवतीति ॥

इति इकारान्तास्तद्धितान्ताः सप्तदश शब्दाः ॥

---

卐 अङ्गानां राजा, अङ्गस्यापत्यं वा पुमान्=आङ्गः, एवं वाङ्गः । अनयोर्निष्पत्तिः '११०' शब्दवत् । दक्षस्य ऋषेरपत्यं पुमान्-दाक्षिरित्यस्य च निष्पत्तिः '२०६' शब्दवत् ॥

इति श्रीमत्तपोगणाम्बराम्बरमणि-शासनसम्राट्-स्वपरसमयपारावारपारीणाऽऽ-चार्यचक्रचूडामणि-कलिकालकल्पतरुकल्प-तीर्थरक्षैकदक्ष-सुगृहीतनामधेय-जगद्गुरु-परमपूज्य पूज्यपाद-परमोपकारि-भट्टारकाचार्यवर्य-श्रीमद्विजयनेमिसूरीश्वर-पट्टालङ्कार-व्याकरणवाचस्पति-कविरत्न-शास्त्रविशारद-विबुधशिरोमणि-परमपूज्य-परमोपकारि-श्रीमद्गुरुराजभट्टारकगणाचार्य-श्रीमद्विजयलावण्यसूरीश्वर-चरणारविन्दमिलिन्दायमान-विनेयमुनि-दक्षविजय-विरचिते-

## श्रीस्याद्यन्तरत्नाकरे-स्वरान्तप्रकरणस्थम्-इकारान्तं-प्रकरणम्

॥ ॐ नवपदमयाय श्रीसिद्धचक्राय नमो नमः ॥

# ॥ अथ ईकारान्तप्रकरणम् ॥

## (२२३) ईकारान्तः पुँल्लिङ्गः, 'वातप्रमी' शब्दः ॥ (औणादिकः)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा- | वातप्रमीः | वातप्रम्यौ | वातप्रम्यः |
| द्वितीया- | वातप्रमीम् | ,, | वातप्रमीन् |
| तृतीया- | वातप्रम्या | वातप्रमीभ्याम् | वानप्रमीभिः |
| चतुर्थी- | वातप्रम्ये | ,, | वातप्रमीभ्यः |
| पञ्चमी- | वातप्रम्यः | ,, | ,, |
| षष्ठी- | ,, | वाातप्रम्योः | वातप्रम्याम् |
| सप्तमी- | वातप्रमी | ,, | वातप्रमीषु |
| सम्बोधनम्- | हे वातप्रमीः | हे वातप्रम्यौ | हे वातप्रम्यः |

एवम्—ययी-पपी-प्रमुखाः ॥

---

१ वातं प्रमिमीते वाताभिमुखधावनाद्=वातप्रमीः । अत्र "वातात् प्रमः कित्" [ ७१३ ] इत्युणादिसूत्रेण-वातपूर्वपदात् प्रेणोपसृष्टात् 'मांक् माने' इत्यस्मात् किद्-ईः प्रत्ययो भवतीति । वातप्रमीः=वात्या, अश्वः, वातमृगः, पक्षी, शमीवृक्षश्च ॥

२ 'याँक् प्रापणे' 'पां पाने' इत्येताभ्याम् "यापाभ्यां द्वे च" [७१४] इत्युणादिसूत्रेण किदीप्रत्ययो द्विर्भावश्च भवतीति ययीपपीशब्दनिष्पत्तिः । ययीः-मोक्षमार्गः, दिव्यवृष्टिः, आदित्यः, अश्वश्च । पपीः-रश्मिः, सूर्यः, हस्ती च ॥

**साधनिका**—'वातप्रमी+अम्=" समानादमोऽतः " [ १, ४, ४६ ] इत्यमोऽकारस्य लुकि **'वातप्रमीम्'**। वातप्रमी+शस् ( अस् )="शसोऽता०" [१, ४, ४९] इतीकाराऽकारयोः ईकारे–सस्य नकारे च **'वातप्रमीन्'** इति। 'वातप्रमी+ङि (इ)'="समानानां तेन दीर्घः" [१, २, १] इति दीर्घे **'वातप्रमी'** इति। शेषस्वरादिप्रत्ययेषु सर्वत्र " इवर्णादे० " [१, २, २१] इति इकारस्य यकारो विधेयः। व्यञ्जनादौ तु योजनामात्रं विधेयम्॥ **'वातप्रम्याम्'** इत्यत्र तु दीर्घत्वान्न नामादेशः॥

" योषिति वातप्रमीः समीरमृगः " इति बोपालितात् स्त्रीत्वमप्यस्य–इत्यमरकोषस्य व्याख्यासुधाख्यव्याख्यातो 'वातप्रमी' शब्दः ✠स्त्रीलिङ्गेऽप्यस्तीति। तद्रूपाणि पुंवद्–अपि तु द्वितीयाबहुवचने पुंस्त्वाभावात् सस्य नत्वाभावे **"वातप्रमीः'** इति विशेषः। ङिद्वचनेषु नित्यस्त्रीत्वाभावान्न दायाद्यादेशाः॥

## (२२४) ईकारान्तः पुँल्लिङ्गः 'वातप्रमी' शब्दः॥ ( क्विबन्तः )

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | वातप्रमीः | वातप्रम्यौ | वातप्रम्यः |
| द्वि० | वातप्रम्यम् | ,, | ,, |
| तृ० | वातप्रम्या | वातप्रमीभ्याम् | वातप्रमीभिः |
| च० | वातप्रम्ये | ,, | वातप्रमीभ्यः |
| प० | वातप्रम्यः | ,, | ,, |
| ष० | ,, | वातप्रम्योः | वातप्रम्याम् |
| स० | वातप्रम्यि | ,, | वातप्रमीषु |
| सं० | हे वातप्रमीः | हे वातप्रम्यौ | हे वातप्रम्यः |

**साधनिका**—वातप्रमीं मृगविशेषमिच्छतीति क्यनि क्विपि=वातप्रमीः, अत्र अमि शसि ङौ च "योऽनेकस्वरस्य" [२, १, ५६] इति ईकारस्य यत्वे **'वातप्रम्यम्, वातप्रम्यः, वातप्रम्यि'** इति। यद्वा वातं प्रमीनातीति वातोपपदात् प्रपूर्वात् मीनातेः क्विपि–वातप्रमीः, अत्राऽपि अमि शसि ङौ च "क्विव्वृत्तेरसुधियस्तौ" [ २, १, ५८ ] इतीकारस्य यत्वे **'वातप्रम्यम्, वातप्रम्यः,**

✠ देवनन्दिना मृगेऽपि स्त्रीलिङ्ग उक्तः॥

वातप्रम्यि' इति। तथा चात्रौणादिकभिन्नस्य वातप्रमीशब्दस्य द्वेधा निष्पत्तिरपि तु रूपाणि उभयत्र समान्येवेति भावः । एवं च स्वरादौ सर्वत्र यत्वं विधेयं, व्यञ्जनादौ तु केवलयोजनैवेति साधनिकाहृदयम् ॥

## ॥ अथ ङीप्रत्ययान्ताः शब्दाः ॥

### (२२५) ईकारान्तः स्त्रीलिङ्गः 'नदी' शब्दः ॥

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | नदी | नद्यौ | नद्यः |
| द्वि० | नदीम् | ,, | नदीः |
| तृ० | नद्या | नदीभ्याम् | नदीभिः |
| च० | नद्यै | ,, | नदीभ्यः |
| प० | नद्याः | ,, | ,, |
| ष० | ,, | नद्योः | नदीनाम् |
| स० | नद्याम् | ,, | नदीषु |
| सं० | हे नदि | हे नद्यौ | हे नद्यः |

एवम्-देवी, सरस्वती, भारती, वाणी, मही, पृथिवी, अवन्ती, प्रमुखाः ॥

साधनिका—'नदी+सि'="दीर्घङ्याब्व्यञ्जनात्सेः" [१, ४, ४५] इति सेर्लुकि 'नदी' इति ॥ 'नदी+औ'="इवर्णादे०" [१. २, २१] इतीकारस्य यत्वे 'नद्यौ' २ ॥ 'नदी'+जस् (अस्)'=पूर्ववद्यत्वे "सो रुः" [२,१,७२] इति सस्य रुत्वे (रेफादेशे), "रः पदान्ते विसर्गस्तयोः" [१, ३, ५३] इति रेफस्य विसर्गे च 'नद्यः' ॥ 'नदी+अम्'="लृदन्ताः समानाः" [१, १, ७] इतीकारस्य समानसंज्ञायाम् (समानत्वे), "समानादमोऽतः" [ १, ४, ४६ ] इति अमोऽकारस्य लुकि 'नदीम्' ॥ 'नदी+शस् (अस्)'="शसोऽता०" [१, ४, ४९] इतीकाराऽकारयोः ईकारे, सस्य रुत्वे विसर्गे च 'नदीः' ॥ 'नदी+टा (आ)'="इवर्णादे०" रिति यत्वे 'नद्या' ॥ 'नदी+ङे (ए), ङसि (अस्), ङस्

१ नदति श्रोतस्तरसा नदी । गौरादित्वात् ङीः ॥

(अस्), ङि (इ)'=अत्र "स्त्रीदूतः" [१, ४, २९] इति सूत्रेण ङेङसिङस्ङिस्थाने यथासङ्ख्यम् (क्रमशः) दै-दास्-दास्-दाम्' इत्यादेशा भवन्ति ( तेषु दकार इत्), तदनु "इवर्णादे०" रितीकारस्य यत्वे 'नद्यै' ( सस्य रुत्वे विसर्गे च ) 'नद्याः २, नद्याम्' इति ॥ 'नदी+आम्'="ह्रस्वापश्च" [१, ४, ३२] इत्यामो नामादेशे 'नदीनाम्'॥ 'नदी+ओस्' पूर्ववद्यत्वे सस्य रुत्वे विसर्गे च 'नद्योः' २ ॥ 'नदी+सुप् (सु)'="अनवर्णा नामी" [१, १, ६] इतीकारस्य नामिसंज्ञायां (नामित्वे), "नाम्यन्तस्था०" [२, ३, १५] इति सस्य षत्वे 'नदीषु'॥ सम्बोधनैकवचने 'नदी+सि' इति स्थिते "नित्यदिद्द्वि०" [१, ४, ४३] इतीकारस्य (सिना सह) ह्रस्वत्वे 'हे नदि!' इति ॥

## (२२६) ईकारान्तः स्त्रीलिङ्गः 'गौरी' शब्दः ॥

एतद्रूपाणि तत्साधनिका च 'नदी' ( २२५ ) वदपि तु षष्ठीबहुवचने 'गौरीणाम्' इति रूपम्, तत्र च "रष्टवर्णा०" [ २, ३, ६३ ] इति णत्वं विज्ञेयम् ॥

शब्दसाधनिका त्वियम्-गौरशब्दाद् "गौरादिभ्यो मुख्यान्ङीः' [२, ४, १९] इति ङी ( ई ) प्रत्ययः, तस्मिन् परस्मिन् " अस्य ङ्यां लुक् " [ २, ४, ८६ ] इत्यकारलुकि 'गौरी' इति । देवाङ्गना पार्वती च तदर्थः । गौरवर्णविशिष्टवाचित्वे तु विशेषणत्वात् त्रिष्वपि लिङ्गेषु गौरशब्दः, तस्य पुंस्त्वविवक्षायां 'वीर' (७५) वत्, नपुंसकत्वविवक्षायां 'चारित्र' (१५७) वद्रूपाणि साधनिका च बोध्या । स्त्रीत्वे तु उपर्युक्तवदेव

एवम्—अमरी, सुन्दरी, शबली, सारङ्गी, दासी, चेटी, भिक्षुकी, पुत्री, गायत्री, हयी, गवयी, प्रमुखानां गौरादिगणपठितानां शब्दानां रूपाणि साधनिका च स्वधिया ज्ञेया ॥

## (२२७) ईकारान्तः स्त्रीलिङ्गः 'द्विहायनी' शब्दः ॥

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् ॥

शब्दसाधनिका त्वियम्-द्वौ हायनौ वयोमानं यस्याः सा=द्विहायनी

गौः । अत्र द्विहायनशब्दाद् ⚘ वयसि गम्यमाने "सङ्ख्यादेर्हायनाद् वयसि" [२, ४, ९] इति ङीप्रत्ययः, तस्मिन् परे "अस्य ङ्यां लुक्" [२, ४, ८६] इत्यकारलुकि 'द्विहायनी' शब्दो भवति । पुँल्लिङ्गे-द्वौ हायनौ वयोमानं यस्य सः=द्विहायनः करभः, रूपाणि 'जिन' (७४) वत् । नपुंसकलिङ्गे तु-द्वौ हायनौ वयोमानं यस्य तद्—द्विहायनं बालकुलम्, रूपाणि 'दर्शन' ( १५६ ) वत् ॥

## (२२८) ईकारान्तः स्त्रीलिङ्गः 'त्रिहायणी' शब्दः ॥

**एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवं चतुर्हायणी ॥**

**शब्दसाधनिका त्वियम्**—त्रयो हायना वयोमानं यस्याः सा=**त्रिहायणी वडवा** । अत्र त्रिहायनशब्दात् "सङ्ख्यादेर्हायनाद्वयसि" [२, ४, ९] इति ङीप्रत्ययः, तस्मिन् परे "अस्य ङ्यां लुक्" [२, ४, ८६] इत्यकारलुकि "चतुस्त्रेर्हायनाद्वयसि"[२, ३, ७४] इति नस्य णत्वे '**त्रिहायणी**' शब्दः सिद्धति। एवं चत्वारो हायनाः यस्याः सा=**चतुर्हायणी** गौः ॥

| | | |
|---|---|---|
| **पुंसि**—त्रयो हायनाः यस्य सः=त्रिहायणो वत्सः | चत्वारो ,, ,, ,,=चतुर्हायणो ,, | 'जिन' (७४) वत् |
| **क्लीबे**—त्रयो ,, ,, तत्=त्रिहायणं बालकुलम् | चत्वारो ,, ,, ,,=चतुर्हायणं ,, | 'दर्शन' (१५६) वत् |

वयसोऽन्यत्र ङ्यभावः, तदभावाच्च णत्वस्याप्यभावः, यथा त्रिहायना चतुर्हायना शाला, 'दया' (२२५) वद्रूपाणि ॥

## (२२९) ईकारान्तस्तद्धितान्तः स्त्रीलिङ्गः 'औपगवी' शब्दः ॥

**एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवम्—तापसी, कुम्भकारी, काण्डलावी-प्रभृतयः ॥**

**शब्दसाधनिका त्वियम्**-उपगोरपत्यम्=स्त्री **औपगवी**, पुमान् **औपगवः** ॥ उपगुशब्दादपत्येऽर्थे "ङसोऽपत्ये" [६, १, २८] इति अण्, तस्मिन्

⚘ 'कालकृता प्राणिनां शरीरावस्था वयः'। वयसोऽन्यत्र ङ्यभावः । तथाहि-द्विहायना शाला इत्यादि, रूपाणि तु 'दया' (२२५) वदिति ॥

परे "अस्वयम्भुवोऽव्" [ ७, ४, ७० ] इत्युकारस्य 'अव्' इत्यादेशे "वृद्धिः स्वरे०" [ ७, ४, १ ] इत्याद्योकारस्यौकारे 'औपगव' शब्दः । अस्य पुंसि 'जिन' (७४) वद्रूपाणि, स्त्रीत्वविवक्षायां "अणञे०" [ २, ४, २० ] इति अण्लक्षणो ङीप्रत्ययः, तस्मिन् परे "अस्य ङ्यां लुक्" [२, ४, ८६] इति अकारस्य लुकि 'औपगवी' शब्दः ॥

तपोऽस्ति अस्याः=तापसी स्त्री
,, अस्य=तापसः पुमान्
,, ,,=तापसं कुलम्

तपः शब्दान्मत्वर्थे "ज्योत्स्नादिभ्योऽण्" [७, २, ३४] इत्यणि, आद्यस्वरवृद्धौ तापसशब्दः । अस्य पुंसि 'जिन' (७४) वत् क्लीबे 'दर्शन' (१५६) वद्रूपाणि । स्त्रियां तु अण्लक्षणे ङीप्रत्यये तापसी-शब्दः ॥

कुम्भं करोति=कुम्भकारी स्त्री
,, =कुम्भकारः पुमान्
,, =कुम्भकारं कुलम्

कर्मवाचकात् कुम्भशब्दात् कृग्धातोः "कर्मणोऽण्" [५, १, ७२] इत्यणि "नामिनोऽकलिहलेः" [४, ३ ५१] इति ऋकारस्य वृद्धौ कुम्भकारशब्दः । अस्य पुंसि 'वीर' (७५) वत्, क्लीबे 'चारित्र' (१५७) वद्रूपाणि । स्त्रियां तु–अण्लक्षणे ङीप्रत्यये 'कुम्भकारी' शब्दः ॥

काण्डान् लविष्यामीति काण्डलावी स्त्री
,, ,, =काण्डलावः पुमान्
,, ,, =काण्डलावं कुलम्
अत्रापि स्त्रियामण्लक्षणो ङीः ॥

अत्रापि "कर्मणोऽण्" [५, १, ७२] इत्यणि "नामिनो०" [४, ३, ५१] इत्यूकारस्य औकारे "ओदौतोऽवाव्" [१, २, २४] इत्यौकारस्य 'आव्' इत्यादेशे 'काण्डलाव' शब्दः सिद्ध्यति । रूपव्यवस्था उपर्युक्तवदेव ॥

## (२३०) ईकारान्तस्तद्धितान्तः स्त्रीलिङ्गः 'औत्सी' शब्दः ॥

### एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवं छात्री, चौरी, तापसी ॥

शब्दसाधनिका त्वियम्–उत्सस्याऽपत्यम्=स्त्री औत्सी, पुमान् औत्सः ॥ उत्सशब्दादपत्येऽर्थे "ङसोऽपत्ये" [६, १, २८] इति औत्सर्गिको योऽण्प्रत्ययः, तस्यापवादरूपो यः "अत इञ्" [६, १, ३१] इति इञ्प्रत्ययः, तस्य प्राप्ता-

वपि "उत्सादेरञ्" [६, १, १९] इति विशेषविधानादञेव भवति । किं तत्र प्रमाणमिति चेदुच्यते-अञ्विधायकसूत्रे 'प्रागुजितीयेऽर्थेऽनिदम्यणपवादे च'इत्यधिकार एव तत्र प्रमाणमिति ॥ अथ उत्स+अञ्' इति स्थिते "अवर्णेवर्णस्य" [७. ४, ६८] इत्यकारलुकि "वृद्धिः स्वरे०" [ ७, ४, १ ] इत्युकारस्यौकारे 'औत्स' शब्दः, अजन्तत्वादस्य पुंसि 'वेद' (८६) शब्दवद्रूपाणि साधनिका च । स्त्रीत्वविवक्षायां "अणञे०" [२, ४ १०] इति अञ्लक्षणे ङीप्रत्यये "अस्य ङ्यां लुक्" [२, ४, ८६] इति अकारस्य लुकि 'औत्सी' शब्दः ।

| | |
|---|---|
| छत्रं शीलमस्याः=छात्री बाला | तपः शीलमस्याः =तापसी स्त्री । |
| ,, शीलमस्य =छात्रः ✠कुमारः | ,, शीलमस्य =तापसः पुरुषः । |
| ,, ,, =छात्रं कुलम् | ,, ,, =तापसं कुलम् । |
| चुरा शीलमस्याः=चौरी स्त्री | अत्र छत्रचुरातपःशब्देभ्यः "अङ्गस्याच्छत्रादेरञ्" [ ६, ४, ६० ] इति अञ्प्रत्ययः ॥ |
| ,, शीलमस्य =चौरः पुरुषः | |
| ,, ,, =चौरं कुलम् | |

एतेषां रूपाणि पुंसि 'वीर' ( ७५ ) शब्दवत्, किन्तु तापसशब्दस्य 'जिन' (७४) वत्, क्लीबे 'चारित्र' (१५७) वत, किन्तु तापसशब्दस्य 'दर्शन' (१५६) वदवसेयानि । स्त्रीत्वविवक्षायां तु अञ्लक्षणो ङीर्भवतीति ॥

## (२३१) ईकारान्तः स्त्रीलिङ्गस्तद्धितान्तः 'सौपर्णेयी' शब्दः ।

( सुपर्ण्या अपत्यं स्त्री-सौपर्णेयी )

| वि० | एकव० | द्वि० | बहुव० |
|---|---|---|---|
| प्र० | सौपर्णेयी | सौपर्णेय्यौ | सौपर्णेय्यः |
| द्वि० | सौपर्णेयीम् | ,, | सौपर्णेयीः |
| तृ० | सौपर्णेय्या | सौपर्णेयीभ्याम् | सौपर्णेयीभिः |

✠ छत्रशब्देन गुरुकार्येष्ववहितस्य शिष्यस्य छत्रक्रियातुल्या गुरुच्छिद्राच्छादनाऽपायरक्षणादिका क्रियोच्यते उपचारात् । शिष्यो हि छत्रवद् गुरुच्छिद्रावरणादिप्रवृत्तश्छात्र इत्युच्यते । अभ्यासापेक्षाऽपि क्रिया शीलमित्युच्यते । यथा शीलिता विद्येति ॥

इत्थं 'नदी' (२२५) वद्रूपसाधनिका ज्ञेया। एवं **वैनतेयी, यौवतेयी, कामण्डलेयी**-त्यादयः ॥

अत्र सुपर्णीशब्दात् "ङ्याप्त्यूङः" [ ६, १, ७० ] इति एयण्, तदनु "अवर्णेवर्णस्य" [७, ४, ६८] इतीकारलुकि "वृद्धिः स्वरे०" [ ७, ४, १ ] इत्युकारस्यौकारे च '**सौपर्णेय**' शब्दः। अस्य पुंसि 'जिन' (७४) वद्रूपाणि। स्त्रियां तु "*अणञेये०" [२, ४, २०] इति एयणूलक्षणो ङीस्तदनु "अस्य ङ्यां लुक्" [२, ४, ८६] इत्यकारलुकि "**सौपर्णेयी**' इति ॥

एवं विनताया अपत्यं='**वैनतेयः**' पुमाँश्चेत्, स्त्री चेत् **वैनतेयी** ॥ युवतेरपत्यं=पुमान् **यौवतेयः**, स्त्री **यौवतेयी**। कमण्डल्वा अपत्यं=पुमान् **कामण्डलेयः**, स्त्री **कामण्डलेयी**-अत्र "अकण्डूपाण्ड्वोरुवर्णस्यैये" [७, ४, ६९] इत्यनेनान्त्यस्य ऊकारस्य लुगिति विशेषः। किञ्च "चतुष्पाद्भ्य एयञ्" [६, १, ८३] इति एयञ्प्रत्ययोऽपि भवतीति ॥

## (२३२) ईकारान्तः स्त्रीलिङ्गस्तद्धितान्तः 'शिलेयी' शब्दः।

### शिलायास्तुल्या=शिलेयी इष्टका ॥ एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत्।

अत्र शिलाशब्दात्तुल्येऽर्थे "शिलाया ×एयच्च" [ ७, १, ११३ ] इति एयच्प्रत्ययो भवति, तदनु "अवर्णेवर्णस्य" [७, ४, ६८] इत्याकारलुकि 'शिलेय' इति प्रकृतिः। पुंसि शिलायास्तुल्यः पुरुषः **शिलेयः** 'जिन' (७४) वत्। स्त्रियां "अणञेये०" [२, ४, २०] इति एयच्लक्षणो ङीर्जायते,

---

* 'निरनुबन्धग्रहणे सामान्येन'—ग्रहणमिति न्यायबलाद् एयग्रहणेन एयण्-एयच्-एयञ्प्रत्ययानां ग्रहणम् ॥

× अत्र चकारः "अणञेयेकण्०" [२, ४, २०] इति एयस्य सामान्य-ग्रहणाविघातार्थः। अन्यथा ह्रस्यैव स्यात्। अन्ये तु द्रव्यशब्दवदेयजन्तं स्त्रियां नास्तीत्याहुः ॥

तदनु "अस्य ङ्यां लुक्" [२,४,८६] इति अकारस्य लुकि 'शिलेयी' इष्टका क्लीबे च शिलायास्तुल्यं 'शिलेयम्' दधि, 'दर्शन' (१५६) वत् ॥

## (२३३) ईकारान्तः स्त्रीलिङ्गस्तद्धितान्तः 'शैलेयी' शब्दः ।

शिलायास्तुल्या 'शैलेयी' इष्टका । एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवं 'वास्तेयी' शब्दः ॥

अत्र शिलाशब्दात्तुल्येऽर्थे "शिलाया एयञ्च" [७, १, ११३] इति एयञ् प्रत्ययो भवति, तदनु "अवर्णे०" [ ७, ४, ६८ ] इत्याऽऽकारलुकि "वृद्धिः स्वरे०" [७, ४, १] इतीकारस्यैकारे च 'शैलेय' इति प्रकृतिर्भवति । पुंसि-शिलायास्तुल्यः पुरुषः शैलेयः, 'जिन' (७४) वत् । स्त्रियां-"अणञेये०" [ २, ४, २० ] इति एयञ् लक्षणो ङी 'क्लीबे' च शिलायास्तुल्यं=शैलेयं दधि 'दर्शन' (१५६) वत् ॥

एवं वस्तेस्तुल्या=वास्तेयी प्रणालिका । पुंसि वस्तेस्तुल्यः=वास्तेयः पन्थाः, 'जिन' (७४) वद्रूपाणि। क्लीबे च वस्तेस्तुल्यम्=वास्तेयं वर्त्म, 'दर्शन' (१५६) वद्रूपाणि । अत्र " वस्तेरेयञ् " [ ७, १, ११२ ] इति 'एयञ्' इति विशेषः ॥

## (२३४) ईकारान्तः स्त्रीलिङ्गस्तद्धितान्तः 'आक्षिकी' शब्दः ।

( अक्षैर्जिता, अक्षैर्जयति, अक्षैर्दीव्यति वा=आक्षिकी )

एतद्रूपाणि तत्साधनिका च 'नदी' ( २२५ ) वत् । एवं प्रास्थिकी ॥

अत्र तृतीयान्तात् अक्षशब्दात् जिते जयति दीव्यति चाऽर्थे " तेन जितजयद्दीव्यत्खनत्सु " [६, ४, २] इति 'इकण्' भवति, तदनु " अवर्णे०" [७, ४, ६८] इत्यन्त्येकारलुकि "वृद्धिः स्वरे०" [७,४,१] इत्यकारस्याऽऽकारे च 'आक्षिक' इति प्रकृतिः । पुंसि-अक्षैर्जितः, अक्षैर्जयति, अक्षैर्दीव्यति वा=

---

अत्र 'एय' इति निरनुबन्धनिर्देशः सामान्यग्रहणार्थस्तेन एयञ्प्रत्ययया-न्तादपि ङीर्भवतीति ॥

'आक्षिकः' पुमान् 'मोक्ष' (७६) वत्। स्त्रियाम्-"अणञेयेकण्०" [२, ४, २०] इति इकण्लक्षणो ङीस्तदनु "अस्य ङ्यां लुक्" [२, ४, ८५] इति अस्य लुकि 'आक्षिकी' इति। क्लीबे तु, अक्षै-र्जितं जयति दीव्यति वा=आक्षिकम्, 'चारित्र' (१५७) शब्दवत्।

एवं प्रस्थेन क्रीता=प्रास्थिकी। अत्र "मूल्यैः क्रीते" [६, ४, १५८] इति सूत्रेण इकण् इति विशेषः॥

## (२३५) ईकारान्तस्तद्धितान्तः स्त्रीलिङ्गः 'स्त्रैणी' शब्दः॥

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत्॥

शब्दसाधनिका त्वियम्—स्त्रिया अपत्यं=स्त्री स्त्रैणी, पुमान् स्त्रैणः। स्त्रीशब्दात् "प्राग्वतः स्त्रीपुंसान्नञ्स्नञ्" [६, १, २५] इति नञ्प्रत्ययः, अस्य ञित्वाद् "वृद्धिः स्वरे०" [७, ४, १] इत्याद्यस्वरवृद्धिः, नस्य च "रषृवर्णा०" [२, ३, ६३] इति णत्वे स्त्रैणशब्दः। अस्य पुंसि 'जिन' (७४) वद्रूपाणि। स्त्रीत्वविवक्षायां "अणञे०" [२, ४, २०] इति नञ्लक्षणो ङीप्रत्ययः, तस्मिन् परे "अस्य ङ्यां लुक्" [२, ४, ८६] इत्यकारलुकि स्त्रैणीशब्दः॥

## (२३६) ईकारान्तस्तद्धितान्तः स्त्रीलिङ्गः 'पौंस्नी' शब्दः॥

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत्॥

शब्दसाधनिका त्वियम्—पुंसोऽपत्यं=स्त्री पौंस्नी, पुमान् पौंस्नः॥ पुंस्शब्दात् "प्राग्वतः स्त्रीपुंसा०" [६, १, २५] इति स्नञ्प्रत्ययः, अस्य ञित्वाद् "वृद्धिः स्वरे०" [७, ४, १] इत्युकारस्यौकारे च 'पौंस्+स्न' इति जाते, ×अनुस्वाररूपव्यञ्जनात् परस्य सकारस्य "धुटो धुटि स्वे वा" [१, ३, ४८] इति वैकल्पिके लुकि एकसकारघटितं, लुगभावपक्षे च सकारद्वयघटितं यथाक्रमं 'पौंस्न, पौंस्स्न' इति शब्दस्वरूपम्, तत्रैकसकारघटितं प्रस्तुते समाश्रितमिति॥

× "कादिर्व्यञ्जनम्" [१, १, १०] इत्यत्र 'कस्य आदिः' कादिरिति व्युत्पत्त्या, अनुस्वारविसर्गयोरपि व्यञ्जनसंज्ञा विहिताऽस्तीति॥

## (२३७) ईकारान्तस्तद्धितान्तः स्त्रीलिङ्गः 'जानुदघ्नी' शब्दः ॥

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत्, एवं जानुद्वयसी, जानुमात्री, प्रस्थमात्री, पञ्चतयी, शाक्तीकी, ह्यस्तनी, अद्यतनी, श्वस्तनी, चिरन्तनी, परुत्तनी, भिक्षुचरी, सक्तुधानी, गायनी, कुरुचरी, आढ्यङ्करणी इत्यादयष्टिल्लक्षणङ्यन्ताः शब्दा बोध्याः ॥

### शब्दसाधनिका त्वियम्—

जानु ऊर्ध्वं ✠प्रमाणमस्याः=जानुदघ्नी खाता । एवं जानुद्वयसी, जानुमात्री च ॥
,, ,, प्रमाणमस्य=जानुदघ्नो गर्त्तः । एवं जानुद्वयसः, जानुमात्रश्च ॥
,, ,, ,, =जानुदघ्नं जलम् । एवं जानुद्वयसम्, जानुमात्रं च ॥
अत्र जानुशब्दात् "वोर्ध्वं दघ्नट् द्वयसट्" [७, १, १४२] इति टितौ दघ्नद्वयसौ प्रत्ययौ विकल्पेन भवतः, पक्षे "प्रमाणान्मात्रट्" [७, १, १४०] इति मात्रट्-प्रत्ययश्च ॥ स्त्रीत्वविवक्षायां "अणजे०" [२, ४, २०] इति टिल्लक्षणो ङीप्रत्ययः ॥

| | |
|---|---|
| प्रस्थो मानमस्याः स्यात्=प्रस्थमात्री अतसी ।<br>,, मानमस्य ,, =प्रस्थमात्रो धान्यराशिः ।<br>,, ,, ,, =प्रस्थमात्रं धान्यम् । | अत्र मानवाचिप्रस्थशब्दात् संशये "मात्रट्" [७, १, १४५] इति मात्रट्प्रत्ययः ॥ |
| पञ्च अवयवा यस्याः सा=पञ्चतयी करलता<br>,, ,, यस्य सः=पञ्चतयो यमः<br>,, ,, ,, तत्=पञ्चतयं करकमलम् | अत्र "अवयवात्तयट्" [७, १, १५१] इति टित्-तयप्रत्ययः । स्त्रियां टित्त्वात् ङीः ॥ |
| शक्तिः प्रहरणं यस्याः सा=शाक्तीकी<br>,, ,, यस्य सः=शाक्तीकः<br>,, ,, यस्य कुलस्य तत्=शाक्तीकम् | अत्र "शक्तियष्टेष्टीकण्" [६, ४, ६४] इति टित्-ईकण् भवति । स्त्रीत्वे टिल्लक्षणो ङीः ॥ एवं-याष्टीकी ॥ |

ह्यो भवा=ह्यस्तनी । अद्य भवा=अद्यतनी । श्वो भवा=श्वस्तनी । चिरे

✠ आयाममानं प्रमाणं, तद् द्विविधम्-ऊर्ध्वमानं तिर्यग्मानं च । तत्रोर्ध्वमानात् दघ्नट्द्वयसट्प्रत्ययौ वा स्याताम्, तेन पक्षे मात्रडपि । तिर्यग्मानात् मात्रडेव भवति, यथा । रज्जुमात्री भूमिः ॥

भवा=चिरन्तनी । परुद्भवा=परुत्तनी । एतेषु "सायंचिरंप्राह्णेप्रगेऽव्ययात्" [६, ३, ८८] इति टित्–तनप्रत्ययः, टित्वाच्च ङीरपि ॥

| | |
|---|---|
| भूतपूर्वा भिक्षुः=भिक्षुचरी<br>भूतपूर्वो भिक्षुः=भिक्षुचरः | पूर्वं भूतः भूतपूर्वः, तदर्थे वर्तमानान्नाम्नः "भूतपूर्वे पूचरट्" [७, २, ७८] इति प्चरट् । अत्र पकारटकारौ पुंवद्भावङी-प्रत्ययार्थौ ॥ |

सक्तु धीयते अस्याम् इति=सक्तुधानी । अत्र "करणाधारे" [५, ३, १२९] इति अनट्प्रत्ययः । टित्वाद् ङीः ॥

| | |
|---|---|
| गीतकलाकौशल्यवती या गायति सा=गायनी ।<br>गीतकलाकौशल्यवान् यो गायति सः=गायनः । | अत्र "टनण्" [५, १, ६७] इति टनण्प्रत्ययः । टित्वाद्ङीः ॥ |

कुरुषु चरतीति='कुरुचरी' स्त्री, कुरुचरः पुरुषः, कुरुचरं कुलम् । अत्र कुरु-शब्दात् 'चर भक्षणे च' इत्यस्माद्धातोः "चरेष्टः" [५, १, १३८] इति टे 'कुरुचर' इति । स्त्रियां टित्वात् ङ्यां 'कुरुचरी' इति ॥

अनाढ्य आढ्यः क्रियते अनया इति=आढ्यङ्करणी दानवृत्तिः ॥

,, ,, ,, अनेन ,, =आढ्यङ्करणः सुधर्मः ॥

,, ,, ,, ,, ,, =आढ्यङ्करणं दानम् ॥

अत्र "कृगः खनट् करणे" [५, १, १२९] इति खनट्प्रत्ययः, टित्वात् ङीः ॥

उपर्युक्तेषु शब्देषु पुंसि यथासम्भवं जिनवत् वीरवच्च, क्लीबे दर्शनचारित्रवच्च रूपाणि ॥

## (२३८) ईकारान्तः स्त्रीलिङ्गः 'कुमारी' शब्दः ॥

एतद्रूपाणि तत् साधनिका च 'नदी' (२२५) वदपि तु षष्ठीबहुवचने 'कुमारीणाम्' इति । अत्र "रषृवर्णा०" [२, ३, ६३] इति णत्वविशेषः ॥

एवम्—किशोरी, बर्करी, कलभी, तरुणी, तलुनी, वधूटी, चिरण्टी-प्रमुखाः प्रथमद्वितीयवयोवाचकाः *शब्दाः ॥

शब्दसाधनिका त्वियम्—कुमारशब्दात् स्त्रीत्वविवक्षायां "वयस्यनन्त्ये" [२, ४, २१] इति ङीर्भवति, तस्मिन् परे "अस्य ङ्यां लुक्" [२, ४, ८६] इति अकारस्य लुकि 'कुमारी' शब्दः ॥ कुमारशब्दस्य तु 'वीर' (७५) वद्रूपाणि ॥

*प्राणिनां कालकृता शरीरावस्था वयः, तत्र कलभीपर्यन्ताः प्रथमवयो-वाचिनः, तरुणीप्रभृतयो नवयौवनवयोवाचकाश्च ॥

## (२३९) ईकारान्तो *नामधातुरूपः 'कुमारी' शब्दः ॥

पुंलिङ्गे स्त्रीलिङ्गे च रूपसाम्यम्, तथा हि—

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | कुमारी | कुमार्यौ | कुमार्यः |
| द्वि० | कुमार्यम् | ,, | कुमार्यः |
| तृ० | कुमार्या | कुमारीभ्याम् | कुमारीभिः |
| च० | कुमार्यै | ,, | कुमारीभ्यः |
| पं० | कुमार्याः | ,, | ,, |
| ष० | ,, | कुमार्योः | कुमारीणाम् |
| स० | कुमार्याम् | ,, | कुमारीषु |
| सं० | हे कुमारि | हे कुमार्यौ | हे कुमार्यः |

एवम्-गौरी-नदी-वाणीप्रमुखा नामधातुरूपाः शब्दा बोध्याः ॥

**शब्दसाधनिका**—नामधातुरूपस्य कुमारीशब्दस्य साधने किल पञ्च प्रकारा भवन्ति । तद्यथा—

१. कुमारीमिच्छतीति इच्छायाम् "अमाव्ययात् क्यन् च" [३, ४, २३] इति क्यनि कुमारीयति; कुमारीयतीति卐"क्विप्" [५, १, १४८] इति क्विपि

---

* ननु कुमारीशब्दो धातुर्वा नाम वा? यदि धातुस्तर्हि नामत्वाभावात् स्याद्यनुत्पत्तिः; यदि नाम तदा धातुत्वाभाद् "योऽनेकस्वरस्य" [२, १, ५६] इत्याद्यप्रवृत्तिरिति चेत् ? सत्यम् । **'क्विबन्ता धातुत्वं नोज्झन्ति शब्दत्वं च प्रतिपद्यन्ते'** इति न्यायाद् धातुत्वं नामत्वं चाऽबाधितमेव । तथा च क्विप्प्रत्ययान्ताः शब्दाः धातुत्वनामत्वयोः कार्यं लभन्ते इति । एवं प्रत्येकनामधातुस्थले बोध्यम् ॥

卐 यद्यप्यनेन सूत्रेण नाम्नः पराद्धातोः क्विप् भवति, तथाप्यस्मिन्नेव सूत्रे बृहद्वृत्तौ 'क्वचिद्' ग्रहणात् केवलाद्धातोरपि क्विप् भवति । तथा चायं क्विप्प्रत्ययो धातोर्नामत्वसम्पादकस्तस्य च सर्वापहारी लोपो बोध्यः ॥

'कुमारी' । यथा 'कुमारी+अम्+१क्यन्+क्विप्' इति स्थिते "ऐकार्थ्ये" [३, २, ८] इति अम्लुपि "अतः" [४, ३, ८२] इति अकारलुकि "य्वोः प्वय्व्यञ्जने" [४, ४, १२१] इति यकारलुकि च कुमारीशब्दः सिद्ध्यतीति ॥

२. कुमारीमिवाऽऽचरतीति–उपमानभूताद् द्वितीयान्तादाचारार्थे "आधाराच्चोपमानादाचारे" [३, ४, २४] इति क्यनि कुमारीयति; अग्रे पूर्ववत् साध्यम् ॥

३ कुमारीवाऽऽचरतीति–उपमानभूताद् प्रथमान्तादाचारेऽर्थे "क्यङ्" [३, ४, २६] इति क्यङि कुमारीयते; ततः क्विपि 'कुमारी' इति । यथा 'कुमारी+सि+२क्यङ्+क्विप्' इति दशायाम् "ऐकार्थ्ये" [३, २, ८] इति सिलोपो विधेयः, तदनु प्राग्वत् साध्यम् ॥

४ कुमारीवाऽऽचरतीति कर्त्तुरुपमानादाचारेऽर्थे "कर्त्तुः क्विप् गल्भक्लीबहोडात्तु ङित्" [३, ४, २५] इति क्विपि कुमारीति धातुर्जातस्तस्य नामत्वसम्पादनकृते "क्विप्" [५, १, १४८] इति पुनः क्विपि 'कुमारी' इति शब्दस्वरूपं भवतीति ॥

५. यदा तु कुमारशब्दात् कुमारीशब्दः साध्यस्तदा पूर्ववत् क्यन्प्रत्यये जाते "क्यनि" [४, ३, ११२] इति सूत्रेण अकारस्थाने ईकारादेशे (पर्जन्यवल्लक्षणप्रवृत्तिरिति न्यायबलाद्) "दीर्घश्च्वियङ्यक्क्येषु" [४, ३, १०८] इति दीर्घत्वं विधेयं शेषं च प्राग्वत् साध्यमिति ॥

रूपसाधनिका त्वियम्—'कुमारी+सि (स्)'="दीर्घङ्याब्०" [१, ४, ४५] इति सेर्लुकि **कुमारी** ॥ 'कुमारी+औ२, जस् (अस्)'="योऽनेकस्वरस्य" [२, १, ५६] इतीकारस्थाने यकारादेशे **कुमार्यौ२ कुमार्यः** ॥ 'कुमारी+अम्'=अत्र "समानादमोऽतः" [१, ४, ४६] इत्यस्य 'कुमारी+शस् (अस्)'=अत्र "शसोऽता०" [१, ४, ४९] इत्यस्य च बाधं कृत्वा "योऽनेकस्वरस्य" [२, १, ५६] इतीस्थाने यत्वे **कुमार्यम्, कुमार्यः** ॥ 'कुमारी+टा (आ)'="योऽनेक०" इति यत्वे **कुमार्या** ॥ 'कुमारी+ङे (ए), ङसि ङस् (अस्),

१ अत्र ककारनकारौ इतौ ॥ २ अत्र कङौ इतौ ॥

ङि (इ)'="स्त्रीदूतः" [१, ४. २९] इति ङेङसिङस्ङिस्थाने क्रमेण दैदासदास्-दाम्-इति दिदादेशेषु सत्सु "योऽनेक०" इति यत्वे कुमार्यै, कुमार्याः २. कुमार्याम् । ननु "योऽनेकस्वरस्य" [२, १, ५६] इत्यस्य परत्वात् पूर्वं यकारादेशेन भाव्यम्, तदनु ईकारान्तत्वाभावाद् दिदादेशा न सिद्धेरन्-इति चेदुच्यते-'**परेणाऽपि इयुवयत्वादिना स्त्रीदूदाश्रितं कार्यं न बाध्यते**' इति न्यायबलात परादपि यत्वादेशात् प्रागेव दिदादेशा भविष्यन्तीति । न च तस्मिन् न्याये किं प्रमाणमिति वाच्यम्; "वेयुवोऽस्त्रियाः" [१, ४, ३०] इति सूत्रे 'अस्त्रियाः' इति निर्देशस्यैव प्रमाणत्वात । यदुक्तं श्रीसिद्धहेमबृहद्वृत्तौ—"अस्त्रिया इति निर्देशात् परादपि इयुवयत्वादिकार्यात्प्रागेव स्त्रीदूदाश्रितं कार्यं भवति"-इति, "कुमारीमिच्छतीति क्यन्नन्तात् कुमारीवाचरतीति क्विबन्ताद्वा कर्त्तरि क्विप् कुमारी तस्मै कुमार्यै ब्राह्मणाय ब्राह्मण्यै वा"-इति च ॥ न च प्रस्तुतकुमारीशब्दस्य कुमारीच्छाकर्तृकपुरुषविशेषस्य बोधकत्वात् स्त्रीत्वाभावेन कथम् "स्त्रीदूतः" [१, ४. २९] इत्यस्य प्राप्तिरिति वाच्यम्; "स्त्रीदूतः" इति सूत्रे गौणमुख्यान्यतरस्त्रीत्वबोधकशब्दस्य ग्रहणात् ॥ 'कुमारी+ओस्'२="योऽनेक०" इति यत्वे, सस्य रुत्वे विसर्गे च कुमार्योः२ ॥ 'कुमारी+आम्'="ह्रस्वापश्च" [१, ४, ३२] इति आमो नामादेशे "रषृवर्णा०" [२. ३, ६३] इति नस्य णत्वे कुमारीणाम् ॥ 'कुमारी+सुप् (सु)'="नाम्यन्तस्था०" [२, ३, १५] इति सस्य षत्वे **कुमारीषु** ॥ सम्बोधनैकवचने 'कुमारी+सि'="नित्यदिद्द्वि०" [१, ४, ४३] इतीकारस्य (सिना सह) ह्रस्वत्वे हे कुमारि ! इति ॥ तथा च स्वरादिषु सर्वप्रत्ययेषु "योऽनेक०" इत्यनेन यत्वं विधेयम्, शेषं च 'नदी' (२२५) वत्साध्यमिति साधनिकाहृदयम् ॥

॥ इति रूपसाधनिका ॥

## नपुंसकलिङ्गे

### नामधातुरूपस्य 'कुमारी' शब्दस्य "क्लीबे" [२, ४, ९७] इति

**ह्रस्वत्वे 'कुमारि' इति शब्दस्वरूपं भवति, तस्य रूपाणि, यथा—**

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० द्वि० | कुमारि | कुमारिणी | कुमारीणि |
| तृ० | कुमार्या, कुमारिणा | कुमारिभ्याम् | कुमारिभिः |
| च० | कुमार्यै, कुमारिणे | ,, | कुमारिभ्यः |
| प० | कुमार्याः, कुमारिणः | ,, | ,, |
| ष० | ,, ,, | कुमार्योः, कुमारिणोः | कुमारीणाम् |
| स० | कुमार्याम्, कुमारिणि | ,, ,, | कुमारिषु |
| सं० | हे कुमारे, हे कुमारि | हे कुमारिणी | हे कुमारीणि |

साधनिका—स्वरादौ टादौ "वान्यतः पुमांष्टादौ स्वरे" [१, ४, ६२] इति पुंवद्भावो वा भवति, तेन पुंवद्भावपक्षे ह्रस्वत्वक्लीबत्वाभावात् पुंवत् साध्यम् । अन्यच्च सर्वं 'वारि' (१७९) वत् साध्यमिति ॥

## अथ कुमारशब्दात् साधितस्य नामधातुस्वरूपस्य कुमारीशब्दस्य रूपाणि साधनिका च प्रदर्श्यते—

### पुंसि स्त्रियां च

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० | कुमारीः | कुमार्यौ | कुमार्यः |
| द्वि | कुमार्यम् | ,, | ,, |
| तृ० | कुमार्या | कुमारीभ्याम् | कुमारीभिः |
| च० | कुमार्ये | ,, | कुमारीभ्यः |
| प० | कुमार्यः | ,, | ,, |
| ष० | कुमार्यः | कुमार्योः | कुमार्याम् |
| स० | कुमार्यि | ,, | कुमारीषु |
| सं० | हे कुमारीः | हे कुमार्यौ | हे कुमार्यः |

साधनिका—सर्वाणि रूपाणि क्विबन्त 'वातप्रमी' (२२४) शब्दवद्भवन्ति, किन्तु साधनिकायां स्वरादौ प्रत्यये "योऽनेकस्वरस्य" [२, १, ५६]

इत्यनेन ईस्थाने सर्वापवादरूपो यकारादेशो विधेयः । ङित्सु तु गौणमुख्यो-भयरूपेण नित्यस्त्रीत्वाभावान्न दिदादेशाः ॥ प्रथमैकवचने ङ्यन्तत्वाभावान्न सेर्लोपः ॥ सम्बोधनैकवचने च नित्यदित्वाभावात् ह्रस्वत्वाभावः ॥

## नपुंसकलिङ्गे

### कुमारशब्दात् साधितस्य नामधातुरूपस्य कुमारीशब्दस्य रूपाणि-

| वि० | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्र० द्वि० | कुमारि | कुमारिणी | कुमारीणि |
| तृ० | कुमार्या, कुमारिणा | कुमारिभ्याम् | कुमारिभिः |
| च० | कुमार्ये, कुमारिणे | ,, | कुमारिभ्यः |
| प० | कुमार्यः कुमारिणः | ,, | ,, |
| ष० | ,, ,, | कुमार्योः, कुमारिणोः | कुमार्याम् |
| स० | कुमार्यि, कुमारिणि | ,, ,, | कुमारिषु |
| सं० | हे कुमारे. हे कुमारि | हे कुमारिणी | हे कुमारीणि |

साधनिका—'वारि' (१७९) वदपि तु स्वरादौ टादौ "वान्यत०" [१, ४, ६२] इति पुंवद्भावो वा भवति, तेन पुंवद्भावपक्षे ह्रस्वत्वक्लीबत्वाभावात् पुंवत् साध्यमिति ॥

### (२४८) ईकारान्तः स्त्रीलिङ्गः 'पञ्चपूली' शब्दः ॥

( पञ्चानां पूलानां ✽समाहारः=✽पञ्चपूली )

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवं पञ्चाजी-दशराजी-द्विवर्षीप्रमुखाः ॥

अत्र पञ्चपूलशब्दयोः समाहारद्विगौ "द्विगोः समाहारात्" [२, ४, २२] इति ङ्याम् "अस्य ङ्यां लुक्" [२, ४, ८६] इति अकारस्य लुकि 'पञ्च-पूली' इति ॥ अत्र "सङ्ख्यासमाहारे च द्विगुश्चानाम्न्ययम्" [३, १, ९९] इति समाहारविषये द्विगुः । एवमुत्तरत्राऽपि ॥

✽सङ्ग्रहणमेकीरणं समाहारः ॥

पञ्चानामजानां समाहारः=पञ्चाजी। दशानां राज्ञां समाहारः=दशराजी, दशराजम्। द्वयोर्वडवयोः समाहारः=द्विवडवी, द्विवडम्॥ अत्र पञ्चपूली-पञ्चाजीशब्दौ स्त्रीलिङ्गे एव, दशराजी-द्विवडवी-शब्दौ तु स्त्रियां नपुंसके च वर्त्तेते, यतः "पात्रादिवर्जितादन्तो-त्तरपदः समाहारे। द्विगुरन्नाबन्तान्तो वाऽन्यस्तु सर्वो नपुंसकः॥ १॥" इति लिङ्गानुशासनवचनात् 'पात्रादिवर्जि-तमकारान्तमुत्तरपदं यस्य स द्विगुः समाहारे स्त्रीलिङ्गो भवति। अन्नन्तमाबन्तं च यदुत्तरपदं तदन्तो द्विगुर्विकल्पेन स्त्रीलिङ्गो भवति, विकल्प पक्षे नपुंसक-लिङ्गः॥ नपुंसके 'दर्शन' (१५६) वद्रूपसाधनिका ज्ञेया॥

## (२४१) ईकारान्तः स्त्रीलिङ्गः 'द्विकुडवी' शब्दः॥

### ( द्वाभ्यां कुडवाभ्यां क्रीता=द्विकुडवी )

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत्। एवं त्रिकुडवी-द्व्याढकी-त्र्याढकीप्रमुखाः॥

शब्दसाधनिका त्वियम्-'द्वाभ्यां कुडवाभ्यां क्रीता' इत्यर्थे (द्विकुडव-शब्दात्) "मूल्यैः क्रीते" [६, ४, १५०] इति इकणि "अनाम्न्यद्विः प्लुप्" [६, ४, १४१] इति तल्लुपि फ्र "परिमाणात्तद्धितलुक्यबिस्ताचितकम्बल्यात्" [२, ४, २३] इति ङ्याम् "अस्य ङ्यां लुक्" [२, ४, ८६] इति अकारलुकि 'द्विकुडवी'॥ एवं त्रिकुडवी, द्व्याढकी, त्र्याढकी॥

| | |
|---|---|
| द्वाभ्यां कुडवाभ्यां क्रीतः=द्विकुडवः | 'जिन' (७४) वत्। |
| ,, ,, क्रीतम्=द्विकुडवम् | 'दर्शन' (१५६) वत्। |

| | |
|---|---|
| त्रिभिः कुडवैः क्रीतः=त्रिकुडवः<br>द्वाभ्यामाढकाभ्यां ,,=द्व्याढकः<br>त्रिभिराढकैः ,,=त्र्याढकः | 'जिन' (७४) वद्रूपाणि तत्साधनिका च॥ |

फ्र परितः सर्वतो मानं परिमाणम्। तच्च रूढिवशात् प्रस्थादि। यदाहुः—

"ऊर्ध्वमानं किलोन्मानं, परिमाणं तु सर्वतः।

आयामस्तु प्रमाणं स्यात्, सङ्ख्या बाह्या तु सर्वतः" ॥ १ ॥

आरोहपरिणाहाभ्यां मीयते परिच्छिद्यतेऽनेनेति परिमाणम्॥

| | |
|---|---|
| त्रिभिः कुडवैः क्रीता=त्रिकुडवी<br>द्वाभ्यामाढकाभ्यां ,, =द्व्याढकी<br>त्रिभिराढकैः ,, =त्र्याढकी | 'द्विकुडवी'वत्सर्वं ज्ञेयम् ॥ |
| त्रिभिः कुडवैः क्रीतम्=त्रिकुडवम्<br>द्वाभ्यामाढकाभ्यां ,, =द्व्याढकम्<br>त्रिभिराढकैः ,, =त्र्याढकम् | 'दर्शन' (१५६) वद्रूपाणि तत् साधनिका च ज्ञेया ॥ |

## (२४२) ईकारान्तः स्त्रीलिङ्गः 'द्विकाण्डी' शब्दः ॥

### ( द्वे काण्डे प्रमाणमस्याः=द्विकाण्डी रज्जुः )

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवं त्रिकाण्डीप्रभृतयः ॥

शब्दसाधनिका त्वियम्-द्वे काण्डे प्रमाणमस्या इत्यर्थे द्विकाण्डशब्दात् "प्रमाणान्मात्रट्" [७, १, १४०] इति मात्रट्, "द्विगोः संशये च" [७, १, १४४] इति मात्रड्लुपि + "काण्डात्प्रमाणादक्षेत्रे" [२, ४, २४] इति ङीर्भवति, तदनु "अस्य०" [२, ४, ८६] इत्यकारलुकि 'द्विकाण्डी' इति ॥ प्रमाणादन्यस्मिन्नर्थे आब्भवति, यथा-द्वाभ्यां काण्डाभ्यां क्रीता 'द्विकाण्डा' शाटी । अप्रमाणादपीच्छन्त्यन्ये, तन्मते 'द्विकाण्डी' शाटीत्येव भवति । 'द्विकाण्डा' इत्यस्य 'दया' (१६५) वद्रूपाणि ॥

| | |
|---|---|
| द्वे काण्डे प्रमाणमस्य='द्विकाण्डः' पटः | 'जिन' (७४) वत् । |
| ,, ,, ,, ='द्विकाण्डम्' काष्ठम् | 'दर्शन' (१५६) वत् ॥ |
| त्रीणि काण्डानि प्रमाणमस्य='त्रिकाण्डः' पटः | 'जिन' (७४) वत् ॥ |
| ,, ,, ,, ='त्रिकाण्डम्, काष्ठम् | 'दर्शन' (१५६) वत् ॥ |
| ,, ,, प्रमाणमस्याः='त्रिकाण्डी' शाटी | 'द्विकाण्डी' वत् ॥ |

## (२४३) ईकारान्तः स्त्रीलिङ्गः 'द्विपुरुषी' शब्दः ॥

### ( द्वौ पुरुषौ प्रमाणमस्याः=द्विपुरुषी-द्विपुरुषा परिखा )

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । पक्षे आपि 'दया' (१६५) वत् । एवं त्रिपुरुषीप्रभृतयः ॥

+ षोडशहस्तप्रमाणं काण्डम् । आयामः प्रमाणम् ।

शब्दसाधनिका त्वियम्-द्वौ पुरुषौ प्रमाणमस्या इत्यर्थे द्विपुरुषशब्दात् "हस्तिपुरुषाद्वाऽण्" [७, १, १४१] इति विकल्पेनाऽण्, पक्षे मात्रडपि, "द्विगोः संशये च" [७, १, १४४] इति तयोर्लुपि "पुरुषाद्वा" [२, ४, २५] इति ङीर्वा भवति; ङ्याम् "अस्य०" [२, ४, ८६] इत्यकारलुकि **'द्विपुरुषी'** ङ्यभावे आपि **'द्विपुरुषा'** इति ॥

| | | | |
|---|---|---|---|
| द्वौ पुरुषौ प्रमाणमस्य=द्विपुरुषो गर्त्तः | } | 'मोक्ष' (७६) | वद्रूपाणि । |
| ,, ,, ,, =द्विपुरुषं नदीजलम् | } | 'चारित्र' (१५७) | ,, । |
| त्रयः पुरुषाः ,, =त्रिपुरुषो गर्त्तः | } | 'मोक्ष' (७६) | ,, । |
| ,, ,, ,, =त्रिपुरुषं नदीजलम् | } | 'चारित्र' (१५७) | ,, । |

,, ,, प्रमाणमस्याः=**त्रिपुरुषी, त्रिपुरुषा** परिखा । 'द्विपुरुषी' वत् ॥

## (२४४) ईकारान्तः स्त्रीलिङ्गः 'रेवती' शब्दः ।

एतद्रूपाणि तत्साधनिका च 'नदी' (२८५) वत् । एवं रोहिणी ॥

शब्दसाधनिका त्वियम्-अत्र नक्षत्रवृत्तिरेवतरोहिणशब्दाभ्याम् "रेवतरोहिणाद्भे" [२, ४, २६] इति ङीर्भवतीति ॥

यदापि "चित्रारेवतीरोहिण्याः स्त्रियाम्" [६, ३, १०८] इति सूत्रेण "जाते" [६, ३, ९८] इति जातार्थीयस्याऽणो लुकि, "ङ्यादेर्गौणस्य०" [२, ४, ९५] इत्यनेन ङीप्रत्ययस्याऽपि लुग् भवति, तदापि नक्षत्रशब्दत्वात्पुनः "रेवत०" [२, ४, २६] इति ङीर्भवतीति **'रेवत्यां जाता रेवती, रोहिण्यां जाता रोहिणी'**ति सिद्धं भवति ॥

पुंसि-रेवत्यां जातः 'रैवतः' रोहिण्यां जातः 'रौहिणः' । अत्र "जाते" [६, ३, ९८] इति जातार्थेऽणि "अवर्णेवर्णस्य" [७, ६, ६८] इत्यन्त्याऽकारलुकि "वृद्धिः स्वरे०" [७, ४, १] इत्याद्यस्वरवृद्धौ च रैवतरौहिणशब्दौ सिध्यतः । एतद्रूपाणि तत्साधनिका च 'जिन' (७४) वत् ॥

नक्षत्रवृत्त्यभावे तु स्त्रियां 'रेवता, रोहिणा' इत्याबन्तौ ज्ञेयौ, रूपाणि च 'दया' (१८५) वत् ॥

## (२४५) ईकारान्तः स्त्रीलिङ्गः 'केवली' शब्दः ॥

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवम्-मामकी-भागधेयी-पापी-अपरी-समानी-आर्यकृती-सुमङ्गली-भेषजीत्यष्टौ शब्दाः ॥

**शब्दसाधनिका त्वियम्**-केवलादिशब्देभ्यः संज्ञायां "केवल-मामक-भागधेय-पापा-ऽपर-समानाऽऽर्यकृत-सुमङ्गल-भेषजात्" [२, ४, २९] इति ङ्यां "अस्य०" [२, ४, ८६] इति अकारलुकि **'केवली'** इत्यादयः सिध्यन्ति ॥

केवली=ज्योतिः । मामकी=मातुली । भागधेयी=बलिः । पापी=ओषधिः । अपरी=ओषधिः । समानी=छन्दः । आर्यकृती=क्रियाविशेषः । सुमङ्गली=छन्द ओषधिर्वा । भेषजी=ओषधिः ॥

संज्ञाविषयाभावे **'केवला'** इत्यादय आबन्ता विज्ञेयाः, रूपाणि च 'दया' (१६५) वत् ॥

## (२४६) ईकारान्तः स्त्रीलिङ्गः 'भाजी' शब्दः ॥

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवम्-गोणी-नागी-स्थली-कुण्डी-काली-कुशी-कामुकी-कटी-कबरी-ति नव शब्दाः ॥

**शब्दसाधनिका त्वियम्**—अत्र संज्ञायां भाजादिभ्यो दशभ्यो यथासंख्यं पक्वादिष्वर्थेषु "भाजगोण०" [२, ४, ३०] इति ङीः, "अस्य०" [२, ४, ८६] इत्यकारलुकि च **'भाजी'** इत्यादयः सिध्यन्ति ॥ ङ्यभावपक्षे आबन्ता इमे 'दया' (१६५) वद्विज्ञेयाः ॥

भाज्यते इति **भाजी** पक्वा चेत्, भाजाऽन्या । **गोणी** आवपनं चेत्, गोणाऽन्या । **नागी** स्थूला चेत्, नागाऽन्या । जातौ तु नाग्येव, तस्याः स्थौल्याभावात् । **स्थली** अकृत्रिमा चेत्, स्थलाऽन्या । **कुण्डी** अमत्रं चेत्, कुण्डाऽन्या । **काली** कृष्णा चेत्, कालाऽन्या । **कुशी** आयसी चेत्, कुशान्या । **कामुकी** रिरंसुश्चेत्, कामुकाऽन्या । **कटी** श्रोणी चेत्, कटाऽन्या । **कबरी** केशपाशश्चेत्, कबराऽन्या ॥

जानपदशब्दादपि वृत्ताविच्छत्यन्यः । तन्मते **जानपदी** वृत्तिः । वृत्तेरन्यत्र **'जानपदा'** मदिरा ॥

## (२४७) ईकारान्तः स्त्रीलिङ्गः 'चन्द्रभागी' शब्दः ॥

### एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् ।

**शब्दसाधनिका त्वियम्**—अत्र चन्द्रभागशब्दान्नद्यां "नवा शोणादेः" [२, ४, ३१] इति वैकल्पिको ङीर्भवतीति **'चन्द्रभागी'** ꣸चन्द्रभागा नाम नदी । नद्या अन्यत्र चन्द्रभागा नाम देवता ॥

**अनद्यामिति केचित्**—चन्द्रभागी चन्द्रभागा काचित, नद्यां तु चन्द्रभागा । अण्णन्तान्नद्यामित्येके–+चान्द्रभागी चान्द्रभागा नाम नदी । अनद्यां तु नित्यं ङीः–चान्द्रभागी छाया । अन्ये तु अण्णन्तादेवार्थभेदेन विकल्पमिच्छन्ति । नद्यामाप् प्रत्ययोऽन्यत्र ङीप्रत्ययः–**चान्द्रभागा नदी, चान्द्रभागी वनराजिः** ॥

## (२४८) ईकारान्तः स्त्रीलिङ्गः 'अतिकेशी' शब्दः ॥

### ( केशानतिक्रान्ता=अतिकेशी अतिकेशा माला )

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । पक्षे ङ्यभावे आपि 'दया' (१६५) वच्च । एवम्–**बहुकेशी**-**पृथुमुखी**प्रभृतयः ॥

**शब्दसाधनिका त्वियम्**—अत्र "असहनञ्विद्यमानपूर्वपदात् स्वाङ्गादक्रोडादिभ्यः" [२, ४, ३८] इति ङीर्वा भवति । अस्याऽयमर्थः—सहादिवर्जपूर्वपदं यत् स्वाङ्गं तदन्तात् क्रोडादिवर्जाददन्तान्नाम्नः स्त्रियां ङीर्वा भवतीति ॥

अत्राऽसहनञ्विद्यमानवर्जनात्—**सहकेशा, अकेशा, विद्यमानकेशा** इत्यत्राऽऽबेव भवति ॥ स्वाङ्गत्वाभावाद्–**बहुयवा** ॥ क्रोडादिवर्जनात्–कल्याणी क्रोडा अस्याः **कल्याणक्रोडा**, क्रोडशब्दः "क्रोडोङ्के तिन्दुकं फले" इति लिङ्गानुशासनवचनात् स्त्रीक्लीबलिङ्गः । तथा **कल्याणखुरा पीनगुदा एकशफा दीर्घबाला भव्यभाला सुगला सुभगा**; कल्याणी उखा स्फिक् यस्याः सा

꣸ चन्द्रभागयोः पर्वतयोरदूरभवा नद्यपि चन्द्रभागी ।

\+ चन्द्रभागाभ्यां गिरिभ्यां प्रभवतीत्यपि चान्द्रभागी ।

**कल्याणोखा, कल्याणगोखा**+ ॥ बहुवचनमाकृतिगणार्थम्, तेन **किशलयकरा मृणालभुजा**' इत्यादि ॥ आदित्येव-**परमशिखा** ॥

स्वाङ्गलक्षणं चेदम्—I"**अविकारोऽ**II**द्रवं** III**मूर्त्तं, प्राणिस्थं स्वाङ्गमुच्यते ।**
IV**च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु**" ॥१॥

अविकारत्वाभावात्—**बहुशोफा** ॥ अद्रवत्वाभावात्–**बहुकफा** । मूर्त्तत्वाभावात्–**बहुज्ञाना** । प्राणिस्थत्वाभावाद्–**दीर्घमुखा** शाला ॥

च्युतं च प्राणिनस्तदिति वचनाद्–अप्राणिस्थादपि पूर्वोक्तस्वाङ्गाद्भवति, यथा बहवः केशा यस्यां सा '**बहुकेशी बहुकेशा**' रथ्या ॥

तन्निभं च प्रतिमादिष्विति वचनात्–प्राणिस्थसदृशादपि पूर्वोक्तस्वाङ्गाद्भवति, यथा पृथु मुखमस्याः '**पृथुमुखी पृथुमुखा**' प्रतिमा ॥

कथं कल्याणं पाणिपादमस्याः '**कल्याणपाणिपादा**' इत्यत्र न भवति? स्वाङ्गसमुदायो हि न स्वाङ्गम्; बहुस्वरत्वेन 'नासिकोदराभ्यामेव बहुस्वराभ्याम्, ओष्ठादिभ्य एव च संयोगोपान्त्येभ्यो भवति, नान्येभ्य' इति नियमबलाद्वा न भवतीति ॥

'**द्विपादी त्रिपादी**'त्यत्र तु "द्विगोः समाहारात्" [२, ४, २२] इति विशेषविधानान्नित्यमेव ङीर्भवति ॥

अस्वाङ्गपूर्वपदादेवेच्छन्त्यन्ये–पाणी एव पादौ यस्याः सा '**पाणिपादा**', मुखमेव नासिका यस्याः सा '**मुखनासिका**' ॥

---

+ उखाशब्दसान्निध्यात् स्त्रीत्वं ज्ञायते, गौरिव खमिन्द्रियं यस्याः सा गोखा; कल्याणा गोखा यस्या इति । अवयवविशेषो जघनरूपः ॥

I विकारो वातादिजन्मशोफादिस्तदभावोऽविकारः ॥

II द्रवणं द्रवो, न द्रवोऽस्येत्यद्रवम् । द्रवतीति द्रवं, न द्रवमद्रवं वा ॥

III रूपादियोगो मूर्त्तिः, असर्वगतद्रव्यपरिमाणं वा । तद्योगान्मूर्त्तं पुद्गलद्रव्यम् ॥

IV अपरं लक्षणद्वयमुच्यते । तदविकारादिलक्षणयुक्तं प्राणिनश्च्युतमपि स्वाङ्गं भवतीति ॥

| | | | | | |
|---|---|---|---|---|---|
| पुंसि—अतिकेशो मार्गः | } | जिन (७४) वत् । | क्लीबे—अतिकेशं गृहाङ्गणम् | } | दर्शन(७४) वत् । |
| बहुकेशः पन्थाः | | | बहुकेशं भूशकलम् | | |
| पृथुमुखो बालः | | | पृथुमुखं बिम्बम् | | |

## (२४९) ईकारान्तः स्त्रीलिङ्गः 'तुङ्गनासिकी' शब्दः ॥
### ( तुङ्गा नासिका यस्याः सा 'तुङ्गनासिकी' )

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत्। एवं कृशोदरी-बिम्बोष्ठी-दीर्घजङ्घी-समदन्ती-चारुकर्णी-तीक्ष्णश्रृङ्गी-मृद्वङ्गी-सुगात्री-स्निग्धकण्ठी च ॥

**शब्दसाधनिका त्वियम्**—अत्र "नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाङ्गगात्र-कण्ठात्" [२, ४, ३९] इति सहादिवर्जपूर्वपदेभ्य एभ्यो नासिकादिशब्देभ्यो ङीर्वा भवति । ङ्यभावे चाऽऽप् भवति । आपि च 'दया' (१६५) वद्रूपाणि भवन्ति ॥

| | | |
|---|---|---|
| तुङ्गा नासिकाऽस्य=तुङ्गनासिकः पुरुषः | } | 'जिन' (७४) वद्रूपाणि । |
| ,, ,, =तुङ्गनासिकं कुलम् | | 'दर्शन' (१५६) ,, । |

| | | |
|---|---|---|
| कृशमुदरमस्याः='कृशोदरी' कृशोदरा । | } | कृशमुदरमस्य=कृशोदरः पुमान्, कृशोदरं कुलम् । एवं शेषेषु शब्देषु पुंसि क्लीबे च स्वधियावसेयम् । रूपाणि तु पुंसि यथासम्भवं 'जिन' (७४) वत् 'वीर' (७५) वच्च, क्लीबेऽपि यथाप्राप्तं 'दर्शन' (१५६) वत्, 'चारित्र' (१५७) वच्च ॥ |
| बिम्बवदोष्ठावस्याः='बिम्बोष्ठी' बिम्बोष्ठा । | | |
| दीर्घे जङ्घे अस्याः=दीर्घजङ्घी दीर्घजङ्घा । | | |
| समा दन्ता ,, =समदन्ती समदन्ता । | | |
| चारू कर्णौ ,, =चारुकर्णी चारुकर्णा । | | |
| तीक्ष्णे श्रृङ्गे ,, =तीक्ष्णश्रृङ्गी तीक्ष्णश्रृङ्गा । | | |
| मृद्वङ्गमस्याः=मृद्वङ्गी मृद्वङ्गा । | | |
| सुष्ठु गात्राण्यस्याः=सुगात्री सुगात्रा । | | |
| स्निग्धः कण्ठोऽस्याः=स्निग्धकण्ठी-स्निग्धकण्ठा। | | |

'तुङ्गनासिकी दीर्घजङ्घी' इत्यत्र 'गोश्चान्ते ह्रस्वो०" [२, ४, ९६] इति ह्रस्वत्वं विहाय ङीर्विधेयः ॥

'बिम्बोष्ठी' इत्यत्र "वौष्ठौतौ समासे" [१, २, १७] इत्यनेन बिम्बशब्दस्थाऽकारस्य लुग्वा भवतीति 'बिम्बोष्ठी बिम्बौष्ठी'ति ॥

अङ्गगात्रकण्ठेभ्यो ङीप्रत्ययं नेच्छन्त्यन्ये । केचित्तु दीर्घजिह्वशब्दादपीच्छन्तीति । तन्मते दीर्घजिह्वी दीर्घजिह्वा कन्येति ॥

## (२५०) ईकारान्तः स्त्रीलिङ्गः 'शूर्पनखी' शब्दः ॥

### ( शूर्प इव नखा अस्याः=शूर्पनखी शूर्पनखा )

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवम्—अतिनखी-चन्द्रमुखी-अतिमुखी-प्रमुखाः ॥

**शब्दसाधनिका त्वियम्**—अत्राऽसंज्ञायां सहादिवर्जपूर्वपदाभ्यां नख-मुखाभ्यां "नखमुखादनाम्नि" [२, ४, ४०] इति ङीर्वा भवति । ङ्यां **शूर्पनखी,** ङ्यभावे आपि **शूर्पनखा** इति। आबन्तस्य रूपाणि 'दया' (१५६) वत् ॥

शूर्पवन्नखा अस्य=**शूर्पनखः** कश्चित्पुमान्, **शूर्पनखं** कुलम् । रूपाणि पुंसि 'जिन' (७४) वत्, क्लीबे 'दर्शन' (१५६) वच्च ॥

| | |
|---|---|
| नखानतिक्रान्ता=**अतिनखी**, अतिनखा<br>अतिशयिता नखा अस्याः= ,, ,,<br>चन्द्रवन्मुखमस्याः=**चन्द्रमुखी**, चन्द्रमुखा<br>अतिशयितं मुखमस्याः=**अतिमुखी**, अतिमुखा<br>मुखमतिक्रान्ता= ,, ,, | नखानतिक्रान्तोऽ**तिनखः** पुमान् । **अतिनखं** कुलम् । एवं शेषयोरपि ॥ पुंसि 'जिन' (७४) वत्, क्लीबे 'दर्शन' (१५६) वच्च रूपाणि ॥ |

संज्ञाविषये तु आबेव नस्य णत्वं च, यथा-**शूर्पणखा** (रावणस्य भगिनी) अत्र "पूर्वपदस्थान्नाम्न्यगः" [२, ३, ६४] इति नस्य णत्वं भवतीति ॥

## (२५१) ईकारान्तः स्त्रीलिङ्गः 'दीर्घपुच्छी' शब्दः ॥

### ( दीर्घं पुच्छमस्याः=दीर्घपुच्छी दीर्घपुच्छा वानरी )

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवं **सुपुच्छी-अतिपुच्छी**प्रभृतयः ॥

**शब्दसाधनिका त्वियम्**-अत्र सहादिवर्जपूर्वपदात् पुच्छशब्दात् "पुच्छात्" [२, ४, ४१] इति ङीर्वा भवति । ङ्यां **दीर्घपुच्छी**-ङ्यभावे आपि **दीर्घपुच्छा** इति । आबन्तस्य 'दया' (१६५) वद्रूपाणि ॥

दीर्घं पुच्छमस्य=दीर्घपुच्छो वानरः, दीर्घपुच्छं वानरकुलम् । रूपाणि पुंसि 'जिन' (७४) वत्, क्लीबे 'दर्शन' (१५६) वच्च ॥

| | |
|---|---|
| सुन्दरं पुच्छमस्याः=सुपुच्छी, सुपुच्छा<br>अतिशयितं पुच्छमस्याः=अतिपुच्छी, अतिपुच्छा<br>पुच्छमतिक्रान्ता= ,, ,, | सुन्दरं पुच्छमस्य=सुपुच्छः सिंहः। सुपुच्छं सिंहकुलम्। रूपाणि पूर्ववत्। एवमुत्तरत्राऽपि ॥ |

## (२५२) ईकारान्तः स्त्रीलिङ्गः 'कबरपुच्छी' शब्दः ॥

### (कबरं कर्बुरं कुटिलं वा पुच्छमस्याः=कबरपुच्छी)

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत्। एवं मणीपुच्छी विषपुच्छी-शरपुच्छीति त्रयः शब्दाः ॥

**शब्दसाधनिका त्वियम्**—अत्र कबरादिपूर्वात् पुच्छात् "कबरमणिविषशरादेः" [२, ४, ४२] इति ङीर्भवतीति ॥

| | |
|---|---|
| मणिः पुच्छे अस्याः=मणिपुच्छी<br>विषं ,, ,, =विषपुच्छी<br>शरं ,, ,, =शरपुच्छी | मणिः पुच्छे अस्य=मणिपुच्छः, मणिपुच्छम्। एवमुत्तरत्राऽपि। पुंसि 'जिन' (७४) वत्, क्लीबे 'दर्शन' (१५६) वच्च रूपाणि ॥ |

"न सप्तमीन्द्वादिभ्यश्च" [३. १. १५५] इत्यनेन मणिपुच्छीत्यादिषु मण्यादिशब्दानां पूर्वनिपातः ॥

## (२५३) ईकारान्तः स्त्रीलिङ्गः 'उलूकपक्षी' शब्दः ॥

### (+उलूकस्येव पक्षावस्याः=उलूकपक्षी शाला)

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत्। एवम्-उलूकपुच्छी।

**शब्दसाधनिका त्वियम्**—उपमानपूर्वात्पक्षात्पुच्छाच्च "पक्षाच्चोपमादेः" (२, ४, ४३) इति स्त्रियां ङीर्भवतीति ॥
उलूकस्येव पुच्छमस्याः=उलूकपुच्छी सेना ॥

| | |
|---|---|
| ,, पुच्छमस्य=उलूकपुच्छः<br>,, ,, =उलूकपुच्छम्<br>,, पक्षावस्य=उलूकपक्षः<br>,, ,, =उलूकपक्षम् | पुंसि 'जिन' (७४) वत्, क्लीबे 'दर्शन' (१५६) वच्च रूपाणि। |

+अत्र उलूकशब्द उलूकपक्षे उलूकपुच्छे च वर्तते। यथोष्ट्रमुखे उष्ट्रशब्दः, अतश्चोलूकशब्द उपमानं भवतीत्युलूक इव पक्षावस्या इत्यादिविग्रहः। उलूकस्येव पक्षावित्यादि त्वर्थकथनमिति लघुन्यासकाराः ॥

## (२५४) ईकारान्तः स्त्रीलिङ्गः 'अश्वक्रीती' शब्दः ॥

( अश्वेन क्रीयते स्म=अश्वक्रीती )

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत्। एवं धनक्रीती-वस्त्रक्रीती-मनसाक्रीती ।

**शब्दसाधनिका त्वियम्**-अत्र करणादेः क्रीतान्तादद्न्तात् "क्रीतात् करणादेः" [२, ४, ४४] इति ङीर्भवतीति ॥

धनेन क्रीयते स्म=धनक्रीती । धनक्रीतः पुमान् । धनक्रीतं कुलम् ।
वस्त्रेण ,, ,,=वस्त्रक्रीती स्त्री । वस्त्रक्रीतः ,, । वस्त्रक्रीतं ,, ।
अश्वेन ,, ,,=अश्वक्रीतः पुमान् । अश्वक्रीतम् कुलम् । एतेषां पुंसि 'जिन' (७४) वत्, क्लीबे 'दर्शन' (१५६) वच्च रूपाणि ॥

| | |
|---|---|
| मनसा क्रीयते स्म=मनसाक्रीती<br>,, ,, ,,=मनसाक्रीतः<br>,, ,, ,,=मनसाक्रीतम् | विभक्त्युत्पत्तेः पूर्वमेव कृदन्तेन समासः ॥ "नाम्नि" (३. २. १६) इति संज्ञाविषये विभक्तेरलुप् च ॥ संज्ञाया अभावे तु 'मनःक्रीती' इति ॥ |

+केचित्तु धनेन क्रीतेत्यत्राबन्तेनाऽपि समासमिच्छन्ति, बहुलाधिकारात्; तदाऽकारान्तत्वाभावाद् ङीर्नभवति । धनक्रीता । रूपाणि 'दया' (१६५) वत् ॥

## (२५५) ईकारान्तः स्त्रीलिङ्गः 'अभ्रविलिप्ती' शब्दः ॥

( *अभ्रैर्विलिप्यते स्म='अभ्रविलिप्ती' द्यौः )

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवं सूपविलिप्ती प्रमुखाः ॥

**शब्दसाधनिका त्वियम्**—अत्र क्तान्तात्करणादेरल्पेऽर्थे "क्तादल्पे" [२, ४, ४५] इति ङीर्भवतीति 'अभ्रविलिप्ती' द्यौः । अल्पाऽभ्रा इत्यर्थः ॥
* सूपैर्विलिप्यते स्म=सूपविलिप्ती स्थाली । अल्पसुपेत्यर्थः ॥

---

+ केचित्त्विति । तन्मतेऽपि प्रत्ययोत्पत्तेः प्रागिति समासो बहुलाधिकाराल्लभ्यते । मन्मतेऽपि बहुलाधिकाराश्रयणे तथैवेति लघुन्यासकाराः ॥

*अत्राऽल्पाऽर्थस्य गम्यमानत्वादल्पशब्दस्याऽप्रयोग इति ॥

| | | |
|---|---|---|
| सूपैर्विलिप्यते स्म ,,=सूपविलिप्तः | | पुंसि 'जिन' (७४) वत्, क्लीबे 'दर्शन' (१५६) वच्च रूपाणि ॥ |
| ,, ,, ,,=सूपविलिप्तम् | | |
| अभ्रै- ,, ,,=अभ्रविलिप्तः | | |
| ,, ,, ,,=अभ्रविलिप्तम् | | |

अनल्पेऽर्थे तु आऽभवति । यथा-अनल्पेन चन्दनेन लिप्ता=चन्दनानुलिप्ता स्त्री । रूपाणि तु 'दया' (१६५) वत् ॥

## (२५६) ईकारान्तः स्त्रीलिङ्गः 'शङ्खभिन्नी' शब्दः ॥

### ( शङ्खौ भिन्नावस्याः=शङ्खभिन्नी )

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवम् ऊरुभिन्नी-केशविलूनी-गलककृत्तीप्रभृतयः ॥

शब्दसाधनिका त्वियम्—स्वाङ्गादेः कृतादिवर्जितात् क्तान्ताद्बहुव्रीहेः "स्वाङ्गादेरकृतमितजातप्रतिपन्नाद्बहुव्रीहेः" [२, ४, ४६] इति स्त्रियां ङीर्भवतीति ॥ शङ्खौ भिन्नावस्य=शङ्खभिन्नः । शङ्खभिन्नम् ॥

| | |
|---|---|
| ऊरू भिन्नावस्याः =ऊरुभिन्नी । | ऊरू भिन्नावस्य=ऊरुभिन्नः ऊरुभिन्नम् । |
| केशा विलूना अस्याः=केशविलूनी | एवमुत्तरत्रापि । पुंसि 'जिन' (७४) वत्, |
| गलकं कृत्तमस्याः =गलककृत्ती । | क्लीबे 'दर्शन' (१५६) वच्च रूपाणि ॥ |

न चात्र क्तान्तत्वात् "क्तः" [३, १, १५१] इति क्तान्तस्य प्राग्निपातः स्यादिति वाच्यम्, "जातिकालसुखादेर्नवा" [३, १, १५२] इति क्तान्तस्य प्राग्निपातविकल्पनात् । तथा च शङ्खादेः प्राग्निपातः सुघटः ॥

## (२५७) ईकारान्तः स्त्रीलिङ्गः 'शाङ्गरजग्धी' शब्दः ॥

### ( शाङ्गरो जग्धोऽनया=शाङ्गरजग्धी, शाङ्गरजग्धा )

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवं पलाण्डुभक्षिती ॥

शब्दसाधनिका त्वियम्—अत्राच्छादवर्जिता या जातिस्तदादेः कृतादिवर्जितक्तान्ताद्बहुव्रीहेः "अनाच्छादजात्यादेर्नवा" [२, ४, ४७] इति ङीर्वा भवतीति ॥ ङ्यभावे आपि 'दया' (१६५) वद्रूपाणि ॥

शाङ्गरो जग्धोऽनेन=शाङ्गरजग्धः । शाङ्गरजग्धम् ॥ शाङ्गरो जग्धोऽनया

=शाङ्गरजग्धी, शाङ्गरजग्धा, जग्धशाङ्गरा । अत्र "जातिकाल०" [३, १, १५२] इति क्तान्तजग्धस्य विकल्पेन पूर्वनिपातः ॥

पलाण्डुर्भक्षितोऽनया=पलाण्डुभक्षिती, पलाण्डुभक्षिता ॥ पलाण्डुर्भक्षितोऽनेन=पलाण्डुभक्षितः । पलाण्डुभक्षितम् । पुंसि 'जिन' (७४) वत्, क्लीबे 'दर्शन' (१५६) वच्च रूपाणि ॥

## (२५८) ईकारान्तः स्त्रीलिङ्गः 'सपत्नी' शब्दः ॥

### ( समानः पतिरस्याः, समानस्य पतिरिति वा=सपत्नी )

एतद्रूपाणि तत् साधनिका च 'नदी' (२२५) वत् । एवम्-एकपत्नी वीरपत्नी, पिण्डपत्नी, भ्रातृपत्नी, पुत्रपत्नी च । षडेते सपत्न्यादयः ॥

शब्दसाधनिका त्वियम्—"सपत्न्यादौ" [२, ४, ५०] इत्यनेन सपत्न्यादौ यः पतिशब्दस्तस्मात् स्त्रियां ङीर्भवति, नकारश्चान्तादेशः । समुदायनिपातनं समानस्य +सभावार्थम्, "परतः स्त्री पुम्वत् स्त्र्येकार्थेऽनूङ्" [३, २, ४९] इति, "जातिश्च णि-तद्धितयस्वरे" [३, २, ५१] इति च प्राप्तस्य पुम्वद्भावस्य प्रतिषेधार्थं च ॥ सपत्नीभार्यः । सपत्न्या अयं सापत्नः ॥

समानः पतिरधिपो यस्य, समानस्य पतिरधिपोऽधिपं वा=सपतिः पुमान्, सपति कुलम् ॥

| | | | | |
|---|---|---|---|---|
| एकः पतिरस्याः, | एकस्य पतिर्वा=एकपत्नी स्त्री | | | एतेषां भिन्नभिन्नलिङ्गे सम्भाव्यमाना अन्ये विग्रहास्तद्रूपाणि च 'कन्यापति' (१८५) शब्दादवसेयानि ॥ |
| वीरः ,, | वीरस्य | ,, | =वीरपत्नी ,, | |
| पिण्डः ,, | पिण्डस्य | ,, | =पिण्डपत्नी ,, | |
| भ्राता ,, | भ्रातुः | ,, | =भ्रातृपत्नी ,, | |
| पुत्रः ,, | पुत्रस्य | ,, | =पुत्रपत्नी ,, | |

## (२५९) ईकारान्तः स्त्रीलिङ्गः 'पाणीगृहीती' शब्दः ॥

### ( पाणिर्गृहीतोऽस्याः, पाणौ वा गृहीता=पाणिगृहीती )

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवम्-करगृहीती-पाण्यात्ती-करात्तीप्रभृतयः ॥

---

+धर्मादिषु पत्नीशब्दस्याऽपाठादित्यर्थः ॥

शब्दसाधनिका त्वियम्—अत्र "पाणिगृहीतीति"卐 [ २, ४, ५१ ] इति सूत्रेण पाणिगृहीतीप्रकाराः शब्दा ऊढायां स्त्रियां ङ्यन्ताः निपात्यन्ते ॥

करो गृहीतोऽस्याः, करौ वा गृहीता=करगृहीती ॥

पाणिरात्तोऽस्याः, पाणौ वाऽऽत्ता=पाण्यात्ती ॥

कर आत्तोऽस्याः, करौ ,, =करात्ती ॥

ऊढाया अन्यस्मिन्नर्थे आबेव, यथा-यस्या यथाकथञ्चित् पाणिर्गृह्यते सा=पाणिगृहीता । बहुव्रीहावेवेच्छन्त्यन्ये ॥

## (२६०) ईकारान्तः स्त्रीलिङ्गः 'पतीवत्नी' शब्दः ॥

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवम्-अन्तर्वत्नी ॥

शब्दसाधनिका त्वियम्—अत्र "पतिवत्न्यन्तर्वत्न्यौ भार्यागर्भिण्योः" [ २, ४, ५३ ] इत्येतौ निपात्येते । अस्यायमर्थः-भार्याऽविधवा स्त्री, तस्यामभिधेयायां पतिमच्छब्दान्ङीरस्य च पतिवत्नादेशः; तथा गर्भिण्यां स्त्रियामभिधेयायामन्तर्वच्छब्दान्ङीरस्य चाऽन्तर्वत्नादेशो निपात्यते ।

अत्र च "तदस्याऽस्त्यस्मिन्निति मतुः" [७, २, १] इत्यत्र तदिति प्रथमान्तात् मतुप्रत्ययविधानात्तस्याऽप्राप्तेर्निपातनादेव चाऽधिकरणप्रधानादप्यन्तः-शब्दान्मत्वर्थीयो मतुर्भवतीति ॥

## (२६१) ईकारान्तः स्त्रीलिङ्गः 'कुक्कुटी' शब्दः ॥ (जातिवाचकः)

एतद्रूपाणि तत्साधनिका च 'नदी' (२२५) वत् । एवम्-सूकरी-तटी-पात्री-ब्राह्मणी-वृषभी-नाडायनी-चारायणी-कठी-बह्वृचीप्रभृतयो जातिवाचकाः शब्दाः ॥

शब्दसाधनिका त्वियम्—अत्र "जातेरयान्तनित्यस्त्रीशूद्रात्" [२, ४, ५४] इति ×जातिवाचिनोऽदन्तान्नाम्नः स्त्रियां ङीर्भवति, न तु यान्त-नित्यस्त्री-शूद्रात् ॥

卐 अत्र 'इति' शब्दः प्रकारार्थः ॥

×जातिः सामान्यमभिन्नबुद्धिध्वनिप्रसवनिबन्धनमर्थः, तत्र च कार्याऽसम्भवात्तद्वाचिनो ग्रहणमित्याह जातिवाचिन इति ॥

## ॥ अथ जातिनिरूपणम् ॥

### जातिशब्देन किं ग्राह्यमित्याकाङ्क्षायां प्रतिवचनम्—

जातिशब्दस्य सामान्यमभिन्नबुद्धिध्वनिप्रसवनिबन्धनमर्थः,[बुद्धिः=ज्ञानम्, ध्वनिः=शब्दप्रयोगः, प्रसवः=जननम्; अभिन्ना=समाना ये बुद्धिध्वनिप्रसवास्तेषां निबन्धनम्=कारणं, यत् सामान्यम्=अनुगतस्वरूपं तत् जातिशब्दस्यार्थः] तत्र प्रत्ययविधानादिरूपकार्याऽसम्भवात्, जातिशब्देन जातिवाचकः शब्दो ग्राह्यो न तु केवलं तदर्थः। अत्रापि जकारोत्तराकारोत्तरेकारत्वरूपानुपूर्वीलक्षणं स्वरूपं न ग्राह्यम् "जातेरयान्तनित्यस्त्रीशूद्रात्" (२, ४, ५४) इत्यत्र यान्तस्त्रीशूद्रवर्जनवैयर्थ्यात्। तथा च जातिवाचको यः कश्चित् शब्दः सोऽत्र जातिशब्देन ग्राह्यः॥

### जातिशब्दस्य का व्युत्पत्तिः, तल्लभ्यश्च कोऽर्थो ग्राह्य इत्याकाङ्क्षायां प्रतिवचनम्—

जायेतेऽनया भिन्नेषु वस्तुषु अभिन्नाभिधानप्रत्ययौ [सदृश शब्दप्रयोगज्ञाने] इति जातिः।

जातिशब्देन निरुक्तव्युत्पत्तिलब्धसामान्यमात्रग्रहणे शुक्लादीनामपि गुणादिसामान्योपादायिनां ग्रहणं प्रसज्येत। न चेष्टापत्तिः, सूत्रे जातिग्रहणस्यानर्थक्यं स्यात्। ननु जातिग्रहणेन संज्ञाशब्दानां निवृत्त्या, संज्ञानिवृत्तेरेव फलत्वात् कथमानर्थक्यमिति चेन्न, संज्ञाशब्दनिवृत्तिरेवाभिमता चेत्तदा 'असंज्ञायाम्' इत्येतत्करणेनाऽपि सा भविष्यतीति जातिशब्दस्याऽनर्थक्यं तदवस्थमेव; तथा च जातिशब्दोपादानाद् विशिष्टैव जातिर्ग्राह्या॥

### नन्वत्र कीदृशी जातिः? कियन्तश्च तद्भेदाः? इत्याङ्क्षायां प्रतिवचनम्-

जातिस्त्रिधा-१. काचित् संस्थानव्यङ्ग्या, यथा-गोत्वादिः॥

२. सकृदुपदेशव्यङ्ग्यत्वे सत्यत्रिलिङ्गान्या, यथा-ब्राह्मणत्वादिः।

३. गोत्रचरणलक्षणा च तृतीया, यथा-औपगवी, कठी, इत्यादिः।

प्रथमजातिव्याख्यानम्-संस्थानेन=अवयवरचनाविशेषेण व्यङ्ग्या=बोध्या

या सा प्रथमा जातिर्भवति, यथा-गोत्वादिः; गोत्वं हि गलकम्बलसास्नादीना-मवयवानां रचनाविशेषेण ज्ञायते, इति लक्षणसमन्वयः ॥

सकृदुपदिष्टा निःशेषेण या ग्राह्येत्येतदर्थकस्य 'सकृदुपदेशव्यङ्ग्यत्वे सति' इत्युत्तरदलस्यात्राप्यन्वयात्, देवदत्तादेः कथञ्चित् संस्थानव्यङ्ग्यत्वेऽपि देवदत्त-शब्दस्य न जातिवाचकत्वमेकव्यक्तित्वेन निःशेषेण ग्राह्यत्वाभावात् । तथा च सकृदुपदेशव्यङ्ग्यत्वे सति संस्थानव्यङ्ग्या या सा प्रथमा जातिर्भवतीति ॥

न च द्वितीयलक्षणेन प्रथमलक्षणसंगृहीतगोत्वादीनामपि संग्रहात् प्रथमलक्षणवैयर्थ्यमितिवाच्यम् । तटस्तटी तटमित्यत्र तटशब्दस्य अत्रिलिङ्गत्वा-भावेन तत्संग्रहाय प्रथमलक्षणस्यावश्यकत्वात् ॥

**द्वितीयजातिव्याख्यानम्**—ब्राह्मणत्वादिर्जातिः प्रथमलक्षणेन संगृहीता न भवति, ब्राह्मणक्षत्रियादीनां संस्थानस्य सदृशत्वादिति तत्संग्रहाय द्वितीयलक्ष-णस्यावश्यकता। तथा च संग्राहकमिदं लक्षणम्, न तु पूर्वेणातिप्रसक्तस्य नियमा-येति त्रिलिङ्गभागपि संस्थानव्यङ्ग्या जातिर्भवति, यथा—तटस्तटी तटमिति ।

सकृद्=एकवारं य उपदेश=एवंविधाचारादियुक्तो यः, स ब्राह्मणादिर्विज्ञेय इत्यादिरूपस्तेन व्यङ्ग्यत्वे=बोध्यत्वे सति, अत्रिलिङ्गा=त्रिषु लिङ्गेषु वर्त्तमाना या न भवति, सा अन्या=द्वितीया जातिर्भवति । यथा-ब्राह्मणत्वादिः । ब्राह्मणशब्दो हि 'ब्राह्मणो ब्राह्मणी' इति लिङ्गद्वय एव वर्त्तते, न क्लीबे इत्यत्रिलिङ्गता; एव-मेकस्यां ब्राह्मणादिव्यक्तौ एवंविधाचारादियुक्तो यः स ब्राह्मणादिरिति एकवारमु-पदेशे कृते तदपत्यसहोदरादौ कथनं विनाऽपि ब्राह्मणत्वादेः सुग्रहत्वात्, सकृदुप-पदेशव्यङ्ग्यता, इति दलद्वयसद्भावात् लक्षणसमन्वयः ॥

शुक्लादीनां सकृदुपदेशव्यङ्ग्यत्वेऽपि अत्रिलिङ्गत्वाभावात्, देवदत्तादेरत्रि-लिङ्गत्वेऽपि एकव्यक्तित्वेन सकृदुपदेशव्यङ्ग्यत्वाभावान्न जातित्वम् ॥

ननु परिमाणभेदेन द्रव्यभेदाभ्युपगमे, देवदत्तशरीरस्य परिमाणभेदकृत-शरीरनानात्वेन, एकस्यां व्यक्तौ देवदत्तत्वे कथिते, व्यक्त्यन्तरे कथनं विनाऽपि तस्य सुग्रहत्वाद् देवदत्तत्वादेः जातित्वं समायातमित्यतिप्रसङ्ग इति चेन्न,-

परिमाणभेदेन द्रव्यभेदस्याऽनभ्युपगमात्, अभ्युपगमे वा समानकालतया व्यक्त्यन्तरस्य विशेषणात् । तथा च, यस्यां व्यक्तौ देवदत्तत्वं कथ्यते तत्समानकालमन्या देवदत्तव्यक्तिरप्रसिद्धेति न देवदत्तत्वं जातिः, ब्राह्मणत्वं तु जातिस्तत्समानकालं तदीयपितृभ्रात्रादिषु तस्य सुग्रहत्वादिति ॥

तृतीयजातिव्याख्यानम्—औपगवादीनां सम्बन्धिशब्दानां कठादीनां क्रियाशब्दानां चाऽर्थस्याऽसत्यपि जातित्वे, शास्त्रे जातिनिबन्धनं कार्यमिष्टमिति तत्र पारिभाषिकजातित्वसम्पत्तये तृतीयलक्षणस्याऽऽवश्यकता ।

गोत्रलक्षणा चरणलक्षणा च तृतीया जातिः; तत्र द्विविधं गोत्रम्, प्रवराध्यायपठितमपत्यप्रत्ययाभिधेयं च, यदाह—"अनन्तरापत्यं वृद्धापत्यं युवापत्यं च गोत्रम्" इति । इदमेव चाऽत्र गृह्यते, अस्यैव पारिभाषितत्वात्; तदभिधायिनोऽपत्यप्रत्ययान्ता अभेदोपचारात्, ते चाऽपत्याऽपत्यवत् सम्बन्धद्वारेणापत्ये प्रवृत्ता अपि सम्बन्धिशब्दाः ।

चरणशब्दाश्च कठादयः क्रियाशब्दाः, कठादिप्रोक्ताध्ययनाय यथास्वं व्रतचरणक्रियानिमित्तत्वेन प्रवृत्तत्वात्, तदर्थस्य लोके जातित्वेनाऽप्रसिद्धस्याऽपि जातिकार्यप्रसाधनाय वाचनिकं जातित्वमभ्युपेयते; तेन 'नाडायनी, चारायणी, कठी' इति जातिलक्षणो ङीः सिद्धो भवति ।

इदमत्र हृदयम्,—अपत्याधिकारादन्यत्र लौकिकं गोत्रमिति गोत्रशब्देनाऽपत्यप्रत्ययान्तः शब्दो ग्राह्यः, एवं चरणशब्दोऽध्ययनवचनोऽध्ययनाय व्रताऽऽचरणवचनोऽपि वा, इहोपचाराद्ध्येतृषु वर्तते । तथा च, अपत्यप्रत्ययान्तः शाखाध्येतृवाची च शब्दो जातिकार्यं लभते इत्यर्थः ।

कयाचिदाकृत्या 'एष नाडायनः कठो वा' इति कथनेऽपि आकृत्यन्तरे निर्ग्राह्यताविरहान्नानयोः प्रथमलक्षणेन सङ्ग्रहः, एवम् 'नाडायनं बह्वृचम्' इति नपुंसकप्रयोगदर्शनादनयोः सर्वलिङ्गत्वेनाऽत्रिलिङ्गत्वविरहान्न द्वितीयलक्षणेन सङ्ग्रह इति तृतीयलक्षणस्याऽऽवश्यकता ।

नन्वस्मिन् लक्षणे लक्षणयुगलं प्रविष्टमिति चत्वारि जातिलक्षणानीति

## प्राप्तिस्थलानि

(१)

सरस्वतीपुस्तकभण्डार:, रतनपोळ, हाथीखाना, अमदावाद.

(२)

'श्रीमद्विजयलावण्यसूरीश्वर–जैनसंगीतमंडल'–प्रमुख:
शाह अमृतलाल तलकचंद, मु. चाणस्मा. वाया. महेसाणा (गुजरात).

(३)

शाह पोपटलाल चतुरचंद, पांजरापोळ नाका. दु. नं. ३४७, अमदावाद.

卐 卐 卐

प्रकाशक :-

राजनगरस्थ–श्रीजैनग्रन्थप्रकाशकसभाया: कार्यवाहक:
श्रेष्ठि'ईश्वरदास मूलचन्द्र' इति नामा ।
कीकाभट्टपोळ, अमदावाद ।

मुद्रक :-

जामनगरस्थ- 'श्रीभास्करोदय' मुद्रणालयाधिपतिः पं. श्रीहीरालाल-
तनुजो बालचन्द्रो लालन: ।